M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 30

Title: Tattwa Chintamani

Tattva	Chintāmani.		Title
	Gangeshwar Bhatta		Author
			Editor
			Year, Vols.
			Publisher
30	Only 1st Chapter		Remarks

(न्याय - वैशेषिक)

30

चिंतामं०
प्रत्य०म०
१

॥श्रीगणेशाय नमः॥ गुणातीतोपि त्रिगुणसचिवस्त्र्यक्षरमयः॥ त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्माणि कुरुते॥ कृपापारावारः प
रमगतिरेकस्त्रिजगतां॥ नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे॥१॥ अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं॥ चिंतादिव्य
विलोकनेन च तयोः सारं विलोक्याखिलं॥ तंत्रे दोषगणेन दुर्गमतरे सिद्धांतदीक्षागुरुः॥ गंगेशस्तनुते मितेन वचसा श्रीतत्त्वचिं
तामणिं॥२॥ यतो मणेः पंडितमंडनक्रिया॥ प्रचंडपाखंडतमस्तिरस्क्रिया॥ विपक्षपक्षे न विचारचातुरी॥ न च स्वसिद्धांतवचोद
रिद्रता॥३॥ इह खलु सकलशिष्टैकवाक्यतयाभिमत कर्म्मारंभसमये तत्समाप्तिकामो मंगलमाचरंति॥ तत्र यद्यपि कारणता मंग
लस्य नान्वयव्यतिरेकगम्या विनापि मंगलं प्रमत्तानुष्ठिताभिमतसमाप्तिदर्शनात्· न च तत्र जन्मांतरीयकतत्कल्पनं· अन्यो
न्याश्रयात्· लोकावगतकारणेनान्यथासिद्धेश्च· नापि मंगलं सफलं शिष्टाचारविषयत्वात् दर्शादिवदिति· फलसिद्धौ प्रारि
प्सि प्सितसिद्धेस्तदानीमपेक्षितत्वेन नियतोपस्थापितत्वात्· फलांतरस्यातथाभावात्· विघ्नजिघ्यापेन फलकल्पने गौरवा
त्· परिशेषानुमानेन तत्कारणताग्रहः॥ व्यभिचारेणाकारणत्वस्याभावाद्वा उपायसहस्रेणापि गृहीतुमशक्यत्वादिति· तथा
प्यवगीतशिष्टाचारानुमिता श्रुतिरेव मंगलस्याभिमतसमाप्तिहेतुत्वे मानं· न च व्यभिचारः॥ निःपरिपंथिश्रुत्या मंगलं समा राम०
प्तिसाधनमिति· प्रमापिते तत्रापि तथैव लिंगेन· जन्मांतरीयतदनुमानात्· तच्चेदमारब्धकर्मांगं· कर्मार्थितया शिष्टैस्तत्पू १
र्वं क्रियमाणत्वात्· फलांतराभावे सति· फलवत्कर्मारिप्समानेन नियमतस्तत्पूर्वं क्रियमाणत्वात्· दर्शप्रयाजवत्· आचा
रमूलकश्रुत्यनुमानाभ्यां तदर्थितया· तत्कर्तव्यत्वबोधनात्· तत्फलत्वबोधनाच्च· इत्थारंभसमये नियमेन क्रियमाणत्वा·

अप्रारंभणीयाया· तदर्थितया· क्रियमाणत्वात्· फलांतरश्रवणाच्च· प्रधानत्वमिति· न तया व्यभिचारः॥ ननु मंगलमलौ
किकं· न लौकिकमंगं· लोकावगतकारणतयैव तत्सिद्धेः॥ अत एव महरथादावारंभे· इक्ष्वाकुवृद्धव्याः पायसं ब्राह्मणभो
जयितव्यः इत्यत्र तदुभयमंगं· किंतु नैमित्तिकं· तद्वदिदमप्यारंभसमयनिमित्तकमस्तु· विघ्नजिघ्यायात्वं· फलमिति
चेन्न· तस्यापूर्वरूपोपकारजनकांगविषयत्वात्· अपूर्वं तु प्रतिबंधकाभावरूपमुपकारं॥ तस्य च लोकावगतकारणसहका
रित्वे प्रतिबंधके सति· तस्मान्नदनुपपन्नेः॥ न पूर्वं तु न तथा· विघ्नध्वंसद्वारा चेदं मंगलं न तु द्वीयजतीत्यादिविधिबोधितक्र
याजापूंगयागवददृष्टद्वारा· मंगलजन्यादृष्टं विनापि स्वतंसिद्धविघ्नविरहाद्देवगोरब्धनिर्वाहात्· न चैवं दुरितध्वंस
द्वारपि नेदमंगं· तत्रैव व्यभिचारादिति वाच्यं· सति विघ्ने तत्· ध्वंसद्वारा तस्यांगत्वात्· न चैवं प्रयाजादेरपि दुरितध्वंसद्वार
मस्तु कल्प्यदुरितध्वंसतो॥ पूर्वस्य लघुत्वात्· वस्तुतस्तु· प्रायशो विघ्नसंशये तन्निश्चये वा नियमेन शिष्टानां मंगलाच
रणे· विघ्नध्वंस एव· तद्द्वारत्वेनाकांक्षितः॥ निर्विघ्नसमाप्यतामिति कामनया तत्करणपक्षे श्रुतितएव तद्द्वारत्वनिर्णं
यः॥ किं चापूर्वद्वारत्वे लौकिकांगत्वविरोधः॥ तन्न कारणादेव तदुपपत्तेः॥ इक्ष्वाकुबंधनवत् ननु विघ्नसंदेहे न कथं·
तन्नाशार्थं प्रवृत्तिः॥ दुरितध्वंसार्थिप्रवृत्तौ तन्निश्चयस्य हेतुत्वात् प्रायश्चित्तवदिति चेन्न· विघ्नसंशये निश्चये वा नियमेन
शिष्टानां मंगलाचरणात्· विघ्नध्वंसमेव प्रवर्त्तकं· तादृशाचारानुमितविधिनापि· विघ्नशंकावान् आरब्धसमाप्तिकामोऽधि
कारी बोध्यते· प्रायश्चित्ते तु तन्निश्चयवान्· तथैव विधिना बोधनात्· अत एवाधिकारिविशेषणं विघ्न इति· तत्संदेहे कथं

चिंता० म०
प्र०
२

प्रवृत्तिः वैदिकेधिकारानिश्चयादेवप्रवृत्तिरितिपरास्तं· यतः प्रधानाधिकारिण इह वांगेऽधिकारो नस्त्वतंत्रः अंगानुभवे
प्रसंगात्· नचप्रधानेप्रारिप्सितदुरितवत्त्वमधिकारिविशेषणंविरोधात्· किंतुसमाप्तिकामनत्वात्तुमनस्या· नाश्रितेद:
यत्तन्यत्रेतिश्चितनाधिकारिकर्तृत्वेपि· मंगलंसंदिग्धाधिकारिकर्तृकमेव· विघ्नसंदेहवतां· शिष्टानामाचारानुमितवे
देनतथैवबोधनादितितन्न· विघ्नवत्त्वेनाधिकारित्वाभावात्· क्वचिन्निश्चयेपि· प्रवृत्तेश्च· अपिच· शंकितानिष्टवारणार्थ
मपिप्रवर्त्ततेपरीक्षकाः· यथासर्पादिदंशजन्यविषयसंशये· तन्नाशार्थेभेषजपानादौ· किंच· फलस्यसंशयेपुप्र
वृत्तिनिश्चयात्· यथाकृष्यादौप्रवृत्तिस्तथामंगलेपि· यदिवृष्ट्यादौसति· कृष्यादितोऽवश्यंफलमिति· तर्कोतत्रा
वश्यंप्रवृत्तिस्तदासतिविघ्नेमंगलादवश्यंफलमिति· नकोत्रापिप्रवृत्ति· मस्तु· स्यात्स्यभक्ताशेषनिमित्तकेज्या
यामिष्टितेनहृयोधमनूहेसत्यपि देशावगतपूर्वदिनकर्तव्यदेवतावाहनस्यागस्यभक्ताशेषवारसंशये· वा नानु
ष्ठानमुक्तं· यथाकथंत्वेवारबाधेः अनोविघ्नसंशयात्तन्नाधंमप्रारसंशये कथंमंगलानुष्ठानमितिचेन्न· नैमित्तिके
ष्टिनिमित्तनिश्चयवानेवाधिकारीयथाभिन्नेजुहोतीत्यत्रपात्रभेदवान्· तथेहाप्यशेषवानधिकारीति· पूर्वदिनेऽशे
षनिश्चयाभावात्पुनकमननुष्ठानं· अपिचेज्याकर्त्तव्यतानिश्चये· तदंगानुष्ठाननचाशेषसंशये· तन्निश्चयः पूर्वदिने
ऽतनःप्रधानेऽधिकाराभावान्नांगेऽधिकारइति· नावाहनंपूर्वदिने· यदिवयदिनस्यादिति· न्यायेनकुर्यात्तदाऽनधि
कृतकर्तृत्वेननिःफलंस्यात्· भक्ताशेषेसतीज्याकर्तव्यतानिश्चयेपिनावाहनंपूर्वदिनस्यागस्याभावादितान्याया

राम:
२

मावाहनबाधएव· मंगलेतुविघ्नज्ञानवानधिकारीत्युक्तं तत्संशयेप्यस्ति· प्रधानेचकर्तव्यतानिश्चयोस्त्येवेति· तथा
ऽसंदेहेपियुक्तमनुष्ठानं· भविष्यदिवाद्यभ्युदयेपि· तत्· ज्ञानवानधिकारीतथैवाचारात्· ननुअंगानांप्रधानविधिवि
धेयत्वं· नचग्रंथादिसमाप्तेःप्रधानविधिरस्ति· नचकर्तव्यताबोधकलौकिकप्रमाणस्यशास्त्रमेकदेशोपुज्यते· तस्य
तन्निरपेक्षत्वादितिचेन्न· अपूर्वजनकांगानांतथात्वात्· आचारानुमितश्रुत्याप्रधानविधिंविनापितदंगत्वविधाना
त्· अपिच· प्रधानकर्तव्यताबोधकबोध्यकर्तव्यताकत्वंप्रयोजकत्वं· तच्चेहाप्यस्तिप्रतिबंधकाभावस्यसकलकार्य
हेतुत्वेनलौकिकप्रमाणस्यापितत्सापेक्षत्वात्· यागादिप्रधानदेशकालान्वयस्त्वंगेमंगलेस्यादितिचेन्न· असाधा
रणपूर्वजनकेवांगेतदन्वयात्· अतएवबहुशीरवत्वादौनप्रधानदेशकालान्वयः ननुदुरिताभावेस्वतःसिद्धेसांग
मंगलानुष्ठाननिःफलमिति· तन्नदाशमाण्यं· लोकावगतकारणेहिविघ्नसतिवेदेनतस्यध्वंसजनकत्वंबोध्यतेन
तुतदुत्पाद्य· अतएवतत्त्वज्ञानवतोभोगार्थंनिषिद्धानुष्ठानेदोषाभावोनाधर्मजनकत्वमिति· नतदेदाशमाण्य· प्रमा
णांतरात्स्वतःसिद्धदुरिताभावावगतौ· मंगलाकरणेनित्यवदनुष्ठानं· शिष्टानांमन्यतेतिवत्· नविघ्नज्ञानवतोनित्यव
दनुष्ठानादितिसंप्रदायः· एवं· मंगलंविनापिप्रमत्तानुष्ठितसमाप्तेःननुचतेनविनापिसिध्यतस्तदंगं· नचजन्मांतरीयंत
त्· जन्मांतरीयग्रंथादिकमुद्दिश्यशिष्टैस्तदकारणात्· ननुयथापुत्रेष्टौकर्मसाद्गुण्येऐहिकफलाभावेआमुष्मिकंफ
लं· तथासांगेपिमंगलेयत्रनफलं· तत्रामुष्मिकंफलमितिचेन्न· तत्रपुत्रमात्रस्यकामनाश्रवणात्· इहतुआशिषित

वि·प्र० सफलसमाप्तिकामनया मंगलाचार इति· तथैव· वेदानुमानात्· कारीरिवदासन्नसमयसमाप्तिः फलं· नन्वासन्नसमयसत्त्वं
मूल·३ बंधो वा· न मंगलजन्य इति· समाप्तिमात्रं जन्यं तच्चामुष्मिकसाधारणमिति चेन्न· आसन्नसमयस्य स्वरूपत्वे हि समाप्त्युपल
३ क्षकत्वात्· अन्यथा कारीर्यापि नासन्नसमयफलं स्यात्· तस्माद्भूमिचूरावृत्तान्तरंगमिति· अन्ये तु मंगलं प्रधानं महदृष्टद्वा
रा प्रारब्धकर्मसमाप्तिः फलं· न तत्र मोक्षाधिकारी कश्चित्फलाभावः कर्मादिकवैगुण्यात् कारीरीवत्· न चान्यदुपस्थापितकरणं· नि
यमकालीन तादृशाचारेण फलवत्कर्मारंभसमानेन· सत्समाप्तिकामो मंगलमाचरेदित्यारंभसमयकर्तव्यत्वबोधनात्· य
थाग्निवैश्वानरमेकादशकपालं निर्वपेद्दर्शपौर्णमासावारिप्समान इति· श्रुत्यारंभणीयेष्टेः प्रधानीयारंभसमयक
र्तव्यत्वं· कामनोपाधिकर्तव्यत्वे प्यारंभकाले नियतमनुष्ठानं· आरब्धकर्मसमाप्त्यर्थिनोपायत्वेनावरूपेतदनुष्ठानात्·
न च काम्यत्वे परिसमाप्तिकामनां विनोक्तफलवत्कर्मारंभेपि तदनुष्ठानं न स्यादिति वाच्यं· समाप्तंकर्मस्वफलायालमिति
फलार्थिनः समाप्तौ कामनावश्यंभावादिति तन्न· कारीरीजन्यातिशयवत्· विहितप्रधानजन्यातिशयत्वान्मंगलज
न्यापूर्वस्यापि फलसंपादकादृष्टकारणसंपादकतया रब्धकर्मसमाप्त्यवश्यंभावापत्तेः फलावश्यंभावनिश्चयं विना रामः ३
वैदिककर्मानुष्ठानात्· न चैवं भूयसि सांगेपि मंगले कचिदारब्धसमाप्त्यभावात्· न च तत्रामुष्मिकं फलं· ऐहिकमात्र
फलकत्वात्· वैदिककर्मणः फलावश्यंभावेनागंतुकदुरितेन प्रतिबंधस्याप्यभावात्· किंच यथा कारीर्यादिकमेयुष्मपु
रुषव्यापारं विनैव फलहेतुः तथा मंगलमपि तेन विनैव हेतुः स्यान्न चैवं· लोकावगतकारणतात्तदपेक्षेति चेन्न· तर्हि स

एवं हेतुरस्तु किमनेन· प्रारब्धकर्मजनकदृष्टकारणसंपत्तौ पुत्रेष्टिवत्तत्समाप्तिसाधनत्वं श्रुत्या बोध्यत इति चेन्न· तदृष्टसं
पत्तौ पुत्रानुत्पादाददृष्टद्वारा पुत्रेष्टेस्तज्जनकत्वमस्तु· न च कर्मनिर्वाहे दृष्टसकलहेतुसंपत्तौ विलंबाय न मंगलजन्या
दृष्टापेक्षा स्यात्· अपि च मंगलं विनापि प्रमत्तनास्तिकानुष्ठितसमाप्तेर्न· तत्र तत्कारणं· जन्मांतरीयपुण्यसंपत्तिः तत्र
हेतुरिति चेन्न· तथापि व्यभिचारात्· कचित् पुण्यसंपत्तिः कचिन्मंगलं हेतुरिति· व्रीहियववद्विकल्प एवेति चेन्न· तर्हि त
त्संभावनया नियतं· मंगलानुष्ठानं न स्यात्· एवं प्रयोगे व्रीहेरिव विकल्पेनोभयस्याशास्त्रार्थत्वात्· ननु· विधिवाक्
न फलनियतपूर्वसत्त्वं बोधयति· किंतु मंगलात् फलावश्यंभावमिति चेन्न· इष्टसाधनत्वस्य विध्यर्थत्वात्· अपान्वयव्यति
रेकाभ्यां तद्ग्रहे व्यभिचारो दोषाय· न त्वागमेन तद्ग्रहे· तदुक्तं आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषायेति· अत एव या
गादेः स्वर्गसाधनतेति चेन्न· नियतपूर्वसत्त्वस्य ग्राहकस्याभावात्· आगमेनापि बोधयितुमशक्यत्वात्· यागजनितस्वर्गे
कारीरीजनितवृष्टौ च जातिविशेष एवास्ति· अपरे तु मंगलस्यारब्धनिर्वाहकत्वं· विघ्नसंसर्गाभावद्वारा· तथैव प्रतिबंधका
भावस्य कारणत्वात्· स च अभावः सतो विघ्नस्य ध्वंसोऽनागतस्यानुत्पादः· कर्मनिर्वाहसमयस्थायी विघ्नकारणविनाशाद्वा
ग्रागभावस्य साध्यत्वं· यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं· तदेव तस्य तज्जन्यता न च सतः सत्त्वं गौरवात्·
अस्ति च विघ्नकारणं विना शेऽसति· विघ्नप्रागभावस्य तथात्वं· तावति समये दुरितानुत्पादश्च न साक्षान्मंगलजन्य इत्यदृ
ष्टद्वारतया· एवं च निर्विघ्नसमाप्यतामिति कामनया चारोपि संगच्छते· अत एव यत्र दुरिताभावः स्वतःसिद्धः तत्र सागमं

सि॰ मु॰ ४

गलस्याकिंचित्करत्वेन तत्‌· वेदप्रामाण्यमिति निरस्तं· अनागतविघ्नानुत्पादस्य· तत्रापि साध्यत्वात्‌· सर्वे विघ्नाः ध्वंसं यां
तीति यत्र विनायकस्तवादौ श्रुतमस्ति· तत्रापि तत एव प्रमत्तानुष्ठितसमाप्तेः अनादौ संसारे चावश्यं तदावरणात्‌· तथा
चैतेन समं मंगलस्य विकल्प एव यत्र बहूनां गोस्त्यपि· न फलं तत्र विघ्नभूयस्त्वादिति· तन्न विघ्नानुत्पादस्य व्यापारत्वे
मानाभावात्‌· संसर्गाभावत्वेन हेतुत्वात्‌· नष्टस्य व्यापारत्वं· तत्प्रागभावस्यास्तीति चेन्न· अत्यन्ताभावस्यापि व्यापारत्वापत्तेः
स्वतःसिद्धस्य तस्य तद्धेतुत्वं· यदि तदा प्रागभावस्यापि तुल्यं किंच यत्र मंगलं· न तत्र नियमेन विघ्नकारणमस्ति· येन तन्नाश
द्वारं प्रागभावस्यापि साध्यत्वं· एवमपि यत्र विघ्नानुत्पादः स्वतःसिद्धस्तत्र मंगलमकिंचित्करमेव· विघ्नध्वंसानु
त्पादयोरारब्धकर्मनिर्वाहकालावस्थायिनो मंगलादेवोत्पत्तेर्न· तदर्थमदृष्टद्वारं मंगलस्याविकल्पेनान्वये शिष्टैर्नि
यमतो मंगलानुष्ठानं नस्यादित्युक्तं किंच प्रधानत्वे सांगमंगलमात्रं न समाप्तिमात्रहेतुः तस्मिन्सत्यपि तदभावात्‌· प्रवि
तं· तथैवेति चेन्न· अप्रचितादपि फलसत्वात्‌· नोभयमननुगमात्‌· गुर्वारंभे प्रचितमल्पकल्पारंभे त्वल्पमिति चेन्न· क्व रामः ४
चित्तादृशादपि फलासत्वात्‌· वैपरीत्येपि फलसत्वाच्च· एतेन बहुविघ्नशंकया बहुतरमल्पविघ्नशंकयाल्पं च हेतुः
तादृशाचारेण तादृशश्रुत्यनुमानादिति निरस्तं· तादृशादपि प्रारिप्सितासमाप्तेर्वैपरीत्येपि समाप्तेश्च· बहुत्वस्यैनि
वतुरादिभावेनाल्पस्य चैकत्वादिरूपतया ननुगमेन श्रुत्या बोधयितुमशक्यत्वाच्च· तस्मान्मंगलं नांगं न वा प्रधानमि
ति पूर्वपक्षः॥ सिद्धांतस्तु· आरब्धसमाप्तौ मंगलं नांगं न वा प्रधानं· अहेतुत्वात्‌ किंतु प्रायश्चित्तवत्प्रधानं· विघ्नध्वंसः

फलं· आरब्धनिर्वाहे विघ्नो मा भूदिति· कामनया तदनुष्ठानात्‌· विघ्नसंशये निश्चये वा· शिष्टानां तदाचारात्‌· विघ्नाभावस्या
कांक्षितत्वाच्च· यदि निर्विघ्नं समाप्यतामिति· कामनया तदाचरणे· तदापि नान्तरीयकविशेषणमन्यथा येनाहं स्वर्गी स्यामित्यत्रस्व
र्गद्वारविघ्नाभाव एव फलं· न समाप्तिः फलं व्यतिरेकव्यभिचारात्‌· समाप्तिस्तु विघ्नरूपप्रतिबंधकाभावे सति लोकावगतकार
णादेव· प्रचिताप्रचितदेवतास्तुत्यादिसांगमंगलात्‌ प्रत्येकं विघ्नध्वंसो भवत्येव· अतो वैदिके फलनिश्चयान्मंगलप्रवृ
त्तिः न च वेदप्रामाण्यं समाप्त्यभावस्य क्वचित्तादृशविघ्नभूयस्त्वात्‌· क्वचिन्मंगलानंतरोत्पन्नविघ्नात्‌· क्वचिल्लोकावग
तकारणाभावात्‌· प्रारिप्सितविघ्नध्वंसश्च न मंगलं विना· न च प्रायश्चित्तेन शंकितविघ्ननाशः विघ्नसंशयेन तदनुपद
शात्‌· न च कामनोपाधिकर्तव्यत्वे नियतमनुष्ठानं नस्यादिति वाच्यं· आरब्धकर्मकारणप्रतिबंधकाभावोपायत्वेनाव
श्यं तदनुष्ठानात्‌· तेन विना प्रतिबंधकाभावे सति कर्मानुत्पत्तेः न च प्रधानत्वे स्यादपि· तत्करणं नियतसमयशिष्टा
चारानुमितश्रुत्या कर्मारंभसमये· तत्कर्तव्यत्वबोधनात्‌· दर्शारंभसमयेऽन्वारंभणीयवत्‌· विघ्नसंसर्गाभावश्च समाप्तौ
हेतुः न च कथंचित्स्वतःसिद्धः क्वचिन्मंगलसाध्यः अत एव मंगलं विनापि जन्मांतरानुभानविघ्नात्यंताभावात्‌ प्रमत्त वर्ते ४
नास्तिकानुष्ठितसमाप्तिः न वा न्यवसायः शंकितविघ्नवारणार्थं प्रवृत्तिरतो यावत्‌ विघ्नशंकं तदाचरणात्‌· अत एव न
चकयामप्येतदाचरंति गुर्वारंभे च बहुविघ्नशंकया बहुमंगलाचरणं· यथा विघ्नसंशये प्रवृत्तिस्तपोक्तमेव स्यादेत
त्‌· मंगलमाचरेदिति विधौ· किं मंगलत्वं· न तावत्‌ देवतास्तुत्यादिकत्वमननुगमात्‌· नापि प्रारिप्सितप्रतिबंधकविघ्नो

चिं· मू·
५

पशमहेतुक्रियात्वं· विघ्नोत्साधारणासाधारणकारणत्वं वा· क्रियाविशेषस्य तदसाधारणकारणस्य वा स्तुत्यादेरभे
दात्· विशिष्यापरिचये प्रवृत्तिविषयत्वाभावात्· नापि निर्विघ्नसमाप्तकामितिकामनया शिष्टाचारविषयत्वं वृत्तस्याचा
रानुपजीवकत्वात्· वेदादाद्याचारानुपपत्तेरन्योन्याश्रयात्· नापि तत्कामनया वेदविहितत्वं· आरिप्सितकर्मनिर्विघ्न
त्वे सति कर्मारंभकाले विहितवैदिककर्मत्वं वा· तादृशवेदान्तराभावात्· नापि स्मृत्यादौ मंगलत्वेन कीर्तितत्वं· वेदस्यास्य
त्वानुपजीवकत्वात्· स्मृतिकर्तुरेव वेदादाद्याचारानुपपत्तेश्च· ॥अत्रोच्यते· ॥मंगलमाचरेदिति न विधिः॥ किंतु निर्वि
घ्नसमाप्तिकामो देवतास्तुतिमाचरेदित्यादिप्रत्येकमेव विधिः॥ तथैव शिष्टाचारात्· तदुपजीव्य निर्विघ्नमारब्धं समाप्य
तामिति कामनया विघ्नोपशमहेतुत्वेन वेदविहितत्वं· मंगलत्वमित्यवगम्यते· देवतास्तुतिनमस्कारादिषु मंगलव्यवहारश्च
पुनामिति· अत एव दुरितनाशकगंगास्नानादिषु मंगलत्वं· तथा श्रुतिविधानात्· मंगलाचारयुक्तानां नित्यं च प्रयतात्म
नां तपतामुक्तानां च विनिपातो न विद्यते॥ इत्यनेन बोधितादर्शनादेः पृथगेव मंगलत्वेन तु विघ्ननिवर्तकतया तत्र
नार्थेनोक्तेव अथान्यपापाथाधारंभेण नमस्कारतुल्यतया तत्करणप्रसंगः॥ अथशब्दो विघ्ननिवर्तकत्वान्मंगलमेव ॐका राम· ७ ५
रश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा॥ कंठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ इति स्मृतेः॥ न च मुख्यमुच्चकत्वमेव· तस्य
शास्त्रारंभकसमये· महर्षिणा तदनुपादानप्रसंगात्तु एवं तत्पारव्यानं क्रान्तिः यमुद्दिश्य परस्य स्वापकर्षबोधनानुकू
लो व्यापारविशेषः॥ स तत्स्य नमस्कारः॥ व्यापारश्च कायिको वाचिको मानसश्च विशेषो जातिविशेष एवानुभवसाक्षिकः॥ क

रशिरश्चरणसंयोगमात्रेण व्यवहारात्· भवतोऽहमपहृष्ट इत्यादिवचनेन तद्व्यवहारश्च· यद्वा कायिकादौ प्रत्येकमेव विधि
कल्पनं अतो नानार्थत्वं च· यद्वा बुद्धिविशेषपूर्वकत्वज्ञानं विना कायिकादौ न तद्व्यवहार इति· स एव वाक्यान्यत्र लक्षणेन
त्र· कायिकादिव्यापारविशेषमनवगम्य तद्विशेषपूर्वकताज्ञानात्· स्वीकृतवेदप्रामाण्यानां शिष्टानां आचारे वेदानिषि
द्धत्वमविगीतत्वं विशेषणं देयं· यद्वा अलौकिकविषयशिष्टाचारत्वमेव हेतुः॥ शिष्टाचारत्वं च प्रमाजन्याचारत्वं· आस्ति
कनास्तिकयोरगम्यागमनं चैत्यवंदनाचारजनकज्ञानस्य भ्रमत्वात्· बलवदनिष्टाननुबंधित्वादिष्टसाधनत्वाच्च लोकेप्र
पंचाशवत्शिष्टव्यवहारो वेदप्रामाण्याभ्युपगमनिबंधनः॥ तीर्थिकत्वेपि· शिष्टाशिष्टव्यवहारो वेदनिषिद्धानिषिद्धकर्तृ
त्वनिबंधनः॥ यद्वा वेदप्रामाण्याभ्युपगंतृत्वे सति यो यदा निषिद्धकर्त्ता स तदाऽशिष्टः॥ तत्कर्त्ता च शिष्टः॥ अत एव वेदानिषिद्धकर्तृ
कर्त्तापि दोषान्न शिष्टः॥ पापजनकत्वज्ञानं विना वेदनिषिद्धकर्तृत्वं यस्य नास्ति स शिष्ट इति· न तीर्थिकस्य कस्यचित्पाप
जनकत्वज्ञानं विना वेदनिषिद्धकर्तृत्वात्· यद्वा रागद्वेषहीनः॥ शिष्टः॥ स च सर्वज्ञत्वान्मन्वादिरेव अवगीततदाचाराद्वेद
नुमानमिति· तत्कालेऽपि विमतावाचारादर्शनात् आधुनिकानां मंगले प्रवृत्तिर्न स्यात्· आधुनिकानामाचारेण मन्वाद्याचा
रानुमानात् तेन च वेदमनुमाय बालैः प्रवर्त्त्यत इति चेन्न· तर्हि यादृशाचारेण मन्वाद्याचारानुमानं· तादृशाचारो वेदानुमा
पकोऽस्तु· किमनुमितानुमानेन· आधुनिकानामपि शिष्टत्वेन तथाक्रियमाणत्वात्तथा च स्मृतिः॥ यस्मिन्देशे य आचारः
पारंपर्यसमागतः श्रुतिस्मृत्यविरोधेन सदाचार उच्यते· सर्वत्र तस्य मंगलाचारत्वे मानाभावात्· मन्वादिस्मृतौ मंगलं

चिं॰ १ मू॰ श्रूयत इति चेत् स्मृतिकर्तुः सर्वज्ञत्वेपि वेदार्थप्रतीत्यस्मृतिप्रणयनप्रसंगात् · यत्तु शिष्टाचारत्वेन कर्तव्यतैवानुमीय
६ तां · किं वेदेनेति तत्र वक्ष्यामः ॥ अथ जगदेव दुःखपंकमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं प
णि रमकारुणिको मुनिः प्रणिनाय · तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत् ·
तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते · ननु · प्रमाणादीनां तत्त्वं प्रतिपादयतु शास्त्रं परं पुरुषार्थ·
निःश्रेयसेन न संबध्यत इति न युक्तं · प्रमाणतत्त्वावधारणस्याशक्यत्वात् · तद्धि प्रमाणतत्त्वावधारणाधीनं · तच्च स्वतः परतो वा
न संभवति · वक्ष्यमाणदूषणगणग्रासात् · अथ किं प्रामाण्यज्ञानेन प्रवृत्तिमात्रे तस्य व्यभिचारात् · बहुवित्तव्ययायास
साध्ये · प्रवृत्तिश्चावश्यकोर्थनिश्चयादेव · न च यस्य संशये व्यतिरेकनिश्चयो · यत्र प्रवृत्तिप्रतिबंधकौ तन्निश्चयस्तद्धेतु
रनुमितौ व्याप्तेरिवेति वाच्यं · तत्संदेहे सत्यर्थसंदेहेनाधीनिश्चयादेवाप्रवृत्तेः · तत्र तयोः प्रतिबंधकत्वादिति चेत् · न प्रा
माण्यसंशयानंतरमिदमित्थमेवेत्यवधारणस्य निःकंपप्रवृत्त्यंगस्य प्रामाण्यनिश्चयाधीनत्वात् · ननु · स्वत एवास्तु
तन्निरूपणं · तथाहि तत्र विप्रतिपत्तयः ज्ञानप्रामाण्याप्रामाण्यग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा · तज्ज्ञानविषय
कज्ञानाजन्यज्ञानग्राह्यं न वा प्रथमे स्वतः पक्षे ज्ञात एव ज्ञाने प्रामाण्यग्रहः स्वतस्त्वे प्रामाण्यवत एव ज्ञानस्य ग्रहात् · स्वाश्रय रामः १ ६
ग्राहकेण गृह्यत एव न वा · स्वाश्रयेण गृह्यत एव न वेति प्रत्येकमेव वा · यत्तु योगजधर्मसामान्यलक्षणया वा स्वप्रामा
ण्यं तेनैव गृह्यत इत्यंशतः सिद्धसाधनमतो योगजधर्माद्यजन्यत्वं विशेषणं तेन न · परं प्रत्यसिद्धेः प्रामाण्यमात्रपक्षत्वे प्रामाण्यं
प्रत्यासत्त्यार

स्वाश्रयेण गृह्यत एवेत्युद्देश्यप्रतीतेरसिद्धेश्च नांशतः सिद्धसाधनं · यद्वा घटोयमिति ज्ञानप्रामाण्यं · एतज्ज्ञानग्राह्यं न वेति ·
एतज्ज्ञानग्राहकमात्रग्राह्यं न वेति · तच्च यद्यपि विशेष्यावृत्त्यप्रकारत्वमगृहीतग्राहित्वं वा · प्रामाण्यं सर्वेषां यथार्थत्वपक्षेनुभ
वत्वजातेरभावेन स्मरणान्यज्ञानत्वं · विशिष्टज्ञानत्वं वा प्रामाण्यस्वरूपं न तेनैव न वानुव्यवसायेन गृहणयोग्यं विशेष्या
वृत्त्यप्रकारत्वादेः · विशेषणस्य प्रागनुपस्थितौ · तद्वैशिष्ट्यस्य ज्ञातुमशक्यत्वात् · नापि ज्ञानातींद्रियत्वे ज्ञानानुमितस्यातत्
रस्य तेन ज्ञानमात्रलिंगस्य प्राक्तृप्तादेस्तद्व्यभिचारात् · नापि प्रमाहिततज्ज्ञानताविशेषात् · तस्य प्रथमं दुर्निरूपत्वात् · अन्यथा
प्रमाहितज्ज्ञानताविशेषादप्रामाण्यस्यापि स्वतो ग्रहापत्तिरिति · तथापि तद्वति तत्प्रकारकज्ञानत्वं · तद्वति तद्वैशिष्ट्यज्ञानत्वं वा ·
प्रामाण्यं तन्निश्चयादेव निःकंपव्यवहारात् · लाघवाच्चानन्यत्वं गौरवात् · तच्च ज्ञानग्राहकसामग्रीग्राह्यमेव · तथाहि ·
विशेष्ये तद्धर्मवत्त्वं तद्धर्मप्रकारकत्वं च · व्यवसायस्यानुव्यवसायेनानुमित्यादौ स्वप्रकारेण गृह्यते · विषयनिरूप्यं हि ज्ञान
मतो ज्ञानवित्तिवेद्यो विषयः इति व्यवसाये भासमाने · धर्मधर्मिवत्तद्वैशिष्ट्यमपि तत्र विषयः · व्यवसायरूपप्रत्यासत्तेस्तुल्य
स त्वात् · संबंधितावच्छेदकरूपवत्तया ज्ञायमाने संबंधिनि संबंधिकनिरूपणमिति · अनुव्यवसायस्य रजतत्वावच्छेदेन पुरोव
र्त्तिविषयत्वाच्च · अन्यथा पुरोवर्त्तिनं रजतं च जानामीति तदाकारः स्यात् · न तु रजतत्वेन पुरोवर्त्तिनमिति · अत एवाप्रमापि प्रम
तिव गृह्यते · अनुव्यवसायस्याप्रमविषयधर्मधर्मिवैशिष्ट्यविषयत्वात् · न च प्रामाण्यमप्रमतो ज्ञानमिति · न तदारोपः स्यादिति
वाच्यं · प्रामाण्यस्य ज्ञानग्राहकसामग्रीग्राह्यत्वे · न सा न विनिवधत्वात् · अभावप्रतिपत्तौ प्रतियोगिताभाववत्त्वयोरिव · तदभाववति ति

विं१मू० ७ त्प्रकारकज्ञानत्वप्रामाण्यं·परतोज्ञानं·तदभाववत्तस्यप्रमानुल्लेखितत्वेनानुव्यवसायाविषयत्वात्·नचैवमनुव्यवसा
यस्यापिव्यवसायविषयकत्वे·भ्रान्तत्वातिप्रसंकरइतिवाच्यं·बाधानवतारदशायांतत्स्वीकृतत्वात्·तदवतारेतस्यैवप्रतिबं
धकत्वात्·उपनायकाभावात्तेरभावाच्च·अतएवान्यथाख्यातिरस्यनभ्रमः·स्वपतद्रूपत्वेनधर्मधर्मिवैशिष्ट्यमात्रं·किंतु·तस्यविशे
षणताविशेषः·स्वव्यवसायेभासते·नानुव्यवसाये·मनसोबहिरस्वातंत्र्यादितिचेत्·न·व्यवसायोपनीतत्वेनविशेषणे
विशेष्ययोरिवविशेषणताविशेषस्यापि·तद्विषयत्वात्·विशेषणतायानिराकरिष्यमाणत्वाच्च·एतेनस्वप्रकाशस्वतो
नप्रामाण्यग्रहः·धर्म्यग्रहेतद्धर्मस्याग्रहात्·शंकागंधवद्योग्यत्वान्नग्रहेपिज्ञानंप्रमाणमिति·धीर्नस्यात्·स्वप्रकाशेपि·
स्वमात्रसाक्षिणःस्वधर्मग्रहसामर्थ्यात्·सामर्थ्येवाप्रामाण्यमपिस्वतोगृह्णीयात्·परप्रकाशेलिंगेनमनसावा·ज्ञप्रमा
णंज्ञानेनचेतव्याहृतंप्रामाण्यंगृह्णीयात्·अविचारात्·नचयत्रयदस्तितत्रतद्भासते·अप्रामाण्यस्यापिस्वतोग्रहापत्तेः
अनुव्यवसायस्यानुमितेर्वा·विषयोजन्यत्वात्वातिनिरस्तं·तद्वतितत्प्रकारकज्ञानत्वं·तद्वतितद्वैशिष्ट्यज्ञानत्वंवा·प्रामाण्यं रामः ७
व्यवसायस्येति·तेनानुव्यवसायेनवानुमित्यावानग्रहात्तद्विशिष्टत्वस्यतत्प्रकारकत्वस्यचतज्ज्ञानग्राहकसामग्र्याग्राह्यत्वा ७
त्·यदिचप्रामाण्यंपरतोज्ञायेततदाप्रामाण्यज्ञानेपि·तदनुमापकलिंगपरस्पर्याप्यादिज्ञानेषुस्वस्वविषयनिश्चयापार्थप्रामा ण्य
ण्यस्यपरतोज्ञेयत्वेफलमुखीकरणस्तुखीवानवस्थास्यादितिनप्रामाण्यं·ज्ञायेतेतिपरिशेषादपि·स्वतःप्रामाण्यग्रहइतिपू
र्वपक्षः॥ ॥सिद्धान्तस्तु·प्रामाण्यस्यस्वतोग्रहेनभ्यासदशोत्पन्नज्ञानेतत्संशयोनस्यात्·ज्ञानग्रहेप्रामाण्यनिश्चयादितिवि

येनस्वतःप्रामाण्यग्रहः·ज्ञानाग्रहेधर्मिज्ञानाभावान्नसंशयः·ननुकोटिस्मरणादिनासंशयपूर्वक्षणेऽनुव्यवसायविनाशान्नत
द्विशेष्यकोमानसःसंशयइतिचेन्न·ज्ञानोपनीतेव्यवसायेप्रामाण्यसंशयान्ननुधर्मिज्ञानंनसंशयहेतुःकोटिज्ञानेविशेषा
दर्शनेधर्मीन्द्रियसन्निकर्षात्प्रामाण्यसंशयरूपएवज्ञानयहउत्पद्यतइतिचेन्न·ज्ञानातीन्द्रियत्वेनज्ञानंविनातद्धर्मिकमा
नससंशयानुपपत्तेः·किंचनसंशयजनकं तस्यनिश्चायकत्वात्·ज्ञानस्यमानसत्वेचप्रामाण्यज्ञानवत्त्वात्·सामग्र्यपिसं
शयप्रतिबंधिका·अन्यथाविशेषदर्शनकालेसंशयापत्तेः·अथधर्मिज्ञानविशेषादर्शनदशायामनेककोटिस्मरणेतदारो
पःकोटिद्वयस्मरणेसंशयइतिनिश्चयसामग्रीतःसंशयसामग्रीबलवतीतिकोटिद्वयस्मरणेसंशयःस्यान्नतुनिश्चयइ
तिचेन्न·विरुद्धोभयारोपसामग्रीद्वयसमाजात्·उभयारोपएकएवभवति·सएवसंशयः·नत्वेकारोपसामग्र्यापरारोपसा
मग्रीप्रतिबंधोविशेषात्·नचोभयारोपसामग्र्याएकनिश्चयसामग्रीप्रतिबंधइतिवाच्यं·प्रत्येकारोपसामग्रीद्वयभिन्ना
यास्तस्याअभावात्·नचसामग्रीद्वयात्कार्यद्वयं·समूहालंबनवदुपपत्तेः·तस्मात्प्रामाण्यनिश्चयसामग्रीसत्वान्न
तत्संशयःस्यात्·धर्मिज्ञानंसंशयहेतुः·अन्यथासंशयेधर्मिनियमः·कोट्युत्कटत्वंचनस्यात्·उपपीतःशंखश्चाद्यो
मुखमित्यादिभ्रमोविशेषदर्शनेपि·यथा·दोषांतरात्तथानिश्चितेप्रामाण्येदोषांतरात्तत्संशयइतिचेन्न·नतद्वदेवात्राप्रि
प्रवृत्तिप्रसंगात्·साक्षात्कारिभ्रमेचसाक्षात्कारिदर्शनं·विरोधिदृढज्ञानादेतत्प्रादुर्भावात्·तत्रनास्तिचिन्तादिनाप्रतिबंधात्·न
चोत्पत्तेवकश्चिद्दोषोस्ति·नचप्रामाण्यसंशयाद्विषयसंशयवत्·प्रामाण्यज्ञानेप्रामाण्यसंशयात्·विषयेप्रामाण्यसंशय

विं१मू इति वाच्यं· अप्रामाण्यज्ञानेपि स्वतः प्रामाण्यग्रहे तत्संशयानुपपत्तेः॥ ननु· ज्ञानमात्रं न विरोधिबुद्धिनिवर्तकं· अप्रमोत्तरं बाध
८ कज्ञानमप्रामाण्योदयात्· किं त्वनन्यथासिद्धं· अत एव तेन विनापि तद्बुद्धिः संभवतीत्यन्यथासिद्धतया शंकितं निश्चयं· प
रिभूय ज्ञानविषयताद्विषयेप्यप्रामाण्यसंशयः स्यात्· यथा प्रामाण्ये तन्निश्चयस्यान्यथासिद्धत्वाशंकया तत्· परिभूय संशयः· न च व्यव
सायस्य ज्ञानत्वे घटादिविषयत्वे च यथानुव्यवसायविषयत्वान्न संशयः· तथा प्रामाण्येपि न स्यादनुव्यवसायस्य प्रमात्वनिय
माद् इति वाच्यम्· अज्ञाने अविषये च ज्ञानत्वविषयत्वयोरनुव्यवसायेनाग्रहणनियमात् तद्विषयत्वमनन्यथासिद्धं· प्रामाण्ये तु वि
षयत्वं च तेन विनापि संभवतीति तत्र संशय इति चेत्· मैवं· भ्रमत्वमन्यथासिद्धत्वं न तच्च प्रामाण्यनिश्चये भ्रमत्वसंशयेन तद्वि
षये प्रामाण्यसंशय इति फलितार्थः· भ्रमत्वसंशयश्च न बाधाबोधाभ्यां संभवतीत्युक्तत्वात्· एवमन्यत्रापि भ्रमत्वसंशयात्तद्वि
षये संशयः स्वतः प्रामाण्यग्रहे भ्रमत्वसंशयाभावात्· न च प्रामाण्यसंशयात् तद्विषयसंशयो मानाभावात्· ज्ञानविषयत्वात्·
समानधर्मादेव तदुत्पत्तेः· न चैवं सर्वत्र विषये संशये तन्निश्चयोद्देशः प्रामाण्यसंशयेपि तुल्यतादिति वाच्यं· तस्य साधकत्वे कर्तृ रा.म.१
भावात्· भ्रमत्वसंशयं विना निश्चिते विषये संशयानुत्पत्तेरनुभवसिद्धत्वाच्च· अपतदुति तत्प्रकारकज्ञानत्वं प्रामाण्यं· तच्च ज्ञानग्रा ८
हकेणागृहीतमेव तेन संशयः· न चास्मिन्निश्चितेपि प्रामाण्यस्य संशयात्· तत्प्रामाण्यमिति वाच्यं· एतन्निश्चयादेव निःकंपव्यवहा
रादिति चेत्· अस्तु तावदिदं प्रामाण्यं तथाप्यनुव्यवसायानंतरं· व्यवसायस्य प्रामाण्ये· अर्थस्य तद्वत्वे च संशयस्यानुभवसिद्धत्वा·
न्नार्थतद्वत्वं तस्य विषयः॥ ननु व्यवसायस्येदं त्वरजतत्वविशिष्टविषयत्वेनानुव्यवसाय एवमानं तथा व्यवसायोल्लिखित

प्रकारविशिष्टएव धर्म्यनुव्यवसाये भासते· अन्यथा विषयांशे तस्य निर्विकल्पकत्वे इदं रजतं जानामीति तदाकारो न स्यात्· अ
तो धर्मिणि इदं रजतत्ववैशिष्ट्यमनुव्यवसायेन गृहीतमिति धर्मिणि स्वतः प्रामाण्यग्रहे तद्रजतत्ववैशिष्ट्येपि स्वतः प्रामाण्यज्ञान
मवर्जनीयं· अत एव धर्म्यंशे कदापि न प्रामाण्यसंशय इति चेत्· मैवं· इदं रजतं च जानामीति नानुव्यवसायः· बहिर्विशेष्यके म
नसो स्वातंत्र्यात्· किं त्विदं रजतत्वेन जानामीति तच्चेदं रजतत्वप्रकारत्वेनैतत्प्रकारज्ञानवत्त्वं चात्मनि भासते· अन्यथा प्रकारवाचि
तृतीयार्थासंभवः· रजतत्ववैशिष्ट्यस्य तद्रूपत्वेव्यवसायेपि तृतीयोल्लेखापत्तिः· तथा च धर्मिणि इदं त्वरजतप्रकारज्ञानविषय
त्वेनात्ज्ञानविषयत्वे चात्मनोनुव्यवसाय एव मानमिति· न विषये तस्य निर्विकल्पकं· अत इदं त्वरजतत्ववैशिष्ट्यं पुरोवर्ति
नो नानुव्यवसायविषय इति न स्वतः प्रामाण्यग्रहः॥ तस्मादनभ्यासदशापन्नज्ञानप्रामाण्यं परतो गृह्यते ज्ञायते सांशयिकत्वा
दप्रामाण्यवदित्याचार्याः॥ ननु स्वग्राह्यत्वेपि कदाचित्परतो ग्राह्यत्वात् स्वस्याप्यन्यापेक्षापरत्वात्· भट्टमते च परग्राह्यत्वाच्च· सिद्ध
साधनं न च ग्राह्यप्रामाण्यापेक्षापरत्वं· ग्राहकस्यापि ग्राह्यप्रामाण्यत्वेन तदपेक्षापरत्वाभावात्· अग्राह्यप्रामाण्यादे
यापरत्वे प्रामाण्यप्रसंगात्॥ उ॥ उच्यते· अनभ्यासदशापन्नज्ञानप्रामाण्यं· न स्वाश्रयग्राह्यं· स्वाश्रयातिरिक्तग्राह्यं वा· स्वा
श्रये सत्यपि तदुत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वात्· अप्रामाण्यसंशयाजन्यसंशयविषयत्वाच्च· अप्रामाण्यवत्· अपनिश्चि
तेपि न तन्निश्चयानंतरं तृतीयक्षणे अर्थसंशयेन वा प्रामाण्यसंशयं विनोत्पत्ति नार्थेन व्यभिचारः॥ विवादपदं नयावत्· नयाव
त्स्वाश्रयग्राहकग्राह्यं· स्वाश्रयनिश्चये तदुत्तरतृतीयक्षणे अप्रामाण्यसंशयं विना वा संदिह्यमानत्वात्· अप्रामाण्यवत्तयत्वात्

चिंता॰ प्र॰ ९

नभ्यासदशापन्नैतत्‌ज्ञानप्रामाण्यंएतत्प्रामाण्यसंशयपूर्वकालीनैतत्‌ज्ञाननिश्चयाविषयः॥एतत्तुज्ञाननिश्चयानंत
रंसंदिह्यमानत्वात्प्रामाण्यवत्‌नचस्वपदस्यप्रामाण्यमात्रपरत्वात्‌स्वाश्रयाग्राह्यत्वेबाधः॥स्वपदस्यसंबंधिपदत्वेनसममि
व्याहृतपरत्वात्‌अन्यथास्वस्यपरत्वात्‌परस्यस्वत्वात्‌तदेतत्स्वपतदेतदन्यस्यस्वस्वपरसाधारण्यात्‌स्वतःपरतोवेतिसंश
योनस्यात्‌प्रामाण्यस्यस्वग्राह्यत्वेबाधात्‌परिशेषेणान्यथाग्राह्यत्वंपरतोग्राह्यत्वमितिकेचित्‌प्रथमंवैप्रामाण्यज्ञानंव्यति
रेकिणाननुप्रामाण्यप्रसिद्धिंविनाव्याप्त्यग्रहात्‌कथमनुमानंअथबाधानंदउभयेनप्रमातद्विषयसिद्धौतदृष्टांतेनजेय
त्वादिनावह्निः॥प्रमाविषयत्वमनुमेयंतत्रश्चसामान्यतःसिद्धौनसाध्याप्रसिद्धिः॥विशेष्यानिर्णयात्‌नान्वयितासाधारण्ये
नचप्रामाण्येनानुगतंकिंतुप्रतिज्ञानंविषयप्रकारभेदाद्भिन्नंतथाचवह्निज्ञानस्यवह्न्यवृत्तिप्रकारानवच्छिन्नतादिकंसा
ध्यंतत्त्वाप्रसिद्धमितिवाच्यंवह्निज्ञानस्यविशेष्यावृत्तिप्रकारानवच्छिन्नतादिकंसाध्यमानंपक्षधर्मताबलेनवह्निविषयक
प्रामाण्यपर्यवस्यतीतिचेत्‌तर्हिप्रथमंकस्यापिस्वार्थंप्रामाण्यानुमानंनस्यात्‌प्रामाण्यनिषेधःस्वस्यपरकीयव्याघा रामः ९
तस्यतदानुपस्थितेः॥स्वयंप्रामाण्यनिषेधस्यतत्पूर्वकत्वात्‌प्रामाण्यमपरिज्ञायप्रामाण्यनिषेधेनपरकीयव्याघात्‌
स्याज्ञानात्‌अतएवविसंवादविसंवादाभ्यांतद्धेतुज्ञानेनचनिश्चयानुमानेपिपर्युदासप्रामाण्यस्यविशेष्याप्रतीतेरिति॥ ॥उच्यते
प्राग्वीयसंस्कारादिविशेष्यावृत्तिप्रकारकत्वंतद्वतितत्प्रकारकज्ञानत्वंवाप्रामाण्यमात्रंस्मृतंवह्निज्ञानादौसाध्यमानंसर्व
नाममहिम्नापक्षधर्मताबलात्‌वावह्निज्ञानस्यविशेष्यावृत्तिप्रकारकत्वादौपर्यवस्यतिस्वतःप्रामाण्यनिषेधेप्राथमिक

प्रामाण्यज्ञानस्यान्यथोपपादयितुमशक्यत्वादितिसंप्रदायः॥ ॥वयंतुब्रूमः॥प्रथमंप्रामाण्याभावएवप्रामाण्यंव्यतिरेकिणा
साध्यंतत्रएवप्रवृत्तेरुपपत्तेः॥तदेववासिध्यति पक्षधर्मताबलात्‌तद्वतितत्प्रकारकज्ञानत्वादिकमादायसिध्यतितदनंत
रमर्थात्सिध्यतीतिवक्ष्यते तथाहिअयंवह्नित्वेनानुभवोवह्नित्वाभाववन्निविहितप्रकारकोनेनवह्निवृत्तिप्रकारकोनवि
शेष्यावृत्तिप्रकारकोनवह्नित्वप्रकारकत्वेसतिवह्न्यविशेष्यकोनवह्नित्वव्यधिकरणप्रकारावच्छिन्नोनवातादृशप्रका
रकोनवातादृशसमर्थविषयकप्रवृत्तिजनकत्वेसतिवह्नित्वप्रकारकनिश्चयत्वात्‌तादृशसमर्थविशेष्यकवह्नित्वप्रकारक
निश्चयत्वाद्वायन्नैवंतन्नैवंयथावह्न्यप्रमातत्रबाधावतारानंतरंस्मृत्युपनीते[…]वह्नित्वाभाववतिवह्नित्वेनभ्रमज्ञानं
भ्रमत्वमित्यप्रामाण्यंमनसैवपरिच्छिद्यतेमानांतरेणवेतिसर्वजनसिद्धं॥एवंचवह्न्यप्रमायांवह्नित्वाभाववतिवह्नित्वप्र
कारतादिसमर्थप्रवृत्तिजनकत्वाभावः[…]प्रामाण्यव्यापकहेत्वभावाभावरूपात्‌हेतोरप्रामाण्याभावरूपंसा
ध्यंसिध्यतिव्यापकतयाहेत्वभावोगृहीतस्तदभावेणहेतुनासाध्यतेयत्रत्वभावव्यापकताहेत्वभावस्यसाध्यतेतत्र
साध्यप्रसिद्धिरंगंतांविनातदज्ञानात्‌यत्रचभावव्यापकताहेत्वभावस्यतत्रनतदंगंतेनविनापिव्यतिरेकव्याप्तिग्रहात्‌अ
तएवेतरव्यापकताज्ञानाभावस्यग्रहेतेनैवज्ञातेनाप्रसिद्धएवान्योन्याभावःसिध्यतिविशेषणज्ञानंविनाकथंप्रामा
ण्यविशिष्टानुमितिरितिचेत्‌अयमेवकथंचित्‌ज्ञानेप्रामाण्यमित्यनुमित्यनंतरंतेनैवहेतुनातत्रैवप्रामाण्यविशिष्टानु
मितिःअप्रामाण्याभावविशेष्यकप्रतीत्यनंतरमभाववत्त्वमितिज्ञानवत्‌एवंचेदंवह्नित्वप्रकारकंज्ञानंतद्वतितदभाववतीतिसं

चिंता·प्रत्य॰ श्रयोन्तरं·तदभावेति·तत्प्रकारकव्यतिरेकः॥सिध्यन्‌ तद्वतितत्प्रकारकत्वमादाय सिद्धिरिति·तृतीया प्रकाराभावेनतेनवि
१० नसाध्यस्योपसंहर्तुमशक्यत्वात्‌·ज्ञाने नित्यत्ववत्‌·यद्वेदं वह्नित्वप्रकारकज्ञानं वह्नित्ववद्विषयकं वह्नित्वाभाववद्वि
षयकत्वेसति सविषयकत्वात्‌·यन्नैवंतन्नैवं यथा सुखमप्रमेति व्यतिरेकेण शक्यसिद्धिरिति·अतिरिक्तविषयतापक्षे·अयंव
ह्नित्वेनानुभवोः वह्निवृत्तिवह्नित्वप्रकारकविषयताकोनवह्नित्वासमानाधिकरणवह्नित्वप्रकारकविषयताकोनविष
यताश्रयावृत्तिप्रकारकोनेति साध्यं·वृत्तिरिति वह्नित्वप्रकारकविषयताकत्वविषयताश्रयवृत्तिप्रकारकत्व·वाप्यतिरिक्ता ध्य
तिनप्रपञ्चसाध्याप्रसिद्धेः॥वह्नित्वन्नमविषयताश्रयोनवह्निः विषयतायाः॥विशेष्यवृत्तित्वात्‌·इतिनत्रमतेनसिद्ध
साधनं·अन्येतु वह्नित्वभ्रमेप्यावह्निविशेषणवृत्ति विषयताविशेष्यवृत्तिविषयताया·अभिन्नेति नसा वह्नित्वासमानाधि
करणधर्मानवह्निन्नेति·नसिद्धसाधनमिति·नचमणिज्ञानस्यप्रामाण्यानुमानेमणिप्रभायांमणिभ्रमेणप्रवृत्तस्यम
णिप्राप्तौ·मणिगोचरप्रयत्नजनकनिश्चयत्वमनैकान्तिकमितिवाच्यं·मणिप्रभाविषयकज्ञानेनभिन्नविषयतयामणि रा·म·१
गोचरप्रयत्नानुत्पादात्‌·मणिप्राप्तस्तुनांतरीयकत्वात्‌·ज्ञानप्रयत्नयोरसमानकालत्वेपि अनुभवस्मरणयोरिवमनसा १०
कार्यकारणभावग्रहइति·नासिद्धिः॥अभावसाध्यकेच·निर्विकल्पकस्यप्रपञ्चस्यपक्षत्वेनानिश्चयात्‌·नासाधारण्यंतपाचा
यं·पृथिवीत्यनुभवः॥पृथिवीत्वाभाववतिपृथिवीत्वप्रकारकारकोनाः पृथिवीवृत्तिप्रकारकोनपृथिवीत्वप्रकारत्वेपृथिव्य
विशेष्यकोनविशेष्यावृत्तिप्रकारकोनपृथिवीत्वव्यधिकरणप्रकारावच्छिन्नपृथिव्यवृत्तिप्रकारकोनगंधवद्विशेष्यक

पृथिवीत्वप्रकारकनिश्चयत्वादितिव्यतिरेकी पृथिवीत्वभ्रमः॥पृथिवीत्वाभाववतिपृथिवीत्वप्रकारइति·नतत्रभ्रमत्वेनसिद्धसा
धनंनवागंधवद्विशेष्यकइतिनव्यभिचारः॥पृथिवीत्वप्रकारकत्वादिकमप्रसिद्धमिति·अतिरिक्तविषयतापक्षे·अयंपृथिवी
त्वेनानुभवोनापृथिवीवृत्तिपृथिवीत्वप्रकारकविषयताकः पृथिव्यवृत्तिपृथिवीत्वप्रकारकविषयताकोनपृथिवीत्वासमाना
धिकरणपृथिवीत्वप्रकारकविषयताकोनविषयताश्रयावृत्तिप्रकारकारकोनवेति साध्यं·पृथिवीवृत्तिपृथिवीत्वप्रकारक
विषयताकत्वादिकमप्रसिद्धमिति·अन्येतुपृथिवीत्वासमानाधिकरणप्रकारावच्छिन्नविषयताकत्वाभावः साध्यः॥गंधासमा
नाधिकरणप्रकारकगंधसमानाधिकरणप्रकारकविषयताप्रतियोगिज्ञानत्वात्‌·तेनसंशयव्यवच्छेदः॥निश्चयत्वंवाविवक्षि
तमित्याहुः॥भ्रान्तापृथिवीत्यनुभवः॥पृथिव्यंशेप्रमैव·प्रमाभ्रमरूपैकसमूहालंबनेनव्यभिचारः॥अंशेतस्यापिप्रमात्वात्‌·
विशेष्यभेदेनविषयताभेदाच्च·नचप्रकारभेदेनविषयताभेदोमानाभावात्‌·यत्वियंपृथिवीत्यनुभवः॥पृथिवीत्वसमानाधिक
रणधर्मप्रकारकपृथिवीविशेष्यकविषयताकः॥पृथिवीत्वव्यधिकरणधर्मानवच्छिन्नपृथिवीविशेष्यकविषयताकःपृथिव्य
वृत्तिधर्मानवच्छिन्नपृथिवीवृत्तिविषयताकोवागंधासमानाधिकरणधर्मप्रकारकविषयताप्रतियोगिज्ञानत्वात्‌·अगंधवद्वृ
त्तिपृथिवीत्वप्रकारकविषयताकत्वात्‌·गंधसमानाधिकरणविषयताप्रतियोगिज्ञानत्वादेति·तन्न·साध्याप्रसिद्धेः·किंत्वर्थात्‌·
देतत्सिद्ध्यतीति·एवंपक्षप्रकारव्याप्यत्वेपायंधस्नेहदाहसमर्थप्रवृत्तिजनकत्वकरवरणादिकमवगंतं·नन्वत्रतद्वतितत्प्रकारक
ज्ञानत्वमेवप्रामाण्यंलिंगंनतु वह्निज्ञानस्यदाहसमर्थविषयत्वं·नदाहसमर्थोपमिति·व्यवसायगम्यं·ज्ञानविषययोस्तदविषय

चिंता·मू·१ त्वात् नापि तदनुव्यवसायगम्यं पुरोवर्तिनि दाहसामर्थ्यस्य तदगोचरत्वात् व्यवसायोपनीतदाहसामर्थ्यस्य भाने तदसा
११ मर्थ्यात् अन्यथा व्यवसायोपनीतस्य पुरोवर्तिनि वह्नित्वस्य अनुव्यवसायविषयत्वे स्वतः प्रामाण्यग्रहापत्तेः। पृथिवी जलज्ञा
नयोर्गंधस्नेहवद्विषयत्वग्रहोप्यनुपपन्न इति उच्यते वह्नित्वप्रकारकानुव्यवसाये सति तत्र विषये दाहसमर्थत्वज्ञानानंतरं स्मृ
त्युपनीत वह्निव्यवसायस्मृत्युपनीत दाहसमर्थविषयत्वं एवं पृथिवी जलज्ञानयोः स्मृत्युपनीत गंधस्नेहवद्विषयकत्वमपि
मेन सा परिच्छिद्यते गंधादिमत्त्वेन मम पृथिवीत्वाद्यनुभव इति तत्र गंधादिमत्त्वपरिच्छेदानंतरमनुभवात् स्मृत्युपनीते धूमा
दौ यथाग्नेः परिच्छेदवत् चक्षुषा वह्ने नैसौरभज्ञानवत्र तर्हि पृथिवीत्वज्ञाने गंधवद्विषयकत्वं चक्षुषा गंधवत्पृथिवीत्वोपनय
ज्ञानानंतरमियं पृथिवीति पृथिवीत्वप्रकारकानुभव उपनीति पृथिवीत्ववति पृथिवीत्वप्रकारकत्वं तथा तत्र वज्ज्ञाने घटत्वप्र
कारकताविरहवत् पृथिव्यवृत्तिप्रकारकाभाववत्त्वं विशेष्यावृत्तिप्रकारकत्वाभाववत्त्वं वा प्रामाण्यं मनसैव परिच्छिद्यतामिति
स्वतएव प्रामाण्यग्रह इति चेन्न ज्ञानांतरोपस्थापितज्ञानवृत्तिप्रामाण्यग्रहेण परतस्त्वानपायात् यावत्ज्ञानग्राहकग्रा
ह्यत्वं यावत्स्वाश्रयग्राह्यत्वं तत्ज्ञानविषयकजन्यत्वा नाजन्यजन्यत्वान विषयत्वं वा स्वतस्त्वं तदन्यग्राह्यत्वं परतस्त्वं रा म·
मेन सा चैवं प्रामाण्यग्रहस्य तत्ज्ञानविषयकजन्यज्ञानजन्यत्वात् न परतस्त्वहानिः व्यतिरेकानंतरं तज्ज्ञातीयेनान्वयिना प्रा ११
माण्यानुमानं यथेदं शरीरज्ञानं प्रमा करचरणवति शरीरज्ञानत्वात् स्वशरीरज्ञानवत् न च करचरणांतरवति करचरण
ज्ञाने व्यभिचारः शरीरांशे तस्य प्रमात्वात् एतेन करचरणवति शरीरज्ञानत्वादित्यत्र करचरणवत्त्वेनोपलक्षणं व्याख्योपलक्षा

भावात् न च विषयतया ज्ञानविशेषणं करचरणवत्त्वप्रकारकशरीरज्ञानस्य व्यभिचारात् शरीरमिति ज्ञाने तदसिद्धेश्च वि
षयविशेषणत्वे करचरणवद्विषयकशरीरज्ञानत्वस्य व्यभिचारात् शरीरभ्रमस्यापि वस्तुतः करादिमद्विषयकत्वात् ना
पि करचरणशून्ये यच्छरीरत्वेन ज्ञानं तदन्यत्वे सतीति विवक्षितं शून्य इत्यत्र विषयकत्वं सप्तम्यर्थः करचरणशून्यविषयक
शरीरत्वशरीरज्ञानत्वादित्यर्थः तथा चासिद्धिः शरीरज्ञानस्य तच्छून्यशरीरत्वादिविषयत्वादिनियमात् न च करचरणशून्ये
शरीरत्वेन ज्ञानं यन्न भवतीति विवक्षितं तृतीयार्थस्य विषयत्वेन उक्तदोषात् अन्यस्य भावादिति निरस्तं करचरणवद्विशे
ष्यकशरीरत्वप्रकारकज्ञानस्य हेतुत्वात् शरीरभ्रमेऽपि करचरणवतः शरीरस्य विशेष्यत्वात् विषयतापक्षे करचरणा
दिशून्यनिष्ठशरीरत्वप्रकारकविषयताप्रतियोगिशून्यत्वे सति शरीरज्ञानत्वादिति हेतुः अननुगृहीतप्रामाण्यं ज्ञानं
परप्रामाण्यनिश्चयरूपं अनवस्थानात् नापि ज्ञायमानप्रामाण्यं स्वतः प्रामाण्यग्रहापत्तेः व्यवसायगृहीतप्रामाण्यमेव ज्ञा
नं परप्रामाण्यनिश्चयरूपमास्थेयं तथा च व्यवसायोपगृहीतप्रामाण्यमेव स्वविषयं निश्चाययतु किं विषयनिश्चाया
र्थं तत्प्रामाण्यग्रहेण अव्यवसायस्याप्रामाण्यदर्शनात् नन्वभ्यासादर्थनिश्चयः तर्हि प्रामाण्यानुमितेरप्यप्रामाण्यदर्श
नात् न मनसोपि प्रामाण्यनिश्चय इति चेन्न न क्रमो ज्ञानप्रामाण्यनिश्चयादेवार्थनिश्चय इति किंतु यत्र प्रामाण्यशंका नास्ति
करगतामलकादिज्ञानेन व्यवसायादेवार्थनिश्चय इति तत एव निःकंपप्रवृत्तिः यत्रानभ्यासदशायां प्रामाण्यसंशयेनार्थ
निश्चयं परिभूयार्थसंदेहः तत्र प्रामाण्यनिश्चयाधीनज्ञानादर्थं निश्चित्य निष्कंपं प्रवर्तते नान्यथेति सर्वानुभवसिद्धं अत

चिंता·म·१ एवागृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यं निश्चाययति। अप्रामाण्यशंकाकलंकाभावात्। यत्र तु प्रामाण्यज्ञाने ऽप्रामाण्यशं-
१२ कया प्रामाण्यसंशयस्तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः। एवं यावदप्रामाण्यशंकं। तज्ज्ञानप्रामाण्य-
निश्चयादेव तन्निश्चयः। न चैवमनवस्था। चरमप्रामाण्यज्ञानस्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयांतरसंचारेण वा
प्रामाण्यसंशयानावश्यंभावात्। अन्यथा भट्टपक्षे प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वे ऽनवस्था स्यात्। गुरुमतेपि प्रामाण्यस्य
स्वग्राह्यत्वे न स्वग्राह्यत्वं स्वरूपप्रामाण्यबहिर्भूतत्वात्। किंतु परग्राह्यत्वे ऽनवस्थानात्। परिशेषानुमानेन प्रमाणांतरेण वा
ग्राह्यं। तेषामेव तत्प्रामाण्यस्यापि स्वग्राह्यत्वे मन्येनेत्यनवस्थैव। यत्तु व्यवसायस्य प्रामाण्यनिश्चयादेव प्रवृत्तिर्न तस्या
पि प्रामाण्यानुसरणमिति मिति। न च प्रामाण्यसंशयादौ विषया वर्जितो विषयसंशय इति वाच्यम्। निश्चिते संशयाभावात्।
अन्यथा स्वतोग्रहेपि तत्संशये ऽनवस्थेति तत्तुल्यं। यदि हि प्रामाण्यसंशयेन विषयेन संशयो निश्चितत्वात्। तदा विषय-
निश्चयार्थं प्रामाण्यनिश्चयो वाच्यः। आद्यमिकविषयनिश्चयादेव निष्कंपप्रवृत्त्युपपत्तेः। नहि विषयसंशयमनोदृत्य प्रामाण्य-
निश्चयः प्रवृत्तिहेतुरित्युक्तं। अन्यसंशयादन्यत्र निश्चितकथं संशय इति चेत्। अनुभवं पृच्छ। न स्वसाक्षिकमेव प्रामाण्य- राम·
संशयस्य विषयसंशयहेतुत्वमनुमतं च। ज्ञानविषयत्वमपि प्रामाण्यसंशयमासाद्य विषयसंशायकं। ननु लिंगपक्षबा- १२
ध्यादिज्ञानानां प्रामाण्यानवधारणे हेत्वाद्यसिद्धिरवधारणे चानवस्था। अपि लिंगादिज्ञानं स्वविषयावधारणे कर्तव्ये स्वप्रा-
माण्यज्ञानं नापेक्षते अनुमानमात्रोच्छेदप्रसंगात्। लिंगादिनिश्चयस्य स्वकारणाधीनस्य सर्वजनसिद्धत्वादिति चेन्न। प्रामा-

ण्यसंशये लिंगस्य संदिग्धत्वात्। न हि न लिंगज्ञाने प्रामाण्यसंशयो ऽनुभवविरोधादिति चेत्। उच्यते। अप्रामाण्यशंकाकलंका-
भावेन लिंगादिज्ञानस्य स्वार्थनिश्चायकत्वात्। तत्कलंके तु केव गतिः। यत्र तु व्यवसाये क्वचिदप्रामाण्यशंकानुवृत्तिः क्वचिन्ने-
ति तत्त्वयापि वाच्यं। एवं बहुवित्तव्ययायाससाध्येपि स्वर्गसाधनं याग इत्यादिज्ञाने। न गृहीतप्रामाण्यप्रवर्तकं। प्रामाण्या-
नुमितिपूर्वमेव तस्य विनाशात्। किंतु तज्ज्ञानसमानविषयकमप्रामाण्यशंकास्पृष्टं ज्ञानांतरमेव। नन्वेवं बहुवित्तव्य-
यायाससाध्ये निष्कंपप्रवृत्तावनुपयोगिनि निःफलं प्रामाण्यज्ञानमिति किं तदुपायानुसरणेनेति चेन्न। स्वर्गसाधनं याग इ-
ति ज्ञानस्य प्रामाण्ये निश्चिते तत्समानविषयकज्ञानांतरे ऽप्रामाण्यशंका न भवतीति ज्ञानांतरमगृहीतप्रामाण्यमपि दृ-
ढं स्वार्थं निश्चयरूपं निःकंपप्रवृत्तिं जनयतीति अप्रामाण्यशंकाप्रतिबंधकतया निष्कंपप्रवृत्तावुपयुज्यते। प्रामाण्यज्ञानम-
पि न निःफलं। यत्त्वनुमानस्य निरस्तसमस्तविभ्रमाशंकस्य स्वत एव प्रामाण्यग्रह इत्युक्तं। तद्भवति वह्निज्ञानत्वमनु-
मितेः प्रामाण्यनियतमनुव्यवसायेनोपनीतमतो विशेषदर्शनात्। न तत्राप्रामाण्यशंकेति। प्रामाण्यनिश्चयादि वा प्रामा-
ण्यशंकाविरहादर्थं निश्चित्य निष्कंपव्यवहार इत्यभिप्रायकं। वस्तुतः परतःप्रामाण्यपक्षे प्रामाण्यग्रहानकचित्प्रवृत्तिक-
दृति एवमनुव्यवसायस्य प्रामाण्यनियतत्वात्। न तत्राप्रामाण्यशंका। न तु जानन्न जानामीति प्रत्येति। न वा घटज्ञाने सति
पटं न जानामीति। भ्रमेप्यनुव्यवसायेन रजतत्वादिकं व्यवसायप्रकारत्वेनोल्लिख्यते। तत्र तन्नैव। यत्र भ्रमासदृशापांऽशेपि
प्रचुरनिःकंपप्रवृत्तिदर्शनात्। प्रामाण्यं स्वत एव गृह्यते ऽन्यत्र परत इति तन्न। विशेष्यनिष्ठात्यंताभावप्रतियोगिप्रकारान-

॰प्रमात्वंयदि ज्ञानसामग्रीमात्रजन्यवृत्तिस्यात् अप्रमापि प्रमास्यादितिभावः॥ तेन व्यधिकरणत्वात् तर्कस्य॰४

वच्छिन्नत्वादिकं॰ प्रामाण्यंस्वतोग्रहीतुमशक्यमिति॰ परतएव गृह्यते॰ झटितिप्रवृत्तिस्तु करचरणादिमति॰ शरीरत्वानत्वादे
र्विशेषस्यअनुव्यवसायेन ग्रहाद् प्रामाण्यशंकाभावेन्याद्यव्यवसायादेव॰ प्रामाण्यज्ञानं न प्रवर्तकमित्युक्तं॰ झटितितत्क
मवधानंस्वकारणाधीनंतदुक्तं नहिपिपासुर्नां॰ झटितिप्रचुरतरासमर्थाद्यप्रवृत्तिरंभसीतिपिपासोपशमनशक्तिर
प्रत्यक्षेति॰ उत्पद्यतेनचप्रमापरतो॰ नस्वतोज्ञानसामग्रीमात्रात्॰ तज्जन्यत्वेनाप्रमापि प्रमास्यात्॰ अन्यथाज्ञानमपि
नस्यात्॰ ज्ञानसामग्र्यांदोषानुप्रवेशादप्रमेतिचेन्नत्वप्रमापिज्ञानविशेषवत्॰ प्रमाविशेषःस्यात्॰ ज्ञानसामग्रीजन्यत्वा
त्॰ तस्मात्प्रमाप्रमयोर्वैचित्र्यात् गुणदोषजन्यत्वं॰ अपयन्नगुणदोषौविनातयोरभावः नचज्ञानसामग्र्येवनास्तित
त्त्वेज्ञानमात्रोत्पत्तिप्रसंगादितिचेन्न॰ विशेषंविनाकृतसामान्यकार्याभावात्तत्सामग्रीमादायैवहिसामान्यसामग्री
तांविनानास्त्येव॰ अन्यथाकार्यविशेषात्॰ तत्कारणविशेषोत्वेदंननुयये कजातीयसामग्रीसत्वेघटयोर्भेदोयमज
योर्वैधर्म्यंच॰ तथाप्रमाप्रमयोर्भेदोवैरूप्यंचभवति॰ अथानुगतव्यवहारात्प्रमात्वमनुगतमिति॰ प्रमामात्रेनुगतो
हेतुर्वाच्यः॥ अनुगतकार्यस्यानुगताद्नुत्पत्तेरितिचेन्नप्रमात्वस्योपाधित्वेनकार्यतावच्छेदकत्वेमानाभावात्॰ का
र्यमात्रवृत्तित्वस्यनीलघटत्वेघटज्ञानत्वादौव्यभिचारात्॰ प्रमाज्ञानहेत्वतिरिक्तहेत्वधीनांजन्यज्ञानत्वात्॰ अप्रमाव
त् इतिचेन्न॰ प्रमयाज्ञानत्वेनतद्धेतुजन्यतयासाध्यबाधात्॰ ज्ञानाजनकजन्यत्वेविरोधात्॰ अप्रमायांतदसिद्धेर्व्यर्थ
विशेषणत्वात्॰ व्यावर्त्याप्रसिद्धेश्च किंच॰ यत्किंचित्ज्ञानहेत्वपेक्षयासर्वज्ञानहेत्वपेक्षयावातिरिक्तत्वेइंद्रियादिभिःसि

द्धसाधनत्वात्॰ नापिज्ञानसामग्र्यतिरिक्तसामग्रीजन्येतिसाध्यंपूर्ववत्सिद्धसाधनात्॰ विरोधाच्च॰ नचसामान्यविशेषयोः
सामग्रीद्वयंप्रमायांज्ञानभिन्नत्वापत्तेः अन्यथासामग्रीभेदासिद्धेःतस्यकार्यभेदकल्प्यत्वात्॰ एतेनज्ञानसामान्यहेत्व
तिरिक्तहेतुजन्येतिसाध्यंप्रत्युक्तं सकलज्ञानाभिप्रायेण इंद्रियादिभिःसिद्धसाधनात्॰ विरोधात्ज्ञानाभिप्रायेण॰ हेत्वसि
द्धिः॥ नापिज्ञानत्वावच्छिन्नकार्यतान्यकार्यत्वप्रतियोगिककारणजन्येतिसाध्यंज्ञानत्वस्यनित्यवृत्तितयाकार्यतानवच्छे
दकत्वात्॰ अपयद्धर्मान्वयस्यामतःसत्वंहेत्वधीनंतत्कार्यतावच्छेदकंज्ञानत्वंचतथानवास्मत् इत्याधिकंयोमादिसाधार
णसत्वमात्रस्यहेत्वनियम्यत्वादितिचेन्न॰ यद्यालिंगितस्यस्वरूपं॰ हेत्वधीनंतत्कार्यतावच्छेदकंज्ञानत्वात्॰ ज्ञानत्वंचन
तथाअनित्यज्ञानत्वेतिकरणेइंद्रियादिभिःर्यथापयंसिद्धसाधनंतेषांप्रत्येकंज्ञानमात्रहेतुत्वात्॰ एतेनप्रमात्वंज्ञा
नत्वावच्छिन्नकार्यत्वनिरूपितकारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकं॰ ज्ञानत्वसाक्षात्व्याप्यधर्मत्वा
द्प्रमात्ववदितिनिरस्तं॰ प्रमात्वस्यनित्यवृत्तित्वात्॰ अनित्यप्रमात्वंतथाकार्यमात्रवृत्तिधर्मत्वादित्यपिनीलघटत्वादि
नाव्यभिचारि॰ अनित्यप्रमाप्रमाप्रमोभयहेतुजन्याजन्यत्वाद्प्रमावदितिचेन्न॰ दोषस्यापिनादेः स्वविषयप्रमाहेतु
त्वेनाप्रमायासाध्याप्रसिद्धेः॥ घटदृष्टांततेनयैवव्यभिचारात्॰ शंखादौपीतशंखज्ञानस्यापिप्रमात्वात्॰ कारण
व्यक्तिभेदजन्यत्वेनसिद्धसाधनाच्च॰ अपप्रमाअप्रमाव्यावर्त्तकधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणजन्याअप्र
माविजातीयकार्यत्वात्॰ घटवत्॰ यदिप्रमाअप्रमात्वासमानाधिकरणरूपनिरूपितकार्यत्वप्रतियोगिककारणजन्या

चिंता॰मू॰ १५

नस्यात्‌ अप्रमास्यादिति चेन्न अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वं संयोगस्य तत्प्रतियोगिककारणत्वमिंद्रियादीनां
तज्जन्यत्वेन सिद्धसाधनात्‌ अप्रमासाधारणकारणव्यक्तिजन्यत्वं वा प्रमातादात्म्यप्रयोजकमिति न कोप्यप्रयोजकः
अथानित्यप्रमा प्रमान्तरप्रतिबंधकजन्या प्रमा प्रमान्यतरत्वात्‌ अप्रमावत्‌ चाक्षुषप्रमा चाक्षुषभ्रमाजनक
जन्या अनित्यप्रमात्वात्‌ रासनप्रमावदिति चेन्न प्रमाजनकासाधारणव्यक्तिभेदस्य प्रमाप्रतिबंधकत्वेन चाक्षुषभ्रमाज
नकत्वेन सिद्धसाधनात्‌ एतेन प्रमा स्वविरोध्यनुभवप्रतिबंधकजन्या अनित्यानुभवत्वात्‌ अप्रमावत्‌ दूरस्थ पुरुषस्था
णुतया ज्ञाने सन्निधौ च भूयोवयवेंद्रियसन्निकर्षस्य विरोधिस्थाण्वनुभवप्रतिबंधकत्वं पुरुषत्वज्ञानत्वे कद्रूपं अप्रमा
यां च पित्तादेर्लिंगादि भ्रमस्य च तथात्वमिति निरस्तं प्रमाजनकव्यक्तिविशेषस्य प्रमाप्रतिबंधकत्वं प्रमाजनकत्वं चास्ती
ति सिद्धसाधनात्‌ प्रमायां नातिरिक्तगुणसिद्धिः किंच तत्पक्षे प्रमादावनुगतस्यार्थांतरस्य गुणस्याभावः इंद्रियसन्निक
र्षादीनां चाननुगमः न च जात्यैव गुणदोषौ प्रमाजनकत्वं गुणत्वं भ्रमजनकत्वं च दोषत्वमतिप्रसक्तेः तन्मात्रजनकत्वं चासि
द्धमिति उच्यते एवमप्रमापि स्वत एव स्यान्न परतः प्रमा वृत्त्यसाधारणकारणादेव तदुत्पत्तौ दोषस्य तत्राहेतुत्वात्‌ अथ ज्ञानसा
मग्रीसत्वेपि विशेषादर्शनपित्तादेरनुविधानादप्रमायां दोषो हेतुरिति चेन्न विशेषदर्शने पित्ताद्यभावादित्वेन तत्रैव विषये प्र
मातद्भावान्नेति प्रमायामप्यागंतुककारणापेक्षते कथं न परतस्त्वं अपि च नियमगर्भकार्यकारणभावो नियमश्च नव्यतिरे
रेव व्यभिचारादतिप्रसंगात्‌ [illegible] नियमनिरूपकमनुगतमास्थेयं एवं चाप्रमायामिव प्रमायामपि तथा वृत्तं कारणम

राम॰ १५

नुगतमावश्यकं किंच यत्कार्यं यत्कार्यविजातीयं तत्तत्कारणविजातीयकारणजन्यं यथा घटविजातीयः पटः अन्यथा कार्य
वैचित्र्यस्याकस्मिकतापत्तेः घटज्ञानजातीयमपि कार्यं नहि जातीयकार्यकारणविजातीयघटेंद्रियसन्निकर्षादिजन्यमिति
न व्यभिचारः एवं अनित्यप्रमा अप्रमाकरणविजातीयकारणजन्या अप्रमाविजातीयकार्यत्वात्‌ घटवत्‌ एवं चानुगतस्य प्रमा
हेतुत्वे प्रमा स्वविरोध्यनुभवप्रतिबंधकजातीयजन्या जन्यानुभवत्वात्‌ अप्रमावदित्यादावपि न सिद्धसाधनं अपि च अनित्य
प्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात्‌ अप्रमात्ववत्‌ नीजघटत्वं तु विशिष्टं न कार्यतावच्छेदकं प्रत्येकं
नुगतप्रयोजकद्वयादेव विशिष्टसिद्धेर्वैयर्थ्यं समाजः घटज्ञानत्वादेरतु बाधकं अस्तु वा तत्रापि अनुगतभोजका दृष्टहेतुकत्वं
अन्यथा कार्यमात्रेनादृष्टं हेतुः स्यात्‌ एवमनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिकारणताभिन्नकारण
ताप्रतियोगिककार्यतावच्छेदकं अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात्‌ अप्रमात्ववदिति अनित्यप्रमायामप्र
व्यावृत्तानुगतहेतुसिद्धिः अन्यथानुगतकार्यानुत्पत्तेः तथा नित्यप्रमात्वं अप्रमाकरणतावच्छेदकरूपानवच्छिन्नकारणता
प्रतियोगिककार्यतावच्छेदकं भ्रमावृत्तिकार्यतावच्छेदकत्वात्‌ घटत्ववत्‌ चाक्षुषप्रमात्वं चाक्षुषाप्रमाकरणतावच्छेदकरूपान
च्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं चाक्षुषभ्रमावृत्तिकार्यतावच्छेदकत्वात्‌ घटत्ववत्‌ अनित्यरजतप्रमात्वं र
जताप्रमाकरणतावच्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं रजतभ्रमावृत्तिकार्यतावच्छेदकत्वात्‌
घटत्ववत्‌ अन्यथा नियामकं विना चाक्षुषादिरजतज्ञानं किंचिद्रजतत्वप्रकारकं किंचिद्रजतत्वप्रकारकमिति न

चिंता॰मू॰ १५

प्रमोनस्यात् ज्ञानसामग्र्यास्तुल्यत्वात् यत्तु प्रमायाः असाधारणकारणजन्यत्वे साध्ये प्रमान्यत्वमुपाधिः न च पक्षेतरत्व
तत्वेश्वरज्ञानस्येमन्तत्वपक्षस्यव्यावर्तकत्वात् उभयसिद्धव्यावर्तकत्वं तेनतुल्याव्यावर्त्यस्योभयसिद्धि गौरवात् व्यतिरेक
स्यासाधारणत्वे च पक्षेतरस्यानुपाधित्वे बीजं तच्च तत्र नास्ति भगवत्ज्ञानस्य तन्मते सपक्षत्वादिति तन्न विपक्षबाधकेनदे
तोः साध्यव्याप्यतया उपाधेः साध्यव्यापकत्वात् नन्वस्तु प्रमायां दोषाभावो हेतुः आगंतुकभावानपेक्षज्ञानसामग्रीज
न्यत्वमेव स्वतस्त्वं प्रागभावो न कारणं किंतु दंडत्वादिवत् कारणतावच्छेदकत्वेन सामग्रीभेदोपजनक इति तन्न जपा
कुसुमादिसन्निधाने मतिनप्रमा तदपगमे स्फटिकादौ प्रमोत्पत्तेः दन्नन्यथासिद्धत्वेन हेतुत्वादिति चेन्न भूयोवयवेंद्रि
यसन्निकर्षविशेषदर्शनसमवधाने प्रमा तदभावे त्वप्रमेति प्रमायां गुणः प्रमायां तदभावो हेतुरित्येव किं न स्यात्
ञ्पासदर्थविषयत्वं सदर्थविषयहेत्वभावेन प्रयोजकः ज्ञानेसदर्थविषयत्वनियमेन तदसंभवात् सदर्थविषय
त्वे असदर्थविषयकारणाभावो हेतुः संभवति प्रमायाः सदर्थमात्रविषयत्वात् अप्रमायाश्च असदर्थमात्रविषयत्वा
भावादिति चेत् तर्हि प्रमायाः असदर्थविषयत्वं न स्यात् हेत्वभावात् सदर्थमात्रविषयत्वे असदर्थविषयत्वे हेत्वभावो हे रामः १ १५
तुरिति चेत्तर्हि तत्र गुण एव हेतुः तदभावस्तत्सदर्थविषयत्वे प्रयोजक इत्यस्तु ननु गुणाभावस्यासाधारणत्वात् तद्दे
वसत्वमसत्वं च न स्यात् गुणतदभावयोरेकत्रासत्वादिति चेन्न दोषाभावेपि तुल्यत्वात् क्वचित्कश्चिद्दोष इति तु गुणे
पि समानं गुणाभावादसन्मात्रविषयकमपि ज्ञानं स्यादिति चेत् दोषादपि असन्मात्रविषयकज्ञानापत्तेः सर्वत्र वि

षये दोषो न संभवतीति गुणाभावेपि तुल्यं अपि विशेषदर्शनादिगुणः तदभावश्चाननुगत इति नैतो प्रमाप्रमाहेतू किंतु
दोषतदभावाविति चेत् तर्हि पित्तादिदोषः तदभावश्चाननुगत इति तावपि न तत्र हेतू स्वप्रमायां तदभावस्य व्यभिचार
श्च अपि दोषत्वं नैकं न हि तत्तु भ्रमहेतुत्वं तत्तदात्मादिगतत्वादननुगमाच्च नापि भ्रममात्रहेतुत्वं पित्तादावननुगत
त्वेन तदभावादसंभवाच्च नापि प्रमाहेत्वभावप्रतियोगित्वं अन्योन्याश्रयात् पित्तादेः स्वप्रमाहेतुत्वाच्च नापि स्वप्रमाभि
न्नप्रमाप्रतिबंधकत्वं एवं हि प्रत्यक्षप्रतिबंधकस्य सल्लिंगपरामर्शस्य दोषत्वादनुमितिः प्रमा न स्यात् भ्रमश्चास्यात् तस्मा
त्क्वचित्कश्चिद्दोष इति चेत्तर्हि गुणेपि तुल्यं स्यादेतत् प्रमां भ्रमं वा कुर्वति ज्ञानहेतुत्वे मंडूकवसांजनदोषात् वंशो
रगभ्रमः तदभावे वंशप्रमेति तत्र दोषाभावः प्रमाहेतुरित्यन्यत्रापि तथा कृप्तत्वात् मंडूकवसानयन एव दोषो न त्व
चीति तत्र दोषाभावात्तत्त्वावंशप्रमेव गौरोहमित्यभेदभ्रमहेतुसंस्कारेपि मम शरीरे गौरमीति प्रमेति चेत् न विशेषा
दर्शनस्य तत्र दोषत्वं न तु संस्कारस्येति तन्मते तन्सिद्धेः न च दूरे चक्षुः सन्निकर्षेपि केशादौ सजातीयसंयोगे प्रमा तदभा
वेनेति तत्र संयोगरूपो गुणः प्रमाहेतुरित्यन्यत्रापि गुणजन्यत्वेति वाच्यं ताबद्देशावच्छिन्ने केशसाक्षात्कारे स हेतुः तेन विना
तदभावात् न चापि तावद्दूरे प्रमायां स हेतुः सन्निकृष्टे केशप्रमायास्तेन विनापि भावात् तत्रापि वा दोषाभाव एव कल्प्ये
दोषजन्यत्वे प्रमात्वापातात् ननु विशेषदर्शनं प्रमाहेतुः विशेषादर्शनस्य दोषत्वेन तदभावस्य हेतुत्वादिति चेत्तर्हि
दोषाभावत्वेन स हेतुर्न गुणत्वेन भावत्वेन वा किंच दर्शने न प्रतिबंधकाः पित्तादयो दोषाश्च आवश्यकत्वात् न विशेषदर्श

विशेष१ पा

चिंता०मू०१
१६

नं न च तेषां नानात्वेन विशेषदर्शनप्रतिबंधकतया ऽननुगमेन लाघवात् । विशेषादर्शनं हेतुरेवेति वाच्यं । क्वचित्कश्चिद्दो
षस्यानुगमात् अन्यथापि पित्तादितोप्यप्रमा न स्यात् । अननुगमात् मण्यादेरिवाननुमेयप्यदोषत्वाच्च । तदभावकूटस्य हे
तुत्वात् । सर्वत्र विशेषादर्शनमेव हेतुः । पित्तादेरननुगमेन तत्रोपक्षयादिति चेन्न । पित्ताद्युत्कर्षेणाऽभ्रमोत्कर्षात् । पित्तादेरदो
षत्वे विशेषभ्रमेव कुतो न भवति विशेषस्य । विशेषांतरादर्शनादिति यदि तदानवस्था । किंच विशेषदर्शनं न प्रमामात्रे न
वा प्रत्यक्षप्रमायां हेतुः । तत्रैव व्यभिचारात् । तत्रैव तद्धेतुत्वे अनवस्थानाच्च । अथ प्रत्यक्षे इंद्रियसन्निकर्षो गुणः । अप्रमांशे
तद्धर्मस्यासत्वेन सन्निकर्षाभावात् दोषो हेतुः । न च प्रमांशेपि स एव हेतुरदोषत्वप्रसंगात् । प्रमांशस्याप्रमात्वप्रसंगाच्च ।
साक्षात्कारित्वे चेंद्रियसन्निकर्षजन्यत्वादिति चेन्न । ज्ञानविषयरूपस्यांशस्येंद्रियजन्यदोषजन्यत्वात् । अप्रमांशे चेंद्रियस
न्निकर्षाभावेन साक्षात्कारित्वं न स्यात् । दोषस्य तद्धेतुत्वेऽतिप्रसंगः । अननुगमश्चाप्रमायां भ्रमाऽप्रमारूपे च यथार्थ्यत्र
योजकमस्ति । अप्रमायां दोषवदिति चेन्न । दोषाभावस्यासंभवात् । उच्यते । प्रमामात्रे नानुगतो गुणः किं तु तत्तत्प्रमायां भूयो रामः
वयवेंद्रियसन्निकर्षयथार्थलिंगसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वं । अन्वयव्यतिरेकात् । तत्तदप्र द १६
मायां पित्तादिलिंगभ्रमादीनां दोषत्ववत् । प्रत्यक्षे विशेषदर्शनमपि गुणः तदनुविधानात् । ननु विशेषदर्शने हेतुरेव त
द्धेतुरस्तु । न व्यतिरेकादेव तदभावोपपत्तेः । अन्यथा विशेषदर्शनमेव कुतो न स्यात् । तत्रापि तदपेक्षायामनवस्थेति चेत् ।
एवं व्याप्यविषयकव्याप्यकप्रत्यक्षानियमे ऽनुमिताविव पुरुषप्रत्यक्षे प्रामाण्यसंशयो न स्यात् । करादिमति पुरुषज्ञान

तस्यानुव्यवसायेन निश्चयात् । न वापि विशेषदर्शनं विना कथं व्यापकप्रत्यक्षमिति चेन्न । संशयविपर्ययोत्तरप्रमायां त
स्य हेतुत्वात् । ममापि तद्धेतुस्तत्र हेतुरिति चेन्न । करचरणचिबुकादीनां प्रत्येकं विशेषत्वेन तद्धेतूनामननुगततया तादृश
प्रत्यक्षाहेतुत्वात् । तद्दर्शनेषु च व्याप्यदर्शनत्वमनुगतमस्ति । नन्वेवं संशयोत्तरं व्याप्यज्ञाने सत्यनुमितिः स्यान्न प्रत्यक्षमनु
मितिसामग्र्या बलवत्त्वादिति चेन्न । अन्यत्र तथात्वेप्यत्र प्रत्यक्षसामग्र्या बलवत्त्वात् । अत्र पुरुषं पश्यामीति अनुव्यवसाया
त् । अत एव विशेषदर्शनजन्यत्वेन ज्ञानं बाधकं । तदर्शनजन्यं बाध्यं । अन्यथा बाध्यबाधकव्यवस्था न स्यात् । न च प्रमाबा
धिका करभ्रमजन्यपुरुषज्ञानस्यापि स्थाणुज्ञानबाधकत्वात् । नापि विपरीतबोधकत्वेन बाधकत्वं बाध्यतुल्यत्वात् । अ
नन्यथासिद्धं बाधकमिति चेन्न । विशेषदर्शनजन्यतस्यैव तदर्थत्वात् । न च पीतः शंख इत्यत्र विशेषदर्शनेपि । श्वैत्यप्रमाने
ति न तद्धेतुः । यद्विशेषदर्शनं हि भ्रमविरोधि तदभावः प्रमाहेतुः । प्रत्यक्षभ्रमे च प्रत्यक्षविशेषदर्शनविरोधि दिग्मोहे
गौरेहमिति भ्रमे च तथादर्शनात् । तच्च दोषान्तरत्र नास्ति । अपि च लिंगसादृश्यवाक्यार्थभ्रमदोषाभावमात्राच्चानुमित्या
दिनिश्चितसत्यपरामर्शादि गुणसिद्धिः । एवं प्रमायां गुणजन्यत्वे वेदेपि यथार्थवाक्यार्थज्ञानगुणजन्यप्रमेति तदाप्तेश्व
रसिद्धिः । अथ प्रत्यक्षादौ वस्तु गुणजन्यत्वेपि हेतुभ्रमाद्यभावश्च तुल्यः प्रमाहेतुः लोके भ्रमाद्यभाव एव प्रमोत्पत्तिरिति
चेन्न । तत्र जातु वाक्यार्थज्ञानस्य हेतुत्वे न भ्रमाद्यभावानामन्यथासिद्धत्वात् । आप्तस्य भ्रमाद्यभावमात्रेण वाक्यार्थज्ञा
नं विना तादृशवाक्याभावाच्च । अन्यथा तत्रापि तत्र वक्तृज्ञानानुमानं न स्यात् तस्याहेतुत्वात् । अस्तु वोभयमपि हेतुरिति

चिंता·मू·९ गनकाभावात्·तथापिवेदेगुणसिद्धिः·नचनित्यनिर्दोषत्वात् इष्टादेववेदप्रामाण्योपपत्तौ·नापरिदृष्टनित्यत्वानादिसर्व
८७ ज्ञकल्पनागौरवादितिवाच्यंप्रमाणवतःफलमुखस्यगौरवस्यस्वर्गादिवादोषत्वात्·पूर्वंकारणताग्रहसमयेफलानु
पस्थित्यागौरवाज्ञानात्·लोकेनित्यत्वाभावाच्च·अप्यवेदेकर्तृस्मरणादबाधकात्·लोकेनिर्दोषत्वेनैवप्रमाहेतुत्वंवेद
तुनित्यत्वेनवक्तुरभावेपिनिर्दोषत्वमवधार्यतइतिचेन्न·बाधकस्यवक्तुर्ज्ञानिराकरिष्यमाणत्वात्·भ्रांतप्रतारकवाक्ये
घटोस्तीतिवक्तव्ये पटोस्तीति दोषजन्यवाक्येसंवादात्प्रामाण्येन दृष्टत्वाच्च·किंच देववदात्तसंपन्नचैत्यवंदनेत्यादिशु
कवाक्यादिवाक्यमप्येवंप्रमाणंस्यात् वक्तृदोषाभावात्·प्रमाणानपेक्षत्वेवेदतुल्यत्वात्·ननुतत्रापिभ्रांतप्रतारकशुका
दिवाक्यं·कथंप्रमाणंगुणजन्यत्वे·नचवक्तृतात्पर्याविषयत्वाच्च·तदप्रमाणंसंवादेनसाध्यबाधात्·यत्तुभ्रांतप्रतारक
वाक्येयोग्यतैवनास्तिवक्तृज्ञानवाक्यार्थबाधोहियोग्यताभावः अविषयश्च बाधितःइतितन्न घटवतिघटोनास्तीतिभिन्न
विषयतयाभ्रमस्याहेतुत्वात्किंचवाक्यार्थाबाधोयोग्यताज्ञापकात्·वाक्यार्थश्चतत्राबाधितएवनचशुकवाक्यादिवा
क्यादन्वयबोधएवनभवति·किंत्वेवमयंवदतीत्येवंप्रकारकप्रतीतिरितिवाच्यम्·आकांक्षादेरन्वयबोधसामग्र्याः राम·१
सत्वेनुभवापलापात्संवादेनयथार्थत्वानुभवाच्च·एवंधूमभ्रमाद्वह्निमत्येवव्यानुमितिर्नप्रमास्यात्यथार्थलिंगज्ञा ८७
नाजन्यत्वात्·ननुव्याप्त्यंतरमेवतत्रविषयःप्रत्यभिज्ञानात्·गोत्वादेकव्यक्तिकत्वदृष्टत्वाच्च·नापितत्रोपपन्नतादात्म्या
रोपःसंसर्गारोपात्·लिंगोपधानांशेभ्रमत्वेसाध्यांशेप्रमात्वादितिचेन्न·उच्यते·भ्रांतप्रकारकवाक्येशुकादिवाक्येच·

प्रमाणत्वात्तेनाप्रोक्तत्वात्·वेदवदीश्वरयथार्थवाक्यार्थज्ञानंजनकंतस्यकार्यमात्रकर्तृत्वात्·शुकादिवाक्येवेद
तुल्यतादोषोभाववादिनापिवाच्यानतेवंशब्दाभासोपि दृष्टांतस्यापीश्वरस्यकर्तृत्वादितिचेत्·तद्वाक्यार्थस्यासत्वेनभ्रम
वत्तज्ञानागोचरत्वात्एवंलिंगाभासजन्यप्रमायामपिवह्निव्याप्यवत्वज्ञानमीश्वरस्यैवजनकमितिसंप्रदायः·अत्रवयं
तुब्रूमः·शाब्दप्रमायांलोकेवक्तुर्यथार्थवाक्यार्थज्ञानंनगुणः·किंतुयोग्यतादिकं·यथार्थतज्ज्ञानंवाक्यप्रदत्वात्·आवश्य
कत्वाच्च·अतएवप्रमादविप्रलिप्साजन्यवाक्येविसंवादिनियथार्थयोग्यतादिज्ञानंनयथार्थवाक्यार्थस्यबाधितत्वात्·ए
वंकर्णपाटवादन्यस्मिन्नुक्तेन्याभिधानेविसंवादिनिसंवादिनितुप्रामाण्यमेवयोग्यताज्ञानमेववक्तृविशेषस्तीतिन
न्वेवंनानार्थादन्यपरादपि·तात्पर्यभ्रमेतद्विनेववाक्ययथार्थयोग्यताज्ञानेसति·संवादपरशाक्यज्ञानमपिप्रमेति
तत्रापितद्वाक्यंप्रमाणंस्यादितिचेन्न इष्टत्वात्·तात्पर्यविषयेचतद्वाक्यंनतदाप्रमाजनकमितिनप्रमाणं·एवंवेदेपियथा
र्थयोग्यताज्ञानमेवगुणइतिनवैदिकप्रमायागुणजन्यत्वेनेश्वरसिद्धिः·स्यादेतत्·शाब्देवक्तुर्यथार्थज्ञानमपिगुणः
लोकेप्रमाणशाब्दप्रतीतावदृष्टज्ञानस्यहेतुत्वात्·अतएवतत्रलोकेवक्तृज्ञानानुमानं·एवंचवेदेवाक्यार्थयथार्थज्ञा
नवत्स्वतंत्रपुरुषप्रणीतः·प्रमाणशब्दत्वात्·गामानयेतिवाक्यवदितीश्वरःसिध्यतीतिचेन्न·मैवंप्रमाणशब्दत्वंहिवा
क्यार्थज्ञानपूर्वकतांविनापिसंभवति·आवश्यकयोग्यतादिमत्वात्·यथार्थतत्ज्ञानादेवोपपादितं अतोनप्रयो
जकइतितथापिलोकेवाक्यार्थज्ञानंप्रमाणवाक्यकारणंगृहीतमिति·तेनविनापिकथंतदितिचेन्न·प्रवृत्त्यायथार्थप्र

चिंता॰मू॰१ योजकवाक्यार्थज्ञानमुद्दिश्य· तादृशपदेभ्यो वाक्यार्थज्ञानस्य प्रतीतिर्भवत्वा वाक्यप्रयोग इत्यन्यथासिद्धं· वक्तुर्वाक्या
१८ र्थज्ञानं ननु· तादृशपदावलीप्रयोगतस्य हेतुत्वं तादृशपदसमूहस्य प्रत्येकपदहेतोरेव तु कारि बहुपपत्तेः· अथ तत्ता
त्पर्यविषये वेदः प्रमाणं भवेत् तात्पर्यं च तत्प्रतीतीच्छयोच्चारणं· न चास्मदादेः वेदं विना तादृशवेदार्थगोचरं ज्ञा
नं येन तत्प्रतीतीच्छयोच्चारणं भवेत· न च वेदादेव तत् अन्योन्याश्रयात् अतः सकलवेदार्थदर्शिनाप्तेनास्य वेदस्य त
दर्थप्रतीतीच्छयोच्चारणं कृतं· स च प्रमाणमिति· तादृशो वेदगुणस्तज्जन्या वेदार्थप्रमा इति तदाश्रयस्वतंत्रपुरुषधौरे
यसिद्धिरिति चेत्· न मीमांसादिसकलांगसाहित्याद्वेदवाक्यार्थज्ञानवताध्यापकेन तदर्थप्रतीतीच्छया वेदस्योच्चा
रणमिति वेदार्थ· यथार्थविदस्तत्तदर्थे तात्पर्यमस्त्येव एवं पूर्वपूर्वतादृशाध्यापकेन तत्तदर्थप्रतीतीच्छयोच्चारितत्वं·
तत्परत्वमभ्युपगम्यातरोत्तरेषां वेदार्थप्रत्ययद्व्यनादितात्पर्यपरंपरेति· किमीश्वरेणेति तर्हि वेदार्थानभिज्ञाध्याप
केनाध्ययनवेदस्य न तत्तदर्थप्रतीतीच्छयोच्चारणमिति· तात्पर्याभावान्न प्रमाणं न वा ततोर्थप्रत्यय इति चेन्न· अनादौ
संसारे वेदस्य कश्चित्केनचिन्मीमांसाद्यधीनवेदार्थज्ञानवता· तत्प्रतीतीच्छयोच्चारणं कृतमेतावतैव तत्परत्वमि रामः
ति· व्याख्याकरास्तु प्रामाण्यं स्वत एव उत्पद्यते ज्ञायते चेति· तथाहि निःकंपप्रवृत्त्यंगस्मृत्यनुभवसाधारणं· यथार्थत्व १८
मेव प्रामाण्यं· तच्च ज्ञानमात्रसामग्रीजन्यं· न तु गुणं दोषाभावं वापेक्षते· सुवर्णज्ञानानां यथार्थत्वे न व्यभिचाराभावा
त्· अयथार्थस्तु व्यवहारस्तस्यैव बाध्यत्वात्· ज्ञानं तु न बाध्यते बाधकत्वाभिमतज्ञानतुल्यत्वात्· ज्ञानेवायथार्थत्व

पदेशो विपरीतव्यवहारजननेनोपाधिजनकः· अथ यथार्थत्वस्य प्रामाण्यत्वे रजतज्ञानं शुक्तौ कथमप्रमाणमप्रामाण्यं च
कथं परत उत्पद्यत इति चेत्· अयथार्थत्वं नाप्रामाण्यं· सर्वधीनां यथार्थत्वात्· किंतु विपरीतव्यवहारप्रवर्तकत्वं· तच्च ज्ञान
सामग्र्यामधिकदोषानुप्रवेशात्· दोषहेतुकासंसर्गाग्रहाद्वा उत्पन्ने ज्ञाने दोषसहकाराद्वा धर्मधर्मिणोरसंसर्गाग्रहरूपमेक
त्वासंसर्गाग्रहसहितं परत उत्पद्यते न तु ज्ञानमात्रसामग्रीतः· प्रमायामतिप्रसंगात् ज्ञायते च· विपरीतव्यवहारजनकत्वं बाधा
तं तस्य तेन तदनुव्यवसायेन वा ग्रहीतुमशक्यत्वात्· ज्ञानस्वरूपे च न दोषतदभावौ हेतू व्यभिचारात्· ज्ञानानां यथार्थत्वेपि यथा
र्थत्वं· ज्ञानसामग्रीमात्रजन्यमेव न तु गुणं दोषाभावं वा· विपर्ययादेरपि धर्म्यंशे यथार्थत्वात्· असदर्थविषयत्वाद्दोषात्तदं
द्रियाणामसन्निहितेऽसदर्थे सामर्थ्याभावात्· ननु दोषमात्रं न कारणं· किंतु तदपेक्षा ज्ञानसामग्रीति यथार्थत्वे दोषाभा
वसापेक्षा सा हेतुरिति चेन्न· सेव सामग्री असदर्थांशे दोषसापेक्षेति· तदंशे ज्ञानमयथार्थं सदंशे दोषनिरपेक्षेति तदंशे य
थार्थं· न तु सैव तत्रैव ज्ञाने दोषतदभावसापेक्षा विरोधात्· यथार्थत्वे दोषतदभावौ नान्तरीयकौ यथार्थत्वं च· ज्ञानाद्भिन्नवित
प्रकारवत्त्वमर्थस्य यद्धर्मवत्त्वमर्थस्य तत्प्रकारज्ञानत्वं वा इदं रजतमिति ज्ञानमर्थस्य रजतत्वं· स्वस्य रजतताश्रयविषयत्वं
यथार्थत्वरूपं प्रामाण्यं स्वप्रकाशत्वेन स्वयमेव परिच्छिद्यते· स्वार्थनिश्चयस्वरूपं तदतिरिक्तं च न प्रामाण्यं मानाभावात्·
स्वस्तु यातदपि स्वतो ज्ञायतां· परतो वा मा वा ज्ञायि किं तन्निरूपणेन प्रवृत्तावनुपयोगात्· अर्थं हि निश्चित्य प्रवर्तत इत्यास्तु प
कार्यनिश्चयादेव प्रवृत्तेरुपपत्तेः· अयथार्थनिश्चयादेव प्रवृत्तिरिति सत्यं किं त्वेवंरूपो यमर्थ इति निश्चयो ज्ञानप्रमाणनि

चिंता०मू० अथाधीन इति चेन्न· सर्वं हि ज्ञानं रजतरूपोयमर्थ इत्याकारस्तार्थनिश्चयरूपमेवोत्पद्यते· कानन्तरायेक्षाअतएवार्थ
१९ तथात्वं स्वयमेव परिछिद्यत इति स्वतः प्रामाण्यग्रहः· यदि तज्ज्ञानं न स्वार्थनिश्चयरूपं· तदा प्रामाण्यज्ञानमपि न· प्रामाण्य
निश्चयरूपं न वा तदधीनं· ज्ञानांतरमपि स्वार्थनिश्चयरूपमिति· व्यर्थमर्थनिश्चयार्थं· प्रामाण्यनिरूपणं प्रामाण्यज्ञा
नेपि· स्वविषयनिश्चयार्थमन्यापेक्षाया मनवस्था किंच परतःपक्षे गृहीतप्रामाण्यस्य परस्य प्रामाण्यनिश्चायकत्वेनव
स्थातो· यथा ज्ञानांतरमगृहीतप्रामाण्यमेव परप्रामाण्यनिश्चयरूपं यदा तु तत्प्रामाण्ये जिज्ञासा तदा तस्यापि प्रामाण्यं
अगृहीतप्रामाण्येनैव परेण निश्चीयते इति नानवस्था· तथा यथार्थज्ञानमप्यनिश्चितप्रामाण्यमेवार्थनिश्चयरूपमविशे
षात्· न हि ज्ञाने उत्पन्ने यः संशयः· किमेवमनेवं वेति· अयं ज्ञानमर्थनिश्चयरूपमपि स्वमग्रहं तत्कथं स्वप्रामाण्यं गृ
ह्णीयादिति चेन्न हि स्वप्रकाशेविवादोर्थस्य· तथाभूतरूपप्रामाण्यं स्वत एव गृह्यत इति तत्वाधनुमतं· अयं स्वतः प्रा
माण्यग्रहे न स्यात् रजतापन्नज्ञाने इदं प्रमाणं न वेति· संशयो न स्यात् निश्चिते तदभावात्· अत एव प्रमात्वशंकायामपि
किमेवमनेवं वेति संशयात् न ज्ञानमात्रात्· करतलादिज्ञाने दर्थनिश्चयेव्यभिचारादिति चेन्मैवं· न स्यात् ज्ञाने सत्यत्वा राम०
सत्यत्वसंदेहः सर्वज्ञानानां यथार्थत्वात्· किंतु अगृहीतभेदविषयं ज्ञानद्वयं एकं वा ज्ञानमित्याकारो ज्ञानं प्रमा न वेति १९
संशयस्य सर्वकारणदोषसंशयात्· स च ज्ञानांतरान्निवर्त्तते न त्वनुभूतित्वं प्रमात्वं· तत्र स्मृत्यन्यत्वं स्मृतित्वं च संस्कारा
साधारणकारणकत्वमिति तन्न स्वतो गृह्यते· संस्कारादेरग्रहात्· अत एव नेस्वत उत्पद्यते· स्मृतिसाधारणकारणत्वादिति चे

न्न· प्रत्युपपद्यि कं हि प्रामाण्यमयथार्थत्वं· तच्च स्वत एव गृह्यते उत्पद्यते च· न त्वनुभूतित्वं सहितं गौरवात्· तथापि प्रवृत्ति
संवादादिना प्रामाण्यं· यथार्थत्वमेवानुमीयते· न त्वनुभूतित्वं स्मृतिस्मृतौ व्यभिचारात्· स्मृत्यनुभवयोः प्रमाप्रमाव्यपदे
शस्तांत्रिकाणां सापेक्षत्वनिरपेक्षत्वनिबंधनः यथार्थोनुभवो मानमनपेक्षतये ष्यते इति तैरप्यभिधानात्· अत्र ब्रूमः
प्रामाण्यनिश्चयो निःकंपप्रवृत्तिहेतुः न च तत्संशय इत्यनुभवसिद्धं त्वदनुमतं च तत्र प्रामाण्यं नार्थतथात्वनिश्चयरूपं अ
नभ्यासदशापन्नस्य ज्ञानस्य स्वाप्रकाशेनानुव्यवसायेन वार्थतथात्वनिश्चयत्वग्रहेपि निःकंपप्रवृत्त्यभावात् प्रामाण्ये संश
याच्चधियां यथार्थत्वनियमेनार्थतथात्वनिश्चयत्वस्य स्वरूपतो विषयतश्चाग्रहीतभेदज्ञानद्वयरूपभ्रमसाधारणत्वात्·
तस्मान्न भ्रमसमानाकारादिदं रजतमिति ज्ञानान्निःकंपप्रवृत्तिः किंतु न घात्स्याकारात्· अयं तत्र न प्रामाण्ये संशयः तस्या
र्थतथात्वरूपस्यानिश्चयात् किंतु अगृहीतभेदज्ञानद्वयं विशिष्टज्ञानं वेति संशयः स एव निःकंपप्रवृत्तिप्रतिबंधकोपि·
अतस्तस्य ज्ञानांतरान्निवृत्तौ निःकंपप्रवृत्तिरिति चेन्न हि यद्व्यतिरेकस्य संशयो निश्चयश्च यत्र प्रतिबंधकस्तन्निश्चयस्त
द्धेतुरिति व्याप्तेः भ्रमव्यावृत्तस्य विशिष्टज्ञानस्य निःकंपप्रवृत्तिहेतुत्वं न तु अर्थतथात्वस्य भ्रमसाधारणत्वात्· तस्मिन्सत्यप्र
वृत्तेश्च तत्संशयाभावाद्धि तस्यार्थतथात्वनिश्चयस्य प्रवर्त्तकत्वे गौरवाच्च किंच प्रवृत्तिहेतुज्ञानं विघटयत एव ज्ञानस्य प्रतिबं
धकत्वं· न चेह तथा संशयेसत्यपि तस्य सत्वात्· अपि च विशिष्टज्ञानत्वमेव प्रामाण्यं भ्रमव्यावृत्तत्वात्· न त्वर्थतथात्वं निश्चय
त्वं भ्रमसाधारणत्वात्· लौकिकपरीक्षकाणां भ्रमव्यावृत्ते प्रमात्वव्यवहारात् तदतिक्रमे प्रमात्वस्य पारिभाषिकत्वापत्तेः

चिंता०प्र० तस्माद्भ्रमव्यावृत्तत्वान्निःकंपप्रवृत्तिहेतुत्वात् प्रामाण्यसंशयानिवर्तकत्वाद्विशिष्टज्ञानत्वमेव प्रामाण्यं न तत्तु तथात्वेन स्वतो
२० गृह्यत इति चेन्न अगृहीतासंसर्गकधर्मधर्मिविषयैकज्ञानत्वं भ्रमव्यावृत्तं विशिष्टज्ञानत्वं तच्च न स्वतो ग्रहीतुं शक्यते अग्रही
तासंसर्गादेः प्रागनुपस्थितत्वेन सामग्रीविरहात् स्वप्रकाशतापि स्वमात्रसाक्षिणी अन्यथा नभ्यासदशापन्नेऽपि स्वतो ग्रहे
प्रामाण्यसंशयो न स्यात् अत एव न ज्ञानमात्रसामग्रीत एवोत्पद्यते भ्रमस्यापि तथात्वापत्तेः न चास्तु अविद्यमानभेदस्या
ग्रहः प्रामाण्यं स चात्यंताभावः कदापि तस्याग्रहात् अत्यंताभावरूपतया स्वतः सिद्धत्वेन प्रामाण्यं स्वत इत्युच्यते विद्यमा
नभेदस्याग्रहो प्रामाण्यं स चाग्रहः प्रागभावो यद्भेदस्य ग्रहात् भेदग्रहभ्रमसंके दोषात् स न जायत इत्युत्तरकालसंसर्गरू
पस्य प्रागभावपरिपालनस्य दोषजन्यत्वेनाप्रामाण्यं परतस्तूत्पद्यते विसंवादिसंवादित्वे विश्वव्यवहारो विद्यमानाविद्यमा
नभेदाग्रहरूपविलक्षणहेतुक एव व्यवहारोपयुक्तं तु प्रामाण्यं यथार्थत्वमेव तच्च ज्ञानमात्रहेतुकं अप्रामाण्यं दोषात् अ तु
नभ्यासदशापन्ने प्रामाण्यसंशयोः विद्यमानाविद्यमानभेदाग्रहकोटिद्वयावलंबी स एव निःकंपप्रवृत्तिप्रतिबंधक इति राम०
तन्न निःकंपप्रवृत्तिहेतुर्हि प्रामाण्यं ग्राह्यं न त्वन्यत् निःप्रयोजनत्वात् तच्च यद्यविद्यमानभेदाग्रहरूपं तदा तन्न स्वतो ग्रहीतुं श २०
क्यते अविद्यमानभेदग्रहस्य प्रतियोगिनोऽत्यंतासत्त्वात् प्रागनुपस्थितत्वाच्च अनभ्यासदशायां ज्ञाने ज्ञातेऽपि विद्यमानभेद
ग्रहे संदेहाच्च एतेनौत्सर्गिकः संसर्गग्रह एव प्रामाण्यमसंसर्गग्रह एवाप्रामाण्यमिति निरस्तं संसर्गग्रहत्वस्य स्वेन ग्रहीतुमश
क्यत्वात् स्वग्राह्यत्वे वानभ्यासदशायामपि तद्ग्रहे संशयो न स्यात् तस्माद्भ्रमाद्यावृत्तनिःकंपप्रवृत्तिहेतुः प्रामाण्यं अगृ

हीतासंसर्गधर्मधर्मिविषयकैकज्ञानत्वरूपं विशिष्टज्ञानत्वं संसर्गज्ञानत्वं वा अविद्यमानभेदाग्रहत्वं वा स्वतो ज्ञातुं न शक्य
ते किंतु विशेषदर्शनादिजन्यज्ञानादवधार्यते इति वक्ष्यते यापि तत्परतः प्रामाण्यं अथ किं तत् प्रामाण्यं न तावज्जातिः योग्य
व्यक्तिवृत्तितया प्रत्यक्षत्वे प्रामाण्यसंशयानुपपत्तेः प्रमात्वस्यानुमेयत्वात् साक्षात्त्वादिना जातिसंकरापत्तेश्च ज्ञानसामान्ये न गुणेपि
तस्य दोषत्वात् तारत्वादेरुत्कर्षरूपजातित्वनियमेनानुगतिकत्वात् यावन्मात्रत्वात् प्रमात्वनानात्वेननुगमः किंचैवमप्रमायामंशे
प्रमात्वं न स्यात् जातेर्व्याप्यवृत्तितानियमात् नन्वेष्टापत्तिः अंशे संवादिनि विसंवादिनि समूहालंबने प्रमात्वाप्रमात्वयोरनुभूय
मानत्वे नैकविशेषस्यान्यकुमशक्यत्वात् अथ विपर्ययस्यांशेन प्रमात्वं किंतु स्मृतिवद्यथार्थत्वमात्रमिति चेत् तर्हि यथार्थानु
भवत्वमेव प्रामाण्यमावश्यकत्वात् न च तदपीति वक्ष्यते अथ यथाभावो वा जातिर्व्याप्यवृत्तिरिति नियमं तिरस्कृत्य अबाधिता
नुभवबलात् संयोगतदभावयोरव्याप्यवृत्तित्वं तथा जातिर्व्याप्यवृत्तिरेवेति व्याप्तिमभिभूयानुभवबलादेव प्रमात्वतद
भावयोरव्याप्यवृत्तित्वमस्तु न च यदव्याप्यवृत्ति तज्जात्यव्याप्यवृत्ति यत्र व्याप्यवृत्ति न तदव्याप्यवृत्तेरिति व्याप्तेः प्रमात्वस्य नोभ
यरूपत्वमिति वाच्यं संयोगात्यंताभावे व्यभिचारात् न च तस्याभावदयुमानाभावात् गुणदोषयोरेकत्रासत्त्वे व्याप्य
वृत्तित्वं गुणमात्रसत्त्वे व्याप्यवृत्तित्वमित्यन्यथोपपत्तेश्च अन्यथा प्रमात्वस्योपाधेरत्यंताभावसामानाधिकरण्यं न स्यात्
सामान्यत्वात् तस्मादव्याप्यवृत्तित्वमिति मैवं अवच्छेदभेदं विना विरुद्धयोरेकत्रासमावेशात् अप्रतीतेश्च न च विषयत्वं
सरूपं प्रमात्ववृत्तेरवच्छेदकः तद्विषयत्वस्य भ्रमेपि सत्त्वात् ननु विशेष्यावृत्त्यप्रकारकत्वं तद्वृत्तिप्रकारकत्वं च प्रमा

चिंता०मू० २१ नरभावयोर्वृत्त्यवच्छेदकमस्तीति चेन्न हि तयोरेव प्रमात्वाप्रमात्वव्यवहारजनकत्वमस्तु आवश्यकत्वात् प्रथमोपस्थितिक
त्वाच्च किं ज्ञात्यान्तरकल्पनया इति वक्ष्यते नापि यथार्थत्वे गृहीतग्राहित्वं लोकप्रसिद्धं प्रमात्वं धारावाहिकबुद्धिव्याप्तं न च प्र
त्यक्षस्य वर्तमानार्थग्राहित्वेन स्वाश्रयक्षणविशिष्टस्तंभादिग्राहकत्वादगृहीतग्राहित्वं लोकसिद्धं अन्यथैकसमये ज्ञान
योग्यपद्यप्रसंग इति वाच्यं क्षणनामतीन्द्रियत्वात् स्थूलोपाधिमादाय वर्तमानत्वग्रहात् स्वरूपसत्क्रमिकक्षणोत्पत्तिक
३ त्वेन ज्ञानायोगपद्यात् न च स्तंभादिषु प्रतिक्षणं गुणकर्माद्युत्पत्तिरस्ति येन तदादाय गृहीतग्राहित्वं स्यात् वेदादुत्पन्न
वेदार्थगोचरधारावाहिकबुद्धिव्याप्तेश्च नापि यथार्थानुभवत्वं घटत्वादिनायथार्थस्यापि सादृश्याभावात् सादृश्यमात्र
स्य भ्रमेऽपि गतत्वात् न च गुणजन्यानुभवत्वं दोषाभावजन्यानुभवत्वं वा तयोरननुगतत्वात् प्रमाप्रमानिरूप्यत्वाच्च न
प्यबाधितानुभवत्वं बाधितस्य विपरीतप्रमात्वात् नापि संवाद्यनुभवत्वं ज्ञानान्तरेण तथोल्लिख्यमानस्य संवादित्वस्य भ्र
मसाधारणत्वात् नापि समर्थप्रवृत्तिजनकानुभवत्वं उपेक्षाप्रमायामव्याप्तेः तदयोग्यतायाः प्रमानिरूप्यत्वात् नापि त
त्त्वानुभवत्वं वस्तुनो भानात् भाने वा भ्रमसाधारणत्वात् नापि विशेष्यनिष्ठात्यंताभावाप्रतियोगिधर्मप्रकारानुभव राम०
त्वं संयोगादिप्रमायामव्याप्तेः अभावे व्याप्यवृत्तित्वविशेषणे संयोगभ्रमातिव्याप्तेः तदत्यंताभावस्यैकत्वात् नापि विशे २१
ष्यवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकधर्माप्रकारकानुभवत्वं अव्याप्यवृत्तिप्रमानुपसंग्रहात् मूले वृक्षः कपिसंयोगवा
नग्रे नेत्यबाधितानुभवात् संयोगवदन्योन्याभावस्याप्यव्याप्यवृत्तित्वमुपेयं अत एव पके इदानीं न श्यामः इति धीः समयभेदाद्

विरुद्धा तत्रैव तदन्योन्याभावमात्रं ब्रूते नापि विशेष्यावृत्त्यप्रकारकानुभवत्वं एकैकविशेष्यावृत्तिना नाप्रकारकस
मूहालंबनेव्याप्तेः न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वमिति वाच्यं प्रमाप्रमारूपसमूहालंबनेतिव्या
प्तेः न च यावद्विशेष्यावृत्तित्वं विवक्षितं एकैकविशेष्यवृत्तिया वृद्धिशेष्यावृत्तित्वेन समूहालंबनेव्याप्तेः एवं विशेष्य
कयावदर्थाभावाच्च अथ विषयताश्रयो विशेष्यः ज्ञानं तु तत्प्रतियोगि भ्रमे च शुक्तिवृत्तिविषयता व्यधिकरणेन रज
तत्वेनावच्छिद्यते रजतवृत्तिस्तु समानाधिकरणेन रजतत्वेन विषयता च न विषये ज्ञाना हि तता तारूप्या विवक्षिता
अपसिद्धान्ताद् सिद्धेरतीतानागतप्रमायां तदभावाच्च किं तु ज्ञानस्य विषये विशेषणता विशेष्यः कश्चित्परं ज्ञानं ज्ञा
नत्वेन तद्विषयत्वं घटत्वेन ज्ञानतो घटमयं जानातीति न वेति संशयात् विषयज्ञानस्वरूपातिरिक्तस्य स्वाश्रयस्वा
भावादिविशेषणताविलक्षणस्य विषये ज्ञानविशेषणता विशेष्यस्यावश्यं स्वीकारात् अन्यथा घटत्वेन ज्ञातोयम्
६ पश्चितित्व तीयार्थासंभवः प्रकारत्वमपि विषयस्य ज्ञाने विशेषणता विशेष्य एव न तु विषयत्वमतिप्रसंगात् एवं
च विषयतासमानाधिकरणप्रकारकानुभवः प्रमा प्रकारसमानाधिकरणविषयताप्रतियोग्यनुभवो वा स्वसमाना
धिकरणधर्मप्रकारकविषयताप्रतियोग्यनुभवो वा स्वसमानाधिकरणधर्मावच्छिन्नविषयताप्रतियोग्यनुभवो
वा प्रमेति चेन्न निर्विकल्पकाव्याप्तेः विषयतासमानाधिकरणे दृष्टा च प्रकारकभ्रमस्यापि प्रमात्वप्रसंगाच्च भ्रमस्त
त्तांशे प्रमेति चेत् तर्हि भवतु अनुभवत्वमेव प्रमात्वं व्यर्थमधिकं अनुभव एव कश्चिदंशे भ्रमः प्रमा चेति चेन्न हि तत्कल्पस

चिंता॰म्॰१
२२

ऐ नतादृशज्ञानाभात् । अपरस्वव्यधिकरणधर्मानवच्छिन्नविशेष्यिता प्रतियोग्यनुभवः । प्रमात्वसमूहालंबने च प्रतिवि
शेष्यं विषयताभेदादेकवृत्तिविषयतानापरवृत्तिना वच्छिद्यते । इति नाव्याप्तिरिति चेन्न भ्रमांशप्रमायामव्याप्तेः नहि
या विषयताव्यधिकरणेनावच्छिन्नासा । तदनवच्छिन्नाविरोधान्नापि प्रकारव्यधिकरणविषयता प्रतियोग्यनुभवः
प्रमाप्रकारव्यधिकरणविषयताप्रतियोगिनि तत्प्रतियोगित्वस्याभावेन भ्रमांशप्रमाव्याप्तेः नापि स्वव्यधिकरणध
र्मावच्छिन्नविषयताप्रतियोग्यनुभवः स्वाधिकरणावृत्तिप्रकारकविषयताप्रतियोग्यनुभवो वा । तत एव भ्रमे विषय
तायाः स्वव्यधिकरणधर्मावच्छिन्नत्वात् स्वाधिकरणावृत्तिप्रकारकत्वाच्च । नापि स्वसमानाधिकरणान्योन्याभावप्र
तियोगितावच्छेदकधर्मावच्छिन्नविषयताप्रतियोग्यनुभवः । प्रमात्वभ्रमांशप्रमाव्याप्तेः अन्योन्याभावस्याव्याप्यवृत्ति
त्वेनाव्याप्यवृत्तिप्रमायामव्याप्तेश्च अयं तु प्रमात्वाप्रमात्वयोर्विषय एवेति भ्रमो न प्रमेति । तत्[illegible]अंशभेदमादायोभ
यस्यानुभवात् । अन्यथा भ्रमो न यथार्थो वा पत्तेः । एतेन व्यधिकरणप्रकारकं ज्ञानं भ्रमस्तदन्योनुभवः प्रमा भ्रमो
धर्म्यंशे न प्रमेति निरस्तं । नापि प्रकाराधिकरणावृत्तिप्रकारकविषयताप्रतियोग्यनुभवः । प्रकारानधिकरणवृत्ति राम॰
विषयताप्रतियोग्यनुभवो वा । प्रमा प्रमेयमिदमिति । ज्ञाने प्रकारानधिकरणस्याप्रतियोग्यप्रसिद्धेः किंच रजतत्व २२
प्रकारकविषयतायाः रजतवृत्तित्वनियमात् । रजतत्वावच्छिन्नेव रजतत्वभ्रमे रजतवृत्तिविषयता रजतभ्रमेपि रजतां
शे प्रमास्यात् । अपरजतपुरोवर्त्तिनोरेकैव विषयतासा च प्रकारानधिकरणवृत्तिधर्मावच्छिन्नेवेति चेत्तर्हि । धर्म्यंशे

पि नज्ञानं प्रमा न स्याद्व्यधिकरणप्रकारकत्वस्य तुल्यत्वात् । धर्म्यंशे तु प्रमात्वे रजतांशेपि प्रमा स्यात् । अपरजतांशे धर्म्यंशे च तज्ज्ञानं
प्रमैव वैशिष्ट्यांशे न प्रमेति चेन्न । वैशिष्ट्यस्य पूर्वतानाविषयत्वेनाप्रकारकत्वात् । वैशिष्ट्यवृत्तिविषयतायां रजतत्व पुरोवर्त्तिनोः प्र
कारत्वेन भ्रमस्यापि प्रमाप्रमात्वापातात् । नापि स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा प्रमेयमिदमिति ज्ञा
ने प्रमेयत्वप्रकारकविषयतानाश्रयस्याप्रसिद्धाऽव्याप्तेः । न च संयोगित्वादिना रूपेण प्रमेयत्वप्रकारकविषयताव्यतिरेको घटादौ
प्रसिद्ध इति वाच्यं । प्रतियोगितानवच्छेदकत्वेन प्रतियोगिज्ञानस्याभावाधीहेतुत्वात् । किंच यत्किंचिद्व्यधिकरणप्रकारानवच्छिन्न
विषयताकत्वं भ्रमसाधारणं प्रकृततानव्यधिकरणप्रकारानवच्छिन्नत्वं निर्विकल्पकाव्याप्तं तस्य निःप्रकारकत्वादित्युच्यते
यत्र यदस्ति तत्र तस्यानुभवः प्रमा तद्वति तत्प्रकारकोनुभवो वा । यत्र यन्नास्ति तस्य तत्र ज्ञानं तदभाववति तत्प्रकारकं वा प्र
मा तदन्यत्वमिति अनुभवत्वमेव वा प्रामाण्यं तत्प्रकारकत्वं च तद्वैशिष्ट्यविषयकत्वं तद्विशेषणज्ञानजन्यत्वं वा ईश्वरस्य तद्वैशि
ष्ट्यविषयं ज्ञानं न तु तत्प्रकारकत्वं निर्विकल्पकं च प्रमाप्रमाबहिर्भूतमेव व्यवहाराङ्गं गतत्वात् अव्यपदेश्यपदेन तदुपग्रहस्य ना
मजात्यादियोजनारहितमपि प्रत्यक्षमस्तीत्यत्र तात्पर्यं । इदं रजतमिति ज्ञानमिदंत्ववति तदनुभवत्वात्प्रमा रजतत्वाभाववृ
ति तत्प्रकारकज्ञानत्वादप्रमा चांशे समूहालंबनं च न प्रमा एकप्रकाराभाववति तद्प्रतीतेः । नन्वेवमव्याप्यवृत्तिभावाभावप्रो
रेकत्र प्रमाप्रमा वा स्यात्तदभाववति तत्प्रकारकज्ञानत्वादिति चेन्न । भिन्नाभिन्नावच्छेदेन हि वृक्षे संयोगतदभावेन वृक्षमात्रे वि
रोधात् । अननुभवाच्च तथा च वृक्षे यत्र संयोगो न च तत्र तदभावः परवच्छेदेन यत्र यदस्तीति वा विवक्षितं । गोत्वादेरपि सास्नाद्य

चिंता॰मू॰१ वच्छेदेन वृत्तेः। पाकरजतेयं रूपामोपमितिधीः प्रमैव कदाचित्तत्र तन्मत्वात्‌ इदानीं रूपामइतिधीर्भ्रमैव न चैवं यत्र भ्रमालक्षणेनानु
२३ गमः नहि प्रमा सर्वत्र प्रमा किंतु कचित्तथाच किं ज्ञानं कुत्र प्रमेति प्रश्ने तत्तद्विशेषस्य लक्षणीयत्वेन यत्र भ्रमे वलक्षणं युक्तं अन्ये
तु अननुभवत्वमेव प्रमात्वं भ्रमेप्यंशे प्रमादायप्रमाव्यवहारात्‌ रजतादिप्रमा तु विशिष्य लक्षणीया रजतत्ववति रजतत्वानुभवः त
द्भाववति तदनुभव इत्यादि नन्वनुभवत्वस्य प्रमाभ्रमसाधारणेन तज्ज्ञानस्य न निःकंपप्रवृत्त्यंगत्वमिति चेत्‌ सत्यं विशेषप्रमा
या एव प्रवर्तकत्वात्‌ अतिरिक्तविषयताश्रयविषयताश्रयावृत्त्यप्रकारकोनुभवः प्रमा केचित्तु अन्वयिनि विषयताश्रयावृत्तिरवृ
त्तिरेव प्रसिद्धः यद्यत्प्रकारिकाया विषयता तत्प्रकारसमानाधिकरणविषयताकः स्वप्रकारसमानाधिकरणविषयताको वानु
भवः प्रमा यत्प्रकारिकाया विषयता तत्प्रकारव्यधिकरणविषयताकः स्वप्रकारव्यधिकरणविषयताकं ज्ञानं वा भ्रमः प्रकारभेदे
नैकत्रैव विषयताभेद इति लक्षणद्वयसमावेशात्‌ भ्रमः प्रमासंकरः यद्वा विशेष्यनिष्ठात्यंताभावाप्रतियोगिप्रकारकविषयता
प्रतियोग्यनुभवः विषयतासमानाधिकरणप्रकारकविषयता प्रतियोग्यनुभवो वा प्रमा स्वसमानाधिकरणप्रकारकविषयता रामः१
प्रतियोगिज्ञानं स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगि वा भ्रमः इदं रजतमित्र भ्रमे च विषयताद्वये व्यधिकरणप्रका २३
रानवच्छिन्नतदनवच्छिन्नत्वयोः विषयताप्रतियोगित्वतदप्रतियोगित्वयोः अविरोधात्‌ समूहालंबने च विषयताभेदात्‌ नन्वप्रमा
प्रमालक्षणे अव्याप्त्यतिव्याप्ती वस्तुतस्तु विशेषणताविशेषो नास्त्येव मानाभावात्‌ सामान्यतो ज्ञाने ज्ञाते तस्य कश्चिद्विशेषणते
ति सामान्यतो विशेषणताज्ञानेपि घटमयं जानाति न वेति संशयतादवस्थ्यात्‌ तस्मात्‌ घटज्ञानयोः स्वरूपग्रहेपि तद्विषयत्वं तद्वि

षयत्वेन गृहीतमिति न तद्विषयत्वे संदेहस्तद्विषयत्वं च संबंधं विनापि तत्संबंधस्य भावत्वं तदुक्तं प्रकाशस्य सतद्विषयतामात्रनिबंधनं स
भावविशेषस्तद्विषयत्वमिति संबंधं विना कथं तद्विषयत्वं संबंधस्य स्वभावात्‌ संबंधस्य संबंधांतराभावात्‌ यथा तथैव विशेषणता
या अन्यथानवस्थानात्‌ अन्यत्रापि स्वरूपसंबंधे एवैव गतिः अन्यथा सामान्येनाभावसमवाययोर्ग्रहे अधिकरणे ज्ञाते तयोः संश
यो न स्यात्‌ अधिकरणतदुभयस्वरूपाणां ज्ञातत्वात्‌ तत्राप्यभावसमवाययोर्विशेषणताविशेषो न गृहीत इति चेन्न सामान्यतस्तद्ग्र
हेपि संशयात्‌ यत्तु समूहालंबनविशिष्टज्ञानयोर्विशेषानुभवादिदं ज्ञाने विशेषणताविशेषो विषय इति चेन्न विशेषणताभे
देपि समूहालंबनसंभवात्‌ तत्रापि विशेषणतांतरस्वीकारे नवस्था समूहालंबनात्तु विशिष्टज्ञानस्य विशेषः कारणकृतः [illegible]
पकृतः प्रकारकृतो वा प्रकारोपि विशेषणताविशेषः [illegible] धर्मिण्येवास्तीति चेन्न तथा सत्यपि समूहालंबनसंभवात्‌ ॥ ननु सं
देहानानां यथार्थत्वात्‌ प्रमालक्षणे विशेषणत्वावश्यं प्रसिद्धिः अन्यथाख्यातौ मानाभावात्‌ तथाहि रजतार्थिप्रवृत्तिविषयत्व
रजतत्वप्रकारानुभवविषयत्वव्याप्यं रजतार्थिप्रवृत्तिविषयमात्रवृत्तिधर्मत्वात्‌ रजतमात्रवृत्तिधर्मवदित्यत्र अन्यथाख्यातिव्या
प्यं सिध्यतीत्यत्राप्राप्तकालत्वं रजतमात्रवृत्तित्वोपाधिः शुक्तिवृत्तिज्ञानविषयता रजतत्वप्रकारिका रजतार्थिताजन्यप्रवृत्ति
विषयवृत्तिविषयतात्वात्‌ रजतवृत्तिविषयतावदित्यत्र रजतवृत्तित्वमुपाधिः रजतरजतत्वम रजतवृत्तिज्ञानविषयतावच्छेदक
म रजतविषयप्रवृत्तिहेतुज्ञानप्रकारत्वात्‌ शुक्तित्ववदित्यत्र रजतावृत्तित्वमुपाधिः रजतत्वप्रकारिकाज्ञानविषयता अरजतवृत्तिरर
जतनिष्ठात्यंताभावप्रतियोगिनी न भवतीति वा अरजतविषयप्रवृत्तिहेतुज्ञानविषयतात्वात्‌ शुक्तिवृत्तिविषयतावदित्यत्र रज

चिंता॰मू॰ २५ ताहृत्तित्वमुपाधिः॥ विषयतापान्निरस्तत्वाच्च विवादपदं रजतज्ञानं शुक्तिविषयकं शुक्तौ प्रवर्त्तकज्ञानत्वात् शुक्तिज्ञानव
दित्यत्र साध्यमाने इष्टभेदाग्रहे कारणतावच्छेदकं रजतज्ञानं न प्रवर्त्तकमित्यसिद्धिः॥ शुक्तौ रजतज्ञानविषयतोऽग्रयः रजतार्थि
प्रवृत्तिविषयत्वात् रजतवदित्यत्र रजतविषयत्वमुपाधिः शुक्तौ रजतार्थिप्रवृत्तिः॥ स्वधर्मधर्मिकरजतत्वप्रकारकज्ञानसाध्या
रजतार्थिप्रवृत्तित्वात् रजते प्रवृत्तिवदित्यत्र रजतविषयत्वमुपाधिः॥ स्वपदार्थाननुगमश्च तत्परित्यागे तु रजतार्थिप्रवृत्तिधर्म
धर्मिकरजतत्वप्रकारेणेत्यप्रसिद्धस्मरणेनार्थान्तरं॥ उच्यते॥ रजतार्थिताजन्या शुक्तौ प्रवृत्तिः इष्टप्रवृत्तिविषयविशिष्टज्ञान
साध्याप्रवृत्तित्वात् शुक्तौ शुक्त्यर्थिप्रवृत्तिवत्॥ न चेष्टविषयप्रवृत्तित्वमुपाधिः॥ साधनविशेषितत्वात्॥ यद्वा रजते वा जन्यशुक्ति
निष्ठप्रवृत्तिजनकं रजतत्वप्रकारकं ज्ञानं शुक्तिविषयकं शुक्तिवृत्तिप्रवृत्तिप्रयोजकज्ञानत्वात् शुक्त्यर्थिशुक्तिप्रवृत्तिजनकज्ञा
नवत्॥ अवच्छेदकत्वेपि प्रयोजकत्वात् सिद्धिः हेतुत्वमपि तस्य साधयिष्यामः॥ तथाहि प्रमितं ज्ञानं वा रजतत्वप्रकारकं रज
ते वा जन्यप्रवृत्तिहेतुज्ञानत्वात् सत्यरजतज्ञानवत्॥ न च ग्रहणस्मरणयोर्विशिष्टज्ञानस्य वा पक्षत्वे बाधः॥ आश्रयासिद्धिर्वा उ
भयासिद्धशुक्तिनिष्ठप्रवृत्तिहेतुत्वेन पक्षत्वात्॥ अन्यथा साध्यतद्भावतः पक्षत्वे अनुमानमात्रोच्छेदः॥ समवायातीन्द्रियतावा रामः॰ २५
दिनं प्रत्यगृहीतासंसर्गधर्मधर्मिविषयकमेकं ज्ञानमेव विशिष्टज्ञानं सिध्यतीति नैवमुभयथाख्यातिः नान्यथाख्यातिः॥
व्यधिकरणप्रकारकज्ञानस्य सत्त्वात्॥ न च विसंवादिप्रवृत्तिजनकत्वमुपाधिः॥ तथाविधस्य ज्ञाने रजतज्ञाने च त्वन्मते च साध्यव्या
पकत्वात्॥ नापि दोषाजन्यत्वपरस्य ज्ञानमात्रे तथात्वात्॥ अन्यथा नयोरेव साध्याव्यापकत्वात्॥ न चाप्रयोजकत्वं इष्टपुरोवर्ति

विशिष्टज्ञानस्य प्रवृत्तिहेतुत्वात्॥ अत्र प्राभाकराः॥ अप्रयोजकमिदं स्वतंत्रोपस्थिते इष्टभेदाग्रहादेव प्रवृत्त्युपपत्तेः॥ किं विशिष्ट
ज्ञानेन परेणाप्यारोपनियमार्थं तदभ्युपगमात्॥ न च रजते प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वोद्दिष्टापि तत्सिद्धिः॥ प्रवृत्तिमात्रे
भेदाग्रहे सतीष्टपुरोवर्तिज्ञानस्य लाघवेन हेतुत्वात्॥ ननु सत्यपि विशिष्टज्ञाने तत्र गौरवात्॥ न च रजते इष्टपुरोवर्तिभेदग्रहस्य
प्रसिद्धाकर्षं तदभाव इति वाच्यं॥ पुरोवर्तिनि इष्टभेदे रजतप्रतियोगिकत्वज्ञानविषयत्वाभावस्य पुरोवर्तिनि इष्टभिन्नत्वप्रका
रकज्ञानविषयताभावस्य वा हेतुत्वात्॥ न चाभेदव्यवहारो व्यवहर्तव्यधीसाध्यो न तु तद्भेदाग्रहात्॥ अन्यथाभेदाग्रहा
भेदव्यवहारापत्तिरिति वाच्यं॥ इष्टादीनां ज्ञानपुरोवर्तिविषयत्वात्॥ अभेदाभिलापोपि ताताभेदस्यासंसर्गाग्रहादितिना
तातेव्यवहारः॥ ननु पीतः शंखो नन्वेतदिति भेदज्ञाने विशिष्टताभेदानुमितावश्चेनार्थिप्रवृत्तेरभेदधीस्तद्धेतुरिति चेन्न तथापि
पीतः शंख इत्यभेदज्ञानात् पीतार्थी न प्रवर्त्तते भेदानुमितेरिति भेदाग्रह एव तद्धेतुश्च मतेन सात् अभेदज्ञानमकिंचि
त्करमिति॥ पतितसंभ्रमत्वेन ज्ञातं भेदज्ञानमपि तथा॥ यद्वा इष्टभेदविषयकं ज्ञानं प्रवर्त्तकं न वा भेदानुमितावपि भेदो
विषयः॥ अत एव पूर्वं भेदप्रत्ययेपि स प्रत्ययानभेदग्राहीति दिङ्नागादिप्रतिबिंबादिप्रत्ययाः॥ अन्ये नेवं रजतेपि विशिष्टज्ञानं
न सिद्ध्यति॥ प्रवृत्तेर्भेदाग्रहादेवोपपत्तेः॥ इदं रजतत्वतया जानामीदं रजतं तत्त्वया जानामीत्यनुभवः॥ शुक्तावपि तुल्यः॥ न च शुक्तौ
रजतत्वबाधाद्दोषसंसर्गाग्रहः॥ बाधस्यापि विशिष्टज्ञानत्वे मानाभावादिति चेन्न॥ तत्र हि रजततस्य न स्मृतिः भागननुभ
वात्॥ ग्रहणं स्वधर्मिविषयकं योग्यधर्मियोगेन रजतत्वज्ञानतो ग्रहादिति सिद्धं॥ धर्मधर्मिविषयकमेकं ज्ञानं रजतत्वस्य नन१

श्रुतानुभवविषयत्वे हेतुरस्ति· नच प्रत्यभिज्ञा संस्कारेंद्रिये हेतू तयोरत्र भिन्नविषयत्वात्· एकदा स्वतंत्रोपस्थितविरुद्धानेकभे
दाग्रहे संशयः नच क्रमेणोपस्थितानेकभेदाग्रहोपेन सक्रमिके विपर्ययद्वयरूपः स्यात्· अन्यथा तत्राप्यतीकारात्· नच सं
शयानंतरं विपर्ययपरशयामुभयभेदाग्रहे संशयः· एकभेदाग्रहे न्यथाख्यातिः दोषमहिम्ना ह्येकस्य न स्वतंत्रोपस्थितिः किं
त्वभावविशेषणतयेति तद्भेदाग्रहोप्याकिंचित्करः· नच संशयानंतरं धूमभ्रमादस्ति कवि ह्वर्थिप्रवृत्तिर्न तु तेन विना न च तस्य स्व
तंत्रोपस्थिति वह्निसंसर्गाग्रहो द्वारं संशयानुरोधेन तस्य प्रागपि सत्वाद्वह्न्यनुमितिद्वारमिति वाच्यं· लिंगज्ञानमस्य हि निर्वह्नितस्य
स्वातंत्र्येणोपस्थिति प्रतिबंधकत्वेन नियमतः स्वतंत्र वह्निस्मृतिद्वारमिति न संशयान्यथाख्याती नच पर्वतस्य प्रत्यक्षत्वे वह्नि
स्मरणे प्रत्यक्षभ्रमान्निर्विशेषश्च तिस्मासाक्षात्करोमीति स्यान्नानुमिनोमीति वाच्यं· लिंगज्ञानानंतरं भावित प्रतिसंधानात्प्रतिसंधा
नेनोभयसंभवात्· एवं स्वतंत्रोपस्थितानिष्टभेदाग्रहो निवर्तकः· तेनेदं रजतं न शुक्तिरित्यत्राभावप्रतियोगित्वेनानिष्टोपस्थिते
तद्भेदाग्रहो न निवर्तकः शुक्त्याभासस्संसर्गाग्रह स्थन कारस्यार्थः नान्यथाख्यातिः· अनिष्टाभेदाग्रहस्य निवर्तकत्वे च रजतएव
नेदं रजतमिति कृतानानिवर्तेत अन्यथानुअन्यथाख्यात्यापत्तेः अतएव रजतएव नेदं रजतमिति ज्ञानेपि न प्रवृत्त्यन्यथाख्या
ती रजतभेदग्रसंसर्गाग्रहात्· ननु रजतरंगयोरिमे रंगरजते इत्यत्र प्रत्येकमुभयभेदाग्रहे युगपत्प्रवृत्तिर्निवृत्तिश्च स्यातामिति चेत्·
एवंविधभ्रमे मानाभावात्· कार्यानिष्पधर्माणां यथाकार्यमुत्पन्नात्· क्रमोत्पन्नज्ञानयोर्भेदाग्रहादेकत्वाभिमानः अन्यथा
तत्रापि स्वतंत्रोभयभेदाग्रहात्प्रत्येकं रजतं रंगं वेति संशयः स्यादेव· यदेव वा तत्र विपर्ययनियामकं तत एव तत्र प्रवृत्तिर्निवृत्ती

स्यातां तद्धेतोरेवेति न्यायात्· पक्षप्रसक्तप्रतिषेधात्माबाधो न्यथाख्यातौ न युज्यते साध्यवत्पन्यथाख्यातिं बाधएवहि नः स्फुटमिति·
तद्विपरीतं परस्परविरुद्धत्वाद्विशेषेण बाध्यत्वाव्यवस्थितेः विरुद्धार्पकवयोस्तत्र तुल्यत्वत्तुल्यं पूर्वेणापि कश्चित्परस्य बाधात्· तस्माद्भे
दाग्रहात् प्रसंजितो व्यवहारो भेदग्रहाद्बाध्यत इति पूर्वोक्तं· उपेक्षात्र मेव च इष्टप्रयोगो बाध्यः तदीयतामात्रस्वभावत्वात् विषयत्वस्य
कथं रजतीयमात्रं ज्ञानमरजतीयं स्वभावव्याघातात्· न वोभयीयं समूहालंबनापत्तेः तदुक्तं· अन्यस्य चान्यथाभानं प्रतीक्षेव
पराहतं परस्मिन्भासमाने तु न परं भासते यतः इति विषयं विनैव तदाकारं ज्ञानमिति साकारवादः ज्ञानायथार्थत्वे च ज्ञानस्य त
त्संशयाद्व्यनिःकंपप्रवृत्तिः स्यात्· न च दोषाजन्यत्वादिना विश्वासः भ्रमादविश्वासे प्रवृत्त्यभावापत्तेः नापि तत्ज्ञानात् ज्ञानत्वेन त
चाप्यविश्वासादिति तदुच्यते· अहो बत महानेष प्रमादो धीमतामपि ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबंधन इति भ्रमस्य
च सन्मात्रविषयत्वे न्यायपार्थतासद्विषयत्वे सत्ख्यातिः न च तत्र हेतुरस्ति शक्तस्याप्यशक्तस्य निर्दोषस्य वा हेतुत्वात् नच ज्ञा
तानुमानाभासात्स्वयोग्यतादिमत्त्वयाद्दृष्टस्य लिंगवन्नयापदृष्टस्य ज्ञानोत्पत्ता दृष्टानुमितौ न चाभासेतत् ज्ञानमस्ति हेत्वभावात्· ए
वं किंत्वगृहीता संसर्गज्ञानद्वयं तत्रेंद्रियस्य संबंधाग्रहकत्वात्· न च प्रत्यभिज्ञानवदुत्कालनरत्वात् न च दोषवशाद्दृष्टसंबंधापि विजा
तीयकार्यं दोषस्याजनकत्वात्· न हि दुष्टात् कुटजबीजाद्यवांकुरः· अस्मकं च न दोषः किं तु बहेरूव गतस्य च दहनेसामर्थ्यं दृष्टमे
व रसाज्ञनं तु न भवति पिंडदाहात्· दावदग्धं चेत्रबीजं च नष्टमेव तज्जन्मनः कदलीजनकत्वं· तदुक्तं· साकारपातादसतोन भानात्सं
विद्विरोधादपहृत्वभावात्· भियामनाश्वासभयाद्यनेष्टा पतोन्यथाख्यातिरतो यथार्थेति तस्माद्विवादपदं ज्ञानं न व्याधिकरणप्रका

रकं ज्ञानत्वात् सम्मतवत् भेदाग्रहजन्यरजतत्वप्रकारकप्रवृत्तौ छायां प्रतियोगिप्रसिद्धिः ज्ञानत्वं स्वव्यधिकरणप्रकारावृत्तित्र
विषयताप्रतियोगिवृत्ति न भवति ज्ञानमात्रवृत्तिधर्मत्वात् प्रमात्ववत् न च चक्षुरचाक्षुषसत्यज्ञानातिरिक्तज्ञानजनकं इन्द्रियत्वा
त्मनवदिति प्रतिरोधः अप्रयोजकत्वात् चाक्षुषज्ञानातिरिक्तज्ञानजनकत्वोपाधेः अन्यथाख्यातेरपि धर्म्यंशे सत्यत्वात् तुल्य
न्यायतया व्यापकेपि व्यर्थविशेषणत्वात् एवं च स्वरूपतो विषयतश्चाग्रहीतभेदं ज्ञानद्वयमेव विसंवादिप्रवृत्तिहेतुः तदुक्तं
सन्निहितरजतशकलेरजतमतिर्भवति यावदश्मीस्मरणाभेदानध्यवसायादियमपि तादृक् परिस्फुरतीति व्यवहारमात्रस्य भेदाग्रह
जन्यत्वेपि तस्य संवादतदभावाभ्यां ज्ञानयथार्थत्वायथार्थत्वव्यपदेशः अत एव लोके उग्रं जलमिति ज्ञानेनायथार्थत्वव्यपदेशः
उपेक्षाज्ञाने तद्व्यपदेशगतदोष्यत्वादिति पूर्वपक्षः राद्धान्तस्तु सत्यस्थले प्रवृत्तिमात्रं प्रति इष्टभेदे वर्त्तिज्ञाने हेतुतया व्यवस्थिते
ति प्रसंगवारणार्थं विषयतया वैशिष्ट्यमेव कारणतावच्छेदकं कल्पने लाघवात् कारणताग्रहसमये ज्ञानविशिष्टे वैधतया वस्यंदी
शोपस्थितत्वाद्बाधकाभावाच्च ननु स्वतंत्रोपस्थिते इष्टभेदाग्रहस्याभावः कारणतारजतभेदाग्रहत्वं च हेतुतावच्छेदकं गौरवात् कल्प
नोपोपस्थितित्वाच्च विशिष्टज्ञानेपि हेतुत्वेनावरपतात् भेदाग्रह एव हेतुरिति चेन्न विशिष्टज्ञाने तद्धेतुत्वस्य तत्कल्पनोत्तरकल्प्यत्वे राम॰
न प्रवृत्तिकारणताग्रहसमये तदनुपस्थितेः न चैवं मिथ्याज्ञानकल्पने गौरवं प्रमाणप्रवृत्तिसमये सिद्धासिद्धिपराहतत्वात् फल २६
मुखं गौरवस्यादोषत्वात् प्रमाणवतूक्तस्यान्याय्यत्वात् एवं विसंवादिप्रवृत्तिरपि विशिष्टज्ञानसाध्या प्रवृत्तित्वात् उक्तकारणं विनानु
पपत्तेरन्यथासिद्धतया प्रत्यासमानीतविशिष्टज्ञानबलात् तत्कारणसदोषमिंद्रियादेवसर्वतो बलवती अन्यथानुपपत्तिः नच भे

दाग्रहात्प्रवृत्त्युपपत्तिरपि विपरीतवन्नु के युगपत्प्रवृत्त्यापत्तेः न च तत्र मानाभावः इमे रंगरजते इति सत्यज्ञानवद्रजतरंगयोः प्र
त्येकं भ्रमसामग्र्योरेकदा सत्वेन तादृशभ्रमोत्पत्तेरानुभाविकत्वात् अन्यथासमूहालंबनेनोच्छेदः दृष्टित्वाद्यप्रत्यक्षतापत्तेः इमे रंग
रजते इति ज्ञाभासादेवंविधभ्रमसंभवाच्च ममदोषमहिम्ना रजतरंगयोर जतरंगभेदाग्रहात् संशयगतवैविकत्रस्वतंत्रोभयपभे
दाग्रहात्तत्वेकं रंगं रजतं वेति संशयः स्यात् अथ यद्धर्मज्ञानादादुपस्थितिस्तत्र भेदाग्रहात्तत्र प्रवृत्तिनिवृत्ती रंगरजतधर्मेण रजत
रंगे स्मारितेन रंगरजतमाधरास्मि यमषी विषयेमाधार्षिप्रवृत्तिर्मषीनीलिमस्मारितमाधभेदाग्रहात् अनुभूयमानारोपः
सिद्ध एव अन्यथान वापि प्रत्येकमुभयज्ञानं स्यादिति चेत् नैवं ज्ञाशाभासात् प्रत्यक्षादष्टानिशोपस्थितौ तदभावात् ममत्वेकध
र्माउभयोरुपस्थितावपि रजतरंगयोस्तद्वत्पानज्ञानं दोषादित्युभयसिद्धं विपरीतज्ञानं च दोषात् न चैवमावश्यकत्वाद्दोषा
देव प्रवृत्तिनिवृत्ती सत्यस्थले तदभावात् न च विसंवादिनी दोषात्ते इन्द्रियलिंगशब्ददोषाणामननुगतत्वात् तत्रान्यज्ञाने वेज्ञा
तिभेदात् न व्याप्तु रंगवृत्तितयाज्ञातधर्मस्य रजतउत्कटाकांक्षातेन स्वहस्तभूयः सहचारज्ञानात् न च रंगेऽप्यत्यथात्वादिति
तत्रानुत्कटासा अत उत्कटाकांक्षयानुत्कटाकांक्षायाः प्रतिबंधात् तरंगे निवृत्तिः एवं रजतेन प्रवृत्तिरिति तन्न इमे रंगरजते
इति शशाभासायुगपत्प्रवृत्तिनिवृत्त्यप्रसंगात् शशाभासा उपस्थितावाकांक्षायास्तुल्यत्वात् किं चैवं धर्म्मयोर्भूयोऽल्पसह
चारावगमादुत्कटानुत्कटकोटिको रंगं रजतं वेति संशयः स्यात् उत्कटानुत्कटाकांक्षाकल्पने मानाभावात् उत्कटत्वानिरुक्ते
श्चस्यादेतत् संवादिविसंवादिप्रवृत्त्योर्वैचित्र्ये विशिष्टज्ञानभेदाग्रहौ हेतू क्ष्मत्वात् ननु विशिष्टज्ञानस्य सत्यत्वासत्यत्वे गौरवात्

असिद्धेश्च प्रवृत्तिनिवृत्तिमात्रे भेदाग्रहे इष्टानिष्टपुरोवर्त्तिज्ञानं हेतुरिति नानुगमः नतु विशिष्टज्ञानं गौरवात् · न च भेदाग्रहे इति प्रसंगो विशि
ष्टज्ञानं भेदाग्रहं च विशेषद्वयं हेतुं विना सामान्यहेतोः कार्यानुत्पादात् · नहि निर्विशेषं सामान्यं नाम अन्यथा घटत्वसंबंधे मह
त्त्वरूपवति च द्रव्ये समित्पक्षतापत्तिः द्रव्यसाक्षात्कारहेतोः सत्त्वात् · एवं रंगे रजते च विसंवादिन्यौ प्रवृत्ती भेदाग्रहात् न सं
वादिन्यौ विशिष्टज्ञानाभावात् · अपरजतरंगयो रजतरंगभेदाग्रहात् संवादिन्यौ ते च जातु स्यातां तत्सामग्रीसत्त्वात् · विसं
वादिनी तत्र न संभवतीति चेत् · अत एव भेदाग्रहो न तद्धेतुस्तत्सत्त्वेऽपि तदभावात् · न च प्रवृत्तिनिवृत्तिगतं संवादित्वं विसंवादित्व
मपेक्ष्य तद्धेतुना तज्जन्यते कारणस्य कार्यानपेक्षत्वादिति मैवं · प्रवृत्तेरनिष्टविषयत्वं निवृत्तेरिष्टविषयत्वं च विसंवादः तथा
चानिष्टविषयप्रवृत्तौ इष्टविषयनिवृत्तौ च भेदाग्रहो हेतुरिति कथं तत इष्टानिष्टविषये प्रवृत्तिनिवृत्ती स्यातां तत्र तत्सामग्र्या
इति अत्र ब्रूमः ज्ञानं स्वविषये प्रवर्त्तकमित्याद्यप्रवृत्तौ संवादिप्रवृत्तौ च सर्वैरेवावधारितं लाघवाद्बाधकाभावाच्च · न तत इष्टज्ञानं
शुक्तौ प्रवर्त्तकं तद्विषयं तद्व्यवहारहेतुत्वात् · स्वाविषये तस्यासामर्थ्यात् · अपभेदाग्रहादि ग्रहणस्मरणाच्च आवश्यकत्वाद्विसं
वादिप्रवृत्त्युपपत्तेर्न विशिष्टज्ञानकल्पने गौरवाच्च · स्वाविषयेऽपि ज्ञानं प्रवर्त्तकमिति कल्पनात् · सर्वैः प्रथममवधारितमपि
त्यज्यत इति चेन्न · प्रथमप्रवृत्तप्रमाणबलेन तत्रापि विशिष्टज्ञानकल्पनात्तत्र बाधकं विना तद्विरोधेन कल्पनान्तरानुदयाच्च
फलमुखगौरवस्यादोषत्वात् · अन्यथा प्रथमप्रथमं सर्वैर्गृहीता कार्यान्विते शक्तिः सिद्धार्थे दुर्ज्ञाना गौरवाच्च परित्यज्येतेति साधु
समर्पितं गुरुमतं · ननु स्वविषये ज्ञानं प्रवर्त्तकमिति सत्यं किंतु विसंवादिप्रवृत्ताविदं ज्ञानमेव प्रवर्त्तकं · न विशिष्टज्ञानमपि तु

दिज्ञायमाने इष्टभेदाग्रहे कारणतावच्छेदकं लाघवादिति दंडत्ववदन्यथासिद्धं एवं हि तत्प्रतिबंधव्यवहारानुकूलत्वं तद्विषयत्वं र
जतज्ञानस्य शुक्तौ नास्ति · अन्यथा रजतज्ञानस्य शुक्तिविषयतापत्तेः · अविसंवादिप्रवृत्तौ चेष्टविषयं ज्ञानं प्रवर्त्तकं तस्य विशिष्ट
ज्ञानत्वात् भेदेनावच्छेदकत्वाभावात् कमसिद्धांतसार इति चेत् · उच्यते स्वतंत्रान्वयव्यतिरेकादिष्टविषयं ज्ञानं हेतुरनन्वितरहेतु
तावच्छेदकमन्यथासिद्धं वा न हीष्टज्ञानमादाय भेदाग्रहस्यान्वयव्यतिरेकौ येन दंडत्ववत्तदवच्छेदकं नापीष्टज्ञानस्य भेदाग्रहगर्भौ
चान्वयव्यतिरेकौ येन दंडरूपवदन्यथासिद्धं · अन्यथागृहीतभेदेष्टज्ञानं हेतुरवच्छेदको भेदाग्रहस्त्वेव किं न स्यात् · तस्मात्
स्वतंत्रान्वयव्यतिरेकादुभयोरपि हेतुत्वं · किंचेष्टविषयप्रवृत्तिस्थलेऽपि प्रवृत्तिमात्रे प्रतीष्टज्ञानस्य हेतुत्वादियमपि प्रवृत्तिस्तज्जन्या
क्लृप्तहेतुं विना कार्यानुपपत्तेः न चेष्टज्ञानजन्यत्वे इष्टविषयप्रवृत्तित्वमवच्छेदकं गौरवात् · बाधकं विना सामान्ययोः कार्यका
रणभावनियमात् · अत एव तत्रोपाधिरपि अथ तत्रापीदं ज्ञानमेव प्रवर्त्तकं बाधीनं तमोष्ट विषयत्वमपीति चेन्न हि इदं इष्टेदं स्ये
ज्ञानादेव प्रवृत्तिः स्यात् · न त्वत्रे च तत्रापि तद्वज्ज्ञायमाने इष्टभेदाग्रहः प्रवर्त्तकः · एतेन रजतज्ञानं न शुक्तिविषयं तत्प्रतिबंधव्यवहा
राहेतुत्वादिति निरस्तं असिद्धेः न नु ज्ञानं यथार्थमेवेति व्याप्तिरेव तत्साधिका अत एव प्रवृत्तिमात्रे विशिष्टज्ञानमिष्टज्ञानं च हे
तुर्लाघवात् · स्वविषये ज्ञानं प्रवर्त्तकं संवैरिवाद्यप्रवृत्तौ तथावगमात् तत्रपरस्थले इष्टज्ञानमपि प्रवर्त्तकं न तु भेदाग्रहे हेतुता
वच्छेदकमित्यन्यथाख्यातिसाधनं न भवतीति चेन्न तेषामनन्यथासिद्धान्वयव्यतिरेकावधारितं कारणतामूलकत्वेन तैरेव
व्याप्तिबाधात् क्लृप्तहेतुं विना कार्यानुत्पत्तेः विपक्षे बाधकाभावाच्च · ज्ञानायथार्थत्वेऽपि निष्कंपप्रवृत्त्युपपत्तस्य वक्ष्यमाणत्वात् · ए

तेन संस्कारेंद्रियाभ्यां प्रत्यक्षज्ञानवच्छुक्त्याभासादितो वा परस्परसंबंधविरहिण्येकं ज्ञानं न भवतीति यथार्थमेवेति ख्यातेरिति नि
रस्तं व्याप्त्यसिद्धिः सामग्र्याः सत्वात् कार्यावश्यकत्वाच्च एकदेशिनस्तु रंगरजतयो रंगरजतभेदाग्रहान्न युगपन्निवृत्तिप्रवृ
त्तीन वान्यथाख्यातिः दोषवशात्पुरोवर्त्तिनं विहाय स्मृतरंगरजताभ्यां पुरोवर्त्तिनि भेदाग्रहान्न च रजतत्वेन स्मृतिः संस्कारगो
चरसर्वरजतविषया स्यात् सामान्यप्रत्यासत्तेस्तुल्यत्वादिति वाच्यं तत्रांशे रजतत्वे च प्रत्यासत्तावपि दोषात् स्मृत्यनुभवप्र
तिबंधवदुपपत्तेः। किंच सामान्यं प्रत्यक्षे प्रत्यासत्तिः स्मरणे तु मनःकरणसंस्कारः प्रत्यासत्तिः न तस्य सामान्यप्रत्यासत्ति
कारणत्वात् इति तन्न एकरंगरजतमात्रज्ञानानंतरं तयोरेव यमजयोर्वा विपरीतं वस्तु केति प्रसंगात् अन्यथाख्यातेर्वा अन्ये
तु रजतेनेदं रजतमिति ज्ञानं रजतत्वासंसर्गाग्रहरूपं संसर्गः रजतभेदासंसर्गाग्रहरूपं वा प्रतिबंधकमिति तन्न पुरः स्थित
योपस्थितस्य रजतत्वासंसर्गस्य रजतभेदस्य च रंगे संसर्गाग्रहान्निवृत्तिप्रसंगात् रंगे च तयोः संसर्गग्रहे अन्य
थाख्यातिः रजते रजतभेदासंसर्गासंसर्गस्यासंसर्गाग्रहान्निवृत्तिरिति चेन्न भेदासंसर्गासंसर्गस्य भेदसंसर्गरूप
त्वेन रजतभेदसंसर्गासंसर्गाग्रहाद्रंगे निवृत्तिप्रसंगात् रजतभेदसंसर्गासंसर्गग्रहे वान्यथाख्यातिः रजतवृत्तित
योपस्थिते भेदे रजतभेदेन सह भेदाग्रहः प्रवृत्तिप्रतिबंधकः एवं रंगे निवृत्तावपीति चेन्न एवमपि शुक्त्याभासाद्युगपत्प्र
वृत्तिनिवृत्त्यापत्तेः प्रवृत्तिनिवृत्तिविषयवृत्तिभेदयो रजतरंगभेदयोश्च शक्त्यादनुपस्थित्या प्रतिबंधकत्वाभावात् अ
परे तु पुरोवर्त्तिनिष्ठतया ज्ञाते भेदे इष्टानिष्टप्रतियोगिकत्वाभावग्रहात्प्रवृत्तिनिवृत्ती तथा हि। रंगे रजताद्भेदः सन्नपि दो

षान्न भासते अन्यस्माद्भात एव तथा च रंगवृत्तितयाज्ञाने भेदे रजतप्रतियोगिकत्वाभावग्रहाद्यथार्थादिव रंगे प्रवृत्तिः
रंगप्रतियोगिकत्वाभावः सन्नपि दोषान्न गृह्यत इति तत्र न निवर्त्तते एवं च रजतनिष्ठतयोपस्थिते भेदे रंगप्रतियोगिकत्वाभा
वग्रहाद्रजते निवर्त्तते रजतप्रतियोगिकत्वाभावः सन्नपि दोषान्न गृह्यत इति न युगपत्प्रवृत्तिनिवृत्ती न च रंगवृत्तिभेदत्वं र
जतभेदत्वस्फीतितेन रूपेण सोपि भासते सामान्यबुद्धेः सर्वविशेषविषयत्वात् तथा च रजतभेदे तत्प्रतियोगित्वाभावग्रहे
अन्यथाख्यातिरिति वाच्यं प्रत्यासत्तावपि रंगवृत्तिभेदत्वेन रजतभेदस्य दोषेणाग्रहादिति मैवं इदं रजतमिति ज्ञानमन्वयव्य
तिरेकाभ्यां प्रवर्त्तकमित्यनुभवसिद्धं तच्च सत्यस्थले विशिष्टज्ञानमन्यत्र ज्ञानद्वयमेकं वेति विवादः तत्र तत्र ज्ञानं तत्र प्रवर्त्तकमित्य
नुभवबाधितं तदपि हेतुरित्यपि न सत्यस्थले तस्यासिद्धत्वात् विशिष्टज्ञानापेक्षया गुरुत्वात् शुक्त्याभासात्प्रवृत्तौ भेदादिज्ञाना
भावाच्च एवं निवृत्तावपि अन्ये तु इष्टवृत्तितया गृह्यमाणोऽनिष्टवृत्तितया वाऽगृह्यमाणो धर्मः स्वाश्रये प्रवर्त्तक इति स्वध
र्मो रजते रजतत्वं रंगे रजतसादृश्यं एवं निवृत्तावपीति न युगपत्प्रवृत्तिनिवृत्ती इति तन्न एवं हि इमे रंगरजते इति शुक्त्याभा
साद्रंगरजतयोः प्रवृत्तिनिवृत्ती न स्यातां रंगे रजतवृत्तिधर्मस्य रजते रंगवृत्तिधर्मस्य च शक्त्यानुपस्थितेः न च शक्त्यानंतरं प्र
त्यक्षेण तदुपस्थितिः तत्र हेतुर्न शक्त्या इति वाच्यं अनन्यथासिद्धशक्त्यानुविधानात् इमे रंगरजते इति स्वज्ञानं यथार्थमनादृत्य
तत्रैव इमे रंगरजते इति प्रतारकवाक्यविश्वासेन प्रवृत्तिनिवृत्तिदर्शनाच्च इतरे तु रजते रजतत्वं न गृह्यते दोषात् तथा च रजतवृत्ति
तयाप्यावदुपस्थितधर्मस्य रजतत्वेन भेदाग्रहान्न प्रवर्त्तते रंगवृत्तितयाप्युपस्थितस्य कस्यचिद्धर्मस्य रजतत्वेन भेदाग्रहाद्रंगे प्रव

चिंता·मू·
२९

र्तत एवं निवृत्ता वृप्रियपात् वभ्र भेदग्रहेपि मानान्तराभेदग्रहः प्रतिबंधकः। तथा रजते रजतभेदाग्रहेपि रजतवृत्तितया यावदुप
स्थितस्य रजतत्वेन सम्भेदग्रहः प्रतिबंधक इति तन्न। एतदपेक्षया विशिष्टज्ञानस्य लघुत्वेनान्वयव्यतिरेकाभ्यां च हेतुत्वात्। न
च हेत्वाभावः प्रत्यभिज्ञानवत् संस्कारेन्द्रियाभ्यां विशिष्टज्ञानस्य संभवात्। तस्मात् ज्ञानद्वयविभेदोच्छेदः तस्य तदेकमानत्वात्। न
चैकविषयत्वेनयोः परस्परसहकारितानाम विशिष्टनामिप्रत्यक्षप्रत्यभिज्ञाने तत्रांशे न तदृभावाधीरवाद्व नचातिप्रसंगः भेदग्र
हस्यापि न हेतुत्वात्। अथ प्रत्यभिज्ञायाएकत्वेपि तत्रांशेन साक्षात्कारित्वं तत्रेन्द्रियासन्निकर्षात् ज्ञानजन्यत्वाद्ध किं तु स्मृतित्वं पु
रोवर्त्यंभेदांशे साक्षात्त्वं स्मृतित्वमनुभूतित्वं च न जातिरव्याप्यवृत्तिर्वेति चेन्न हि संस्कारादसन्निकृष्टमपि नासन इति नवाप्यनु
मतं तथा च तत्त्वे वरीत्या प्रत्यभिज्ञानवदिदं रजतमित्येकं ज्ञानमस्तु तस्या मयथार्थत्वात्। मनःसिंद्रियजन्यत्वात्। मान्यमन्यकारणका सा
क्षात्कारित्वमेवोभयज्ञानानुपपत्त्या साक्षात्कारः सतदिन्द्रियसन्निकर्षजन्यः। न च रजते सइहाक्षी निचेन्न प्रत्यभिज्ञाया मिन्द्रिय
जन्यतया साक्षात्कारित्वेन तत्रांशेनान्निचव्यभिचारात्। संस्कारस्य स्मृतेर्वा प्रत्यासत्तित्वाद्व। न च रजतत्वं प्रत्यक्षं पुरःसत्व
यस्य प्रत्यासत्तित्वेन हेतुता सं विनानत इति वाच्यं। तद्विशिष्टज्ञाने विशेषणज्ञानोपक्षीणत्वेन तत्र तस्याहेतुत्वात्। न हि विशिष्ट
धीसामग्रीसत्त्वे ननेनविनात द्विलंबः। किंच विशेषणज्ञानं विशेष्यसंबंधः। तयोरसंसर्गाग्रहश्चेति प्रत्यभिज्ञासत्यज्ञस्य तस्याका रामः २९
रणस्य विशिष्टमत्यक्षहेतोर्भ्रमेपि सत्त्वाद् रजतसाक्षात्कारे रजतसंयोगस्य हेतुत्वेपि विशेष्यसन्निकर्षत्वेन हेतुतान तु रजतसं
योगत्वेनैव सामान्ये परसामान्यहेतुत्वद्विशेषे तद्विशेषे तद्विशेषस्य हेतुत्वनियमात्। संयोगस्य विशेष्यभानसामग्र्यंतर्गतत्व

नान्यथासिद्धतया विशेषसामग्र्यंतराकल्पनात्। गौरवाद्व। प्रत्यासहेतुत्वेन कल्पनविशेष्यसंबंधादेव तदुपपत्तेः। अपि च भ्रमत्वो
त्पत्तौ पश्चिमेष्टभेदाग्रहकारणतापेक्षया रजतसाक्षात्कारे विशेष्यसन्निकर्षत्वेन हेतुत्वस्य लघुत्वात्। वस्तुतस्तु दोषात् भ
इत्युभयसिद्धं तत्र भ्रमोनासंसर्गग्रहाभावः। तस्याधिकरणरूपस्य साध्यत्वात्। तज्ज्ञानरूपत्वे च तस्य प्रमात्वेन दोषाजन्यत्वात्।
भ्रमस्याना मिषिक्ता भ्रमे च दोषजन्येति चेन्न तस्याः कृप्तसामग्र्यंतरजन्यत्वादिति भ्रमो। सत्यज्ञानमिति असन्निकृष्टेपि दोषात्
नामतत्त्वत्युपेयं अपि च दोषस्यापि विशिष्टज्ञानमेव व्यापारः प्रवृत्तौ न हेतुत्वस्य कृप्तत्वात्। न च भेदाग्रहः कल्पनीयः कारणा
भावत्वात्। पत्रु ·दृष्टाकार्यं नेति तन्न वाजेन्द्रियसाधारणं दुष्टत्वं नैकमस्ति एवं प्रत्यक्षमप्यन्यथाख्यातौ मानं कारणबाधाभाव
न तथाहि इदं रजतं तथा जानामीत्यनुव्यवसायसाक्षिकमेवान्यस्यान्यथा भानं न हि विषयत्वे नुव्यवसायादन्यत्प्रमाणमस्ति
न रजतं विषयमज्ञानविषयत्वेन न वा तद्विषयकं तद्विषयत्वेनानुव्यवसीयते अनुव्यवसायस्य प्रमात्वनियमात्। अन्यथा पर
ज्ञानेपि कदाचिन्न रजतं जानामीति स्यात्। न च भेदाग्रहदशायां रजतज्ञानविषयत्वासंसर्गाग्रहः शुक्तौ भेदग्रहेपि शुक्तौ रजतत्वेन म
या ज्ञातमप्यशुक्ती रजतज्ञानं मम वृत्तमित्यनुव्यवसायात्। अथ विचारसाध्यासंसर्गग्रहबाध्योयमसंसर्गाग्रहः तेन विना भेदग्रहेपव
शिष्टमितिचेन्न। इदं रजतं तथा जानामीत्यत्र शुक्तिकर्मक रजतत्वप्रकारकज्ञानासंसर्गाग्रहस्याभ्युपगमे ज्ञाना प्र
सिद्धे। न चेदं जानामि रजतं जानामीति द्वाकारः तृतीयार्थस्य प्रकारत्वेन प्रकारिणोऽभाने भानप्रसंगात्। विशिष्टज्ञानं च
सर्वत्र विशेषविशेष्यीयमित्यन्यथाभानमपि तथाज्ञाने रजतताकारानभ्युपगमात्। विशेषणविशेष्याविषयत्वाद्व तत्साकार

चिंता॰मू॰ वांदः। यत्तु धियां मिथ्यात्वेन बाध्यबाधकभावव्यवस्था न स्यात् अविशेषादिति तन्न अनन्यथासिद्धधियो बाधकत्वात् तथा हि यत्र दुष्टादुष्टे
३० न्द्रियजन्यं परस्परनिरपेक्षमेकत्र ज्ञानद्वयं विरुद्धमुत्पद्यते तत्र प्रथममनुपजातविरोधित्वात् ज्ञानानागतं बाधते तस्याप्राप्तत्वात् उत्तरं
तु स्वकारणादुत्पद्यमानमुपजातविरोधितया नानुपमृद्य पूर्वमुत्पत्तुमर्हतीति पूर्वबाधात्मकमुत्पद्यते अन्यथा नोत्पद्येतैव नन्वेवम्
वैतिवाच्यं अनुभवविरोधात् यदाहुः पूर्वात्परं बलीयस्त्वं तत्र नाम प्रतीयते अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेदिति यत्र पूर्वा
पेक्षमुत्तरं ज्ञानमुत्पन्नमुत्पत्स्यते तत्रापजीव्यपूर्वं पूर्वविरोधेनोत्तरं नोत्पद्यते अतो जातं स्वरूपं पूर्वं बाधते तां यथा प्रत्यक्षादि विरुद्धानु
मितिः ननु भ्रमस्य किं बाध्यते न स्वरूपं तस्य सत्त्वात् नापि रजतत्वप्रकारकत्वं शुक्तिविषयकत्वं वा तयोरपनेतुमशक्यत्वात् ज्ञातस्व
जनकत्वेन शुक्तिविषयीकृत्य नापि व्यवहारः प्रवृत्त्यादेर्वृत्तत्वात् नापि अनागतव्यवहारजनकत्वं तस्य कारणाभावादेवासंभवात् उच्य
ते बाधकेन भ्रमस्य अप्रमात्वबुद्धिरेव बाधः यत्तु धियामयथार्थत्वे कथमाश्वासः इति तन्न अप्रामाण्यग्रहोपायस्य दर्शितत्वात् सत्यत्वनि त
यमेपि सदसंसर्गाग्रहस्याग्रहीतसंसर्गस्य ज्ञानद्वयस्य बहुदर्शनात् कथमाश्वासः अथ सदसंसर्गाग्रहस्य प्रतिसंधानं विजेदि
तं संदिग्धत्वे आचार्यस्थितमित्यौत्सर्गिकसद्विषयत्वज्ञानादाश्वासः यत्र तु कदाचित् संशयस्तत्र ज्ञानान्तरात् तन्निवृत्तिरिति चेत् समा रामः
औत्सर्गिकत्वं धियामसत्त्वं बाधकेन क्वचिदपोद्यत इति तदनवतारात् सत्यत्वविश्वासः किंच ज्ञानान्तरेष्वविश्वासो विशेषदर्शना ३०
दविश्वासस्तु स्वत एव यथा वचनत्रापि संदेहः तथोक्तं परतः प्रामाण्ये ज्ञानेष्वनुस्मृतयोग्यवैधर्म्याभावो बोधिकरणं तत्ज्ञानं वा तद्वत्प्रत्यक्ष
न एवं गृह्यत इति युक्तो विश्वासः अथ योग्यभेदके धिकरणे वा भेदसंशये ज्ञानान्तरादविश्वास इति तन्न उभयत्रापि ज्ञानान्तरादविश्वासस्य

तुल्यत्वेन शिष्यवंचनमात्रपरत्वात् वस्तुतस्तु भेदाग्रहाभेदाग्रहाद्वा भेदव्यवहारोपपत्तावभेदविषयत्वं क्वापि नास्तीति रूपं सद्वि
षयत्वसिद्धिः यत्तु न दोषो हेतुरिति तन्न फलबलेन तथात्वात् अयं इदं रजतमिति ज्ञानं रूपमयथार्थं इदंत्वरजतत्वयोः सत्वा
त् न च तदुभयतादात्म्यमसत् तदुभयतादात्म्यं वेत्यतोधिकस्याभावात् तयोश्च सत्वात् असत्वे वा असत्ख्यातिः एवं संसर्गारो
पोपीति उच्यते सन्मात्रविषयत्वेपि तदभाववति तत्प्रकारत्वं प्रकारव्यधिकरणविषयताकत्वं वा अयथार्थत्वं वा प्रागवस्तुता
दात्म्यसंसर्गयोरसतयोरेव विषयत्वमन्यते न चैवमसत्ख्यातिः सदुपरक्तस्यासत्वेनासतः ख्यात्यनभ्युपगमात् सदनुपरक्तस्या
खण्डस्यासत्त्वेनासतः ख्यातिरसतः ख्यातिर्नाभ्युपेयते कारणाभावात् तदनुपपत्तिस्तुल्यैवेति चेन्न अत्रैव विशिष्टज्ञानसामग्र्या दर्शि
तत्वात् तदुक्तं वाचस्पतिमिश्रैः तस्माद्यदन्यथा सिद्धमनन्यथा प्रतिपद्यते तन्निरालंबनं ज्ञानमसदालंबनं च तदिति ॥ सा च प्र
मा चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दभेदात् एवं तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् अन्ये
षामप्यप्रमात्रैवान्तर्भावः तथा च वक्ष्यामः तत्र ननु तावत्प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारि ज्ञातानुमि
तिस्मृत्योः ज्ञानमात्रेणातिव्याप्तेः आत्ममनोर्थस्य मनसेन्द्रियेण संयोगात् तदुत्पत्तेः ईश्वरप्रत्यक्षाव्याप्तेः सन्निकर्षस्य संयोगादि
त्वेनाननुगमाच्च संयोगाद्यन्यतमत्वस्य वा निर्वाहे तैकपरत्वे भागासिद्धिः इतरभेदसाधने व्यर्थविशेषणत्वं च इन्द्रियार्थयोरे
कैकजन्यत्वलक्षणत्वे व्यर्थविशेष्यत्वं न च तयोरेकैकजन्यत्वमेव लक्षणं आत्ममनोजन्यत्वेन ज्ञानमात्रेण गतत्वात् इन्द्रियत्वस्य
प्रत्यक्षनिरूप्यत्वाच्च नापि ज्ञानाकरणाजन्यत्वे सति तत्सत्योनुभवः प्रत्यक्षं लिंगादेरजनकत्वे यान तत्ज्ञानस्याज्ञातस्य करणत्वेना

चिंता·मु१ ३१

नुमित्यादौ गततात्·ज्ञानाजन्यो नुभवः सत्य इत्यपि न विशिष्टप्रत्यक्षाव्याप्तेः तस्य विशेषणज्ञानजन्यत्वात् नापि सत्यत्वे सति
साक्षात्कारित्वं नियतव्यंजकाभावेन गृहीतुमशक्यत्वात्·तस्य जातित्वासिद्धेः सत्वेवा तदेव लक्षणं व्यवहारनिमित्तमस्तु व्यवहा
रे ज्ञात्या·उच्यते·प्रत्यक्षस्य साक्षात्कारित्वं लक्षणं चाक्षुषादिज्ञाने साक्षात्करोमीत्यनुगतबुद्धेर्बाधकं विना जातिविषयत्वात्
न चेंद्रियजन्यत्वं तथा अन्योन्याश्रयात्·इंद्रियस्यातींद्रियत्वाच्च·न च नियतव्यंजकाभावान्न जातिः गोत्वादौ सास्नादेरेवानु
गतस्यापि चक्षुःकरणकानुभवत्वादेर्व्यंजकत्वात्·न च जातावनुगतव्यंजकनियमः ज्ञानेच्छाप्रयत्नसुखदुःखत्वादौ तद
भावात्·प्रत्युत नियतव्यंजकविशेषो जात्यसिद्धिरेव तत एवानुगतबुद्ध्युपपत्तेः निर्विकल्पकेश्वरयोगिप्रत्यक्षे च प्रत्यक्षत्वं धर्मि
ग्राहकमानसिद्धं योगजधर्माजन्यजन्यस्वविषयकसविकल्पकाजन्यसामान्यलक्षणप्रत्यासत्त्यजन्यजन्यप्रत्यक्षस्य लक्ष
णमनागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यजन्यजन्यसाक्षात्कारित्वं·अन्ये तु सामान्यज्ञानप्रत्यासत्त्योरिंद्रियविशेषणता तदभाव
न्नभावात्·तदन्यप्रत्यक्षं संग्राह्यमेवेति·यद्वा विशेष्यत्वेन स्वविशेष्यजन्यज्ञानजन्यप्रत्यक्षं ज्ञानविशेष्यकानुमितिज्ञानस्य ज्ञान·
तिपु तस्य विशेष्यत्वेन न हेतुत्वं·विशेष्यं विनापि तासामुत्पत्तेः किंतु समवायित्वेन यद्वा इंद्रियजन्यं ज्ञानं जन्यप्रत्यक्षं इंद्रियं तु ३१
जनकत्वं विवक्षितं जन्यप्रत्यक्षमात्रे नेंद्रियत्वेन चक्षुरादीनां कारणता अनुगतकारणं विनानुगतकार्यस्याकस्मिकत्वापत्तेरनु
त्यनुमित्यादौ च मनस इंद्रियत्वेन न हेतुत्वं·किंतु मनस्त्वेन अन्यथा स्मृत्यादेः साक्षात्कारित्वापत्तेः इंद्रियत्वं च स्मृत्यजनकज्ञान
कारणमनःसंयोगाश्रयत्वं प्राणशरीरात्मानश्च स्मृतिजनकमनःसंयोगवंतः शरीरे इंद्रियं त्वविशेषगुणानाश्रयत्वे सति ज्ञानह

ग१

तु मनःसंयोगाश्रयत्वं वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति वयं विशिष्टप्रत्यक्षे च विशेषणज्ञानं न कारणं व्यापाराभावात्·विशि
ष्टवैशिष्ट्यप्रत्यक्षे विशेषणज्ञानं हेतुर्न तु विशेषणविशेषणधीरपि विशेषणधीद्वारा करणं मानाभावात् प्रत्यभिज्ञायां तु
च स्मृतिः कारणं न तु संस्कारद्वारानुभवः करणं तस्याः संस्कारजन्यत्वे स्मृतित्वापत्तेः स्मृतित्वे लाघवेन संस्कारजन्यत्वस्य तंत्र
त्वात्·[illegible] साक्षाद्धीः प्रत्यक्षं साक्षात्त्वं च न जातिः नियतव्यंजकाभावात्·नापि सविकल्पकानपे
क्षज्ञानजन्यं [illegible] दिवादि प्रत्यक्षाव्यापनात्·किंतु पज्ञानं यद्विषयत्वे सविकल्पकाजन्यं तत्र तत्साक्षाद्धीः मितिमात्र प्र
[illegible] प्रत्यक्षं ज्ञानाजन्यत्वात् जातावनुगतधीरपि प्रत्यक्षा जातिव्यक्तिनिर्विकल्पकजन्यत्वात्·सा द्रव्यपदिविशि
[illegible] न विशेषणग्रहं तु गते न विनापि युगपदिंद्रियसन्निकर्षे विशिष्टप्रत्ययोदयात्·दीर्घादिप्रत्यक्षे च नस्त्वा
दे [illegible] नु मित्यादरमेयांशे प्रत्यभिज्ञायाश्च तदंशे ज्ञानजन्यत्वान्न प्रत्यक्षत्वं·किंतु परोक्षत्वमेवमितिमा
[illegible] यत्तु·तत्र प्रकारज्ञानं तत्रासविकल्पकत्वेन कारणता किंतु तत्राज्ञानत्वेनेति·तन्न·अनुमि
[illegible] ज्ञानत्वेनानुमित्यादि ज्ञाने हेतुत्वादिति·अत्रोच्यते·यदि प्रत्यभिज्ञातत्र परोक्षानुभवरूपा तदा नोत्पद्येत
[illegible] तत्र ज्ञानसहितेंद्रियं जनकमिति चेत्·न हींद्रियजन्यत्वात्तत्र साक्षाद्धीरेवस्यात्·न च ज्ञानानपेक्षेंद्रियज
[illegible] गौरवात्·ज्ञानसहितेंद्रियजन्यत्वे नेदं तांशे प्रत्यक्षत्वप्रसंगाच्च·न ह्येकस्मिन् ज्ञाने जनयितव्ये तदपेक्षा तदनपेक्षा च
संभवति·अंशे तु भवन्मते [illegible] इति चेत्·ज्ञाने अंशस्य विषयत्वे न तदजन्यत्वात्·एवं मितिमात्रांशेपि न सर्वज्ञानं प्रत्यक्षं इंद्रियाजन्यत्वा

चिंता·प्र॰ ३२ तत्साक्षात्कारे तस्य कारणत्वात्· मनोग्राह्यत्वेनुमेयांशे तत्प्रसंगः न च ज्ञानमात्रसामग्रीजन्यत्वं प्रत्यक्षत्वं तत्रं गौरवात्
·ज्ञानमात्रं च न ज्ञानत्वं तस्या जन्यत्वात्· नापि सर्वज्ञानं प्रत्यक्षज्ञाने प्रत्येकं सर्वज्ञानसामग्र्यजन्यत्वात्· सर्वज्ञानसामग्र्यत्र
सिद्धेश्च· अपि च ज्ञाने व्ययवाभावेनांशे विषय एव विषये च न ज्ञानं कारणं मनोनुमितिः प्रत्यभिज्ञयोः स्वविषये नुमेये तत्रां
शे च प्रत्यक्षत्वं स्यात्· विषयस्य सविकल्पकाजन्यत्वात्· अथ प्रत्यभिज्ञायां तत्ताविषयत्वे तत्ज्ञानं कारणमेवमनुमित्या
दौ मेयविषयत्वेपि मितिमात्रं शे इदंताधर्मिविषयत्वे च ज्ञानं न कारणं किंतु ज्ञानसामग्रीति चेत्· सद्विषयत्वं हि ज्ञाने स्वकार
णाधीनं तदीयस्वभावत्वे स्वभावविशेषः स च ज्ञानजन्य एव इदं हि ज्ञाना दोषाभ्यां भि·· तस्मादनुमित्यादिवद्विशिष्टज्ञानत्वेन विशे
षणज्ञानजन्यत्वात्· न च परोक्षत्वमुपाधिः प्रत्यभिज्ञायां प्रथमोत्पन्नजातिव्यक्तिज्ञानजन्यजातेरनुगतप्रत्यक्षे च साध्या
व्यापकत्वात्· पूर्वव्यक्तिरन्नित्येसत्येतद्व्यक्तिवृत्तित्वमनुगतत्वमिति· तत्र पूर्वानुगतत्वं रूपे विशेषणत्वेन तत्ज्ञानस्यानुगतत्व
प्रत्यक्षे कारणत्वात्· अन्यथा प्रथममप्यनुगतत्वप्रसंगः·· अत एव ज्ञानसाक्षाद जन्यं ज्ञानं प्रत्यक्षं प्रत्यभिज्ञायां संस्कार एव तु रामः
साक्षाज्जनकः· जातावनुगतत्वधीरपि संस्कारजन्या एवं सादृश्यादिप्रत्यक्षेपि प्रत्यभिज्ञायोगिसंस्कार एव कारणमिति निरस्तं· ३२
दृष्टानुभवजन्यदृष्टिप्रत्यक्षे धारावाहिकप्रत्यक्षे चाव्यापनात्· उत्तरविशिष्टज्ञाने च पूर्वविशिष्टानुभवस्यैव विशेषणज्ञान
त्वेन हेतुत्वात्· संस्कारस्यानरणतराजनकत्वाच्च· अन्यथा प्रत्यभिज्ञादेः संस्कारजन्यत्वेन स्मृतित्वं स्यादित्युक्तादिति प्रत्यक्ष
विशेषसन्निकर्षविशेषो हेतुरननुगत एव संयोगेन द्रव्यग्रहः· संयुक्तसमवायेन रूपकर्मगोत्वादेर्ग्रहणं संयुक्तसमवेतस

मवायेन रूपत्वादेर्ग्रहणं समवायेन शब्दस्य समवेतसमवायेन शब्दत्वादेर्विशेषणतया शब्दाभावस्येंद्रियसंबद्धविशेषण
तया समवायघटाभावादेर्योग्यसन्निकर्षग्रहो न तु सन्निकर्षमात्रात्· अयमसूक्ष्मावयवावच्छेदेनावयविसंयोगेपि न तद्ग्रह
इति महावयवावच्छेदेन संयोगो हेतुः· तथा चावयवेंद्रियसंयोग एव हेतुः न च योग्यसंयोगावच्छेदकावयवसंयोगापेक्षया
ग्राह्यसंयोगस्य लघुत्वात्स एव हेतुः तस्यातिप्रसक्तत्वात्· एते नस्वावयवसंयोगापेक्षयास्त्वसंयोगस्य लघुत्वात्· स एव हेतु
रस्त्विति निरस्तमतिप्रसंगात्· नाप्यवच्छेदकसंयोगेनान्यथासिद्धेः तत्राप्यवच्छेदकान्तरसंयोगेनान्यथासिद्धिरिति संयोगो हे
तुरेव तस्यादिति वाच्यं· सूक्ष्मावयवावच्छेदेनावयविसंयोगेन द्रव्यग्रह इति अल्पतरभागावच्छेदेनावयवसंयोगोपि न हेतुस्त
दवच्छिन्नावच्छेदकान्तरसंयोगेन महावयवावच्छिन्नमहावयवेंद्रियसंयोगहेतुत्वं लघनमित्यर्थः· अल्पतरतमभागावच्छेदे
न संयोगस्य हेतुत्वे अतिप्रसंगादिति मैवं· द्रव्यग्रहे अवयविमात्रग्रहे वा स्थूलावयवावच्छेदेनासंयोगो न हेतुः· आलमत्रसरेणुसू
क्ष्मग्रहे व्यभिचारात्· किंतु घटादिग्रहे स हेतुः· एवं चाल्पादि द्रव्यग्रहो ग्राह्यसंयोगजन्य इति· घटादिग्रहोपि तद्देवग्राह्यसं
योगजन्य इति· तस्मिन्सत्यपि घटादिग्रहो नास्तीति यदि तदा स्थूलावयवः संयोगावच्छेदकोस्तु तत्संयोगोपि वा हेतुः· न तु क
ग्रहहेतु परित्यागः· ननु संयुक्तसमवायेनावयविग्रहोस्तु न संयोगस्तत्र हेतुस्तस्य रूपादिग्रहे क्लृप्तत्वात्· न च लाघवात्संयोग
एव तथा तस्य कल्पनीयकारणभावत्वादिति चेत् न· आत्मग्रहे इंद्रियसंयोगस्य कारणत्वादन्यत्रापि द्रव्यसाक्षात्कारत्वेन त
था कल्पनात्· न च बहिरिंद्रियद्रव्यग्रहे वयविग्रहे वा संयुक्तसमवायः कारणं लाघवेन संयोगस्यैव कारणत्वेन कल्पनात् न

चिंता॰म॰१ त्वसंयुक्तसमवायो न गंधग्राहकः किंत्वाश्रयसंयोगः। एवं गंधत्वग्रहोप्याश्रयाश्रयसंयोगादिति। संयुक्तसमवेतसमवायोपि न
३३ हेतुः न च गंधे सति गंधसमवायं विना तद्ग्रहः किं न चैवं संयुक्तघटेनापि गंधग्रहः स्यात् गंधग्रहे गंधस्यापि हेतुत्वात् न च गं
धस्य प्रत्यक्षत्वेनेंद्रियसन्निकर्षाश्रयत्वमनुमेयं ग्राह्यप्रत्यक्षहेतोः समवायस्य गंधेपि सत्वात् गंधेंद्रियसन्निकर्षसाधने साध्या
प्रसिद्धेः मैवं गंधसमवायिसंयोगस्य हेतुत्वे हि पार्थिवगंधसमवायस्य विशेषणतातदा स हेतुरेव उपलक्षणत्वे च संयुक्तद्रव्यमा
त्रमुपलक्ष्यं तथा च घटसंयोगात्पटे गंधग्रहप्रसंगः आश्रयस्य समवायिसंयोगो हेतुस्तत्र स्वसमवायोऽवच्छेदक इति चेन्न हि संयो
गिसमवायस्य हेतुत्वे संयोगोऽवच्छेदकः समवायो हेतुरिति तुल्यं न च तत्परिहारस्य क्षोभपरिधानमित्युच्यते आश्रयसंयुक्तसमवायो
न संयोगः न समवायः उभौ वा गंधेंद्रिये वाच्यम् न चेंद्रियेण गंधस्य परंपरासंबंधः परंपरा हि संयोगसमवायावेव तत्र च विशे
ष एव नाधिकोपसिद्धांतादिति चेन्न इंद्रियतत्संयोगतदाश्रयतत्समवायानामेव परंपरासंबंधत्वात् अन्यथा नीलत्वजातेः पर
परासंबंधित्वेन वस्त्रचर्मकंबलादिषु नानुगतव्यवहारोच्छेदः ननु संयुक्तसमवेतसमवायाद्रूपत्वादिग्रहस्तदभावाद्विनिवेचन्न
तदनभ्युपगमेपि रूपादिसाक्षात्कारस्य तन्नियामकत्वात् न च नव्यसाक्षात्कारादेव नव्यवहारः बाधकं विना प्रतीतावविशेषात् विपरीतत्वाप रामः
त्तेः आश्रयासादृश्येपि रूपरसगंधादेः साक्षात्कारानुभवाच्च रसत्वगंधत्वमधुरत्वसुरभित्वादिस्त्र जातिरनुगतप्रत्ययात् रूपेतु ३३
यद्यपि इदं नीलमिदं पीतमित्यादावनुभवानत्विदं रूपमिति तथापि नीलो वर्णः पीतो वर्ण इत्यनुगतवर्णाकारबुद्धिरस्तु रूपत्वे प्र
माणं न च चक्षुराद्येकैकमात्रग्राह्यत्वं रूपत्वादिकं। बाधकं विनानुगतमतेर्जातिविषयत्वात् इंद्रियातींद्रियत्वेन चक्षुराद्यग्रहेपि रू

पत्वादिप्रतीतेः न त्वननुसंहितोपाधेरुपहितप्रत्ययः अतींद्रियरूपरसगंधानुमानापत्तेश्च योग्यतायां रूपत्वादिनिरूप
त्वात् यद्यपि त्वन्मते नीलपीताद्येकैकमेव नानात्वं नातींद्रियं तथापि चक्षुर्घ्राणादिरूपस्यालोकपृथिव्यादिरूपाभिन्नत्वेन प्र
त्यक्षत्वप्रसंगः नैवं क्रमेण रूपमुद्भूतमनुद्भूतं च संभवति विरोधात् रूपत्वादिना परस्परव्यावृत्ततया तस्य रूपादेरुपलब्धा
तत्करणत्वेन परस्परव्यावृत्तचक्षुराद्यनुमितिः परस्परव्यावृत्तचक्षुराद्यनुमितौ च चक्षुर्ग्राह्यत्वादिना रूपादिपरस्परव्यावृत्त
धीरित्यन्योन्याश्रयाच्च नीलपीतादिप्रतीतौ भिन्नभिन्नकरणप्रसिद्धावपि तत्करणग्राह्यत्वस्य सर्वरूपेष्वसिद्धेः ननु नीलपीताद्युप
लब्धिकरणेषु गंधरसस्पर्शानभिव्यंजकत्वे सति नीलादिव्यंजकत्वदालोकवदिति तैजसत्वं साध्यते तैजसेंद्रियग्राह्यत्वेन नीला
दौ रूपाकारानुगतधीः एवं गंधादावपीति चेन्न एवं प्रणालीज्ञानाभावेपि रूपरसादावनुगतप्रत्ययात् नीलाकारानुगतबुद्धेर्नील
त्वं जातिः न च चक्षुर्ग्राह्यत्वं तत्पीतादौ गतत्वात् ननु एकैकाऽवनीलपीतादिव्यक्रूपो न नाना मषीनीलिनीलिमषीभेदप्रसंगोपि न त्वे
न प्रत्यभिज्ञानात् न चानेकव्यक्तिवृत्तित्वे नित्यत्वे च जातित्वापत्तिः जातेः संस्थानमात्रव्यंग्यत्वात् अवयवव्यवहितवृत्तित्वाद्
नाशपाकभावानुपपत्तेश्च नीलनरादिप्रतीतिश्च तदन्यरूपासंभवादिति चेन्न पाकेन रूपांतरे एकमनुत्पन्नमित्यत्र बाध
न च मानाभावो बाधकाभावात् न चोत्पादविनाशप्रत्ययस्य समवायो विषयः तदनुपपत्तेरेवात् एवं च मधुरत्वतिक्तत्वकटुत्वादि
कषायत्वाम्लत्वरसत्वभावगंधगंधत्वाभावे किं कतं स्यात् नीलादितुल्यत्वात् एवमस्तीति चेत्तन्न तेषामुत्पादविनाशानुभ
वान् एकैकत्वमधुरत्वाद्यनुपपत्तेश्च ननु श्रोत्रसमवायेन शब्दग्रहे सर्वत्र शब्दग्रहः स्यात् नच कर्णशष्कुल्यवच्छेदेनेति

चिंता॰मू॰ श्रोपि गृह्यते अवछेदस्याकाशत्वेनाविशेषात् न द्रव्यत्वेन शब्दस्य तत्रासमवायात् तस्माच्छब्दोयं प्रतियोग्यः तेन गृह्य
३५ तेनान्यः न च पुरुषविशेषं प्रतियोग्यत्वं न स्वरूपमननुगमात् न जातिः तस्यानिःप्रतियोगिकत्वात् नाद्दिगोः कंचित् प्रत्यगो
शिति वाच्यं सप्रतियोगिकत्वं हि न सावधित्वं दीर्घादिवन्नापीतरधीनिरूप्यत्वमभाववत् किंतु शब्दग्रहे मा जातिः कारणं तदव
छेदिका वा अत एव न कुर्वद्रूपत्वप्रसंगः सहकारितास्वीकारात् सर्वसाधारणत्वमिति चेन्न एवमेवैकत्वेन व्यवह्रीयमाणत्वात् गोत्व
पि तद्वत्तत् शब्दमात्रस्य योग्यत्वमननुगतमेव गुणयोग्यत्ववदिति मैवं शब्दस्य प्रत्यक्षत्वेन प्रत्यासत्तिसाधनात् न च सम
वायोतिप्रसक्तोन्योनाभ्युपगम्यत इति वाच्यं कर्णसंयोगावछिन्नसमवायस्य प्रत्यासत्तित्वात् कर्णसंयोगो हि समवायस्या
शब्दाधारतायां परिचायक एवं चेह शब्दो नेह शब्द इत्यनुभवात् शब्दस्याव्याप्यवृत्तित्वसिद्धे यस्य शब्दस्य समवायस्याधार
ता कर्णसंयोगेनावछिद्यते स गृह्यते यस्य तु हस्तं ताडनादेनावछिद्यते स न गृह्यते यथा संयोगस्य समवायेनाधारता हस्त
संयोगेनावछिद्यते न तदभावेनेति हस्तसंयोगावछेदेन गृह्यते नान्यत्रान्यथा हस्तसंयोगस्यानवछेदकत्वे सर्वत्र तुल्यमिति राम॰
संयोगस्यापि सर्वत्रोपलब्धिः स्यात् नन्वेवं समवायो व्याप्यवृत्तिः समवायेन शब्दस्य तस्याधारतावृत्तित्वात् अभावस्तु विशे ३५
१ त्वे षणतया व्याप्यवृत्तिरेव न चैवं सर्वत्र सर्वोपलब्धिः स्यात् शब्दसमवायस्य प्रत्यासत्तित्वात् अथ वीणादौ शब्द
त्यबाधितानुभवात् तत्र तदवछिन्नं नभःश्रोत्रं न तु कर्णावछिन्नमेव कर्णे न शब्दः किंतु वीणायामित्यनुभवात् कान्यथा कर्णे श
ब्द इति धीः स्यात् न वीणानंतवीणाद्यवछेदकत्वेन न श्रोत्रस्वीकारे गौरवं शब्ददेशत्वेनैकत्वे चातिप्रसंगः सर्वदेशानां शब्दावछेदक

त्वादिति वाच्यं वीणादिदेशतया शब्दस्य बाधकं विना प्रमाणत्वे गौरवस्याप्रयोजकत्वात् प्रत्युत सर्वतो दिक्ष्वनंतशब्दसंतानोत्पादक्रमेणैक
णोत्पादे कल्पना गौरवं नानाभावात् न च दूरसन्निधानयोः शब्दानामबाधिततारमंदत्वादिवैधर्म्यप्रतीत्याभेदासिद्धेः संतानसिद्धिः दूर
त्वादिदोषात्तारत्वाग्रहे मंदत्वारोपादुपपत्तेः अव्यवहितकर्णे शब्दानुत्पादवद्व्यवहितेन शब्दस्यानुपलब्धिः निमित्तवायुसंयोगाभावात् न तु
व्यवधानाभावस्य हेतुत्वात्तस्य सन्निध्युपक्षीणत्वात् कर्णानुपघातोपि हेतुरिति न तदुपघाते शब्दाग्रह इति मैवं कर्णावछेदेनापि शब्दग्रहा
त् कर्णशष्कुल्यवछेदकेति कर्णावछिन्नमेव नभःश्रोत्रं लाघवादवछेदकत्वालाघवात् शब्दमात्रग्रहे तदनुविधानात् साक्षान्मांसमात्रधनस्य शरी
रसंयुक्तस्य सत इंद्रियत्वात् कर्णे न वीणाशब्दं शृणोमीति तत्करणत्वेनाबाधितानुभवाच्च न तु वीणादिकमनन्यतावछेदमात्रग्रहे तदनु
विधानाद्वीणाद्यवछिन्नस्य नभसः शरीरासंयुक्तत्वेनानिंद्रियत्वात् वीणायां शब्दं शृणोमीत्यनुभवाच्च कथं तर्हि वीणायां शब्द इति ज्ञा
नं श्रूयमाणशब्दस्य तदनधिकरणत्वादिति चेन्न न हि सर्वत्र शब्दे मृदंगाद्यधिकरणग्रहे नियमः अन्यथा क्वचिदपि शब्दसंदेह
विपर्ययनहनुत्वेरवानामनुपपत्तेः यत्राप्यस्ति तत्र शरीरे सुरतमितिवदुत्पन्नेपूरं परया वीणाद्यपेक्षणात्तदधिकरणत्वं तत्र वापि वीणा
याः शब्दाश्रयत्वेन तस्य वाधिकरणत्वात् नन्वेवं कर्णेनेकगकारोत्पादेनैकग्रहप्रसंगः न चैकग्रहेन्यग्रहसामग्रीप्रतिबं
धिका कोलाहले तथा दर्शनादिति चेन्न तारेण मंदाभिभवात् तुल्यत्वे चानेकग्रहस्येष्टत्वात् भेदाग्रहस्त्वेत्यं न साकल्यात् एवं च वी
णादेरश्रोत्रत्वेमेत्रणाहमनुं वा कमध्यपितोयशीतंतत्पाम्रतंतन्मया प्रीत्यादिप्रतीतीनां तदुच्चारणादिप्रयोज्यज्ञानीयत्वं विष
यः शब्दे हि कारणविशेषप्रयोज्यानातिरवत्त्वं वाच्या अन्यथा शब्दविशेषणपुत्राद्यनुमानं न स्यात् जातिं विना विशेषांतराभावात्

दिनं·मू· एवंच कर्णावच्छिन्नस्यनभसःश्रोत्रत्वेन वीणादिप्रभवशब्दग्रहो न स्यात् संतानक्रमेणोत्पादं विनैतत्पन्नन्यगतिकतया तत्कल्पनं
३१ पिशाचमापि कीदृशशब्देन वायुव्यवहितपरमाणुदेशोत्पादक्रमेण नशब्दारंभो येन मेघजादिशब्दानां युगांतरेपि भूलोकप्राप्तिर्नस्या
त्किंतु मेघादिनिहितसर्वतोगामिमहावायोर्महति देशे संयोगनिमित्तमासाद्य शब्देन सर्वदिग्वर्तिशब्द एक एव जन्यते निमि
त्तसंयोगानुरोधित्वादिभुकार्याणामुत्तरोत्तरेणाप्यधिकाधिकदेशः सर्वत्र एकैक एव शब्दो वीचीतरंगवदुत्पद्यते अत एव सर्वै
रेकशब्दग्रहः· वायोश्चन यनत्वमहावेगतया शीघ्रगामित्वेनोत्तिमशब्दारंभादाद्यशब्दानंतरमचिरेणैव शब्दोपलंभः वायो
रेव च मंदतरतमादिक्रमेण महादिशब्दोत्पत्तिः यथा आद्यशब्देन कदंबगोलकवत् दशदिशि दशशब्दा आरभ्यंते तैश्च दशसंतानार
तिनन्वेकशब्देनकंपमनेकशब्दारंभःसामग्र्यभेदादितिचेन्नसर्वतोनेकवाय्वादिसद्भावात्· प्रागभावभेदाद्वा नचतद्विर
हेतुसाकल्पेसत्यभेदान्नकार्यभेदः तन्त्रदर्शनादितिवाच्यं कार्यभेदेहि सामग्रीभेदात् सच हेत्वंतरभेदादिवत् प्रागभावभेदा
दपि· अन्यथा समवाय्यादिभेदेपि कार्यवैजात्यं न स्यात्· घटव्यक्तिषु तद्दर्शनात्· पाकजेरूपादौ हेत्वंतराभेदेपि प्रागभाव
पूर्वरूपादिध्वंसभेदेन भेदाच्च· अपरूपादौ केकप्रागभावध्वंसयोः सत्त्वेनवतुल्पत्तेश्च किंचित्रिनिगमकं गंधादिप्रागभावादीनांच रामः
रसादौ व्यभिचारेपि गंधादौ रसादिप्रागभावानामव्यभिचारादितिचेन्न वायुस्पर्शे गंधरूपरसप्रागभावप्रध्वंसानां तेजोरू ३१
पे गंधरसाभावयोर्जलरसेगंधप्रागभावस्य व्यभिचारेणाहेतुत्वेत्त्वप्रागभावहेतुतापाच्यावच्छेदकत्वात्· पाकजेषु रूपरसस्य
शेषु गंधादिप्रागभावानामन्यथासिद्धत्वात्· रूपादिषु तत्पाकजत्वेनात्· गंधेपि स्वप्रागभावस्यावच्छेदहेतुत्वादभावात्तराणामन्य

थासिद्धत्वं यथारूपस्पर्शौ तुल्यते प्यग्निसंयोगविशेषात्तयोरभमत्रौरभं चोत्पद्यते· नचाग्निसंयोगस्पर्शादिमात्रे कारणं व्यभिचारात् ए
वंरसादावपि ननु कार्यमात्रे प्रागभावमात्रेण न हेतुः तयोर्व्यतिरेकरूपाज्ञानवगमात्· सर्वकुक्ष्यविनर हेतुभावादेवकार्यानुत्पादा
दिति चेन्न हेत्वंतरसत्वेप्युत्पन्नस्य पुनरनुत्पादेन प्रागभावस्य हेतुत्वात्· एकसामग्री एकमेव कार्यं जनयतीति स्वभावादिति
चेन्न· कार्यानुत्पादस्य सामग्रीविरहप्रयोज्यत्वनियमात्· नच कार्यसहभावेन कारणत्वं गौरवात्· नच विनश्यदवस्यसमवापि
निकार्यानुत्पत्तेस्तत्पात्वमिति वाच्यं· तदवितासमवायिकारणस्यैव तथात्वात् कारणमात्रेभावाभावेनतस्यापि प्रयोजकत्वात् ननु सम
वेतसमवायो न ग्राहकःश शब्दत्वादिजातेरभावादितिचेन्नरूपत्वन्यायेन तत्साधनात्· ननु समवायासिद्धेर्नसाप्रत्यासत्तिः
विशिष्टप्रतिपत्तिश्चशुक्लःपट इत्यादिप्रतीतिः विशेषणविशेष्यसंबंधविषयानवेति·अपगुणक्रियाजातितत्वदंतोपिपिपः संबंधावनु
भूपेतेन तस्यसंबंधस्वरूपदयविशिष्टधीव्यपदेशाविति चेन्न· संबंधानुभवेसंबंधो हि न विशेषणं भासते तस्यत्र पम्यमज्ञानात्
संयुक्तावितिवत् समवायिनावित्यननुभवात्· नापि विशेष्यः अन्यत्र समवायइत्यननुभवात् नापि स्वरूपेण भासते समवायं
ज्ञानामीतिविषयतयाननुभवात्· ननुनीलोघटइत्याद्यनुभवो विशेषणविशेष्यसंबंधविषयः विशिष्टप्रतीतित्वात्· दंडि
ज्ञानवदितिचेन्न· अघटं भूतलं ज्ञातमिदं रूतं चेत्यत्र व्यभिचारात्· संबंधविषयत्वे बाधकं विनेति विशेषणमितिचेन्न बाधका
भावस्यैवसामर्थ्यविशेषवैयर्थ्यात्साधकाभावेनसत्प्रतिपक्षसंभवाच्च· बाधकाभावस्य साधकत्ववत्· साधकाभावस्य बाध
कत्वात्· तस्मादुभयाभावे संशय एव स्यात्· नच प्रतीतिरेव समवायसाधिका तस्यास्तद्विषयतासिद्धेः अन्यथान्योन्याश्र

चिंता. प्र.१ ३६ पात् अथ घटभूतलं जानामीत्याद्य प्रविशिष्टधीसंबंधविषया किंतु भ्रांता बाधकत्वादिति चेन्न इहभूतले घटत्वस्य ज्ञात
त्वादेवाभावस्यापि तेन पाव्यवहारविरोधः संबंधश्च न संयोगः समवायः संयोगसमवायान्यतरो वा बाधात् सिद्धेर्वा ना
पि संबंधमात्रं ज्ञापकत्वादिना सिद्धसाधनात् नाप्यविशिष्टव्यावृत्तविशिष्टधीनियामकः अभावत्वानुदाविवृत्स्वरूपसंबं
धेनाप्यर्थांतरत्वात् न च संबंधिभिन्नत्वं साध्यविशेषणं अभावत्वानादिना व्यभिचारात् बाधकाभावस्य हेतोर्विशेषणे त्वनि
रस्तमेव विनापि भिन्नसंबंधमभावादाविव विशिष्टधीसंभवेनाप्रयोजकत्वाच्च विशेषणता विशेषरूपः प्रकारादिकृतो वा
विशेषः संबंधो विषयत्वेपि तुल्यः स्यादेतत् अवयवि गुणक्रियाजातिकृतामिह तंतुषु पटः इह पटे शौक्ल्यं चलनं पटत्वं चेति
ह प्रत्यय आधाराधेयभावसंबंधनिमित्तकः प्रत्यय इह प्रत्ययत्वादिह कुंडे बदरमिति प्रत्ययवदिति चेन्न इह भूतले घटाभाव इति ज्ञा
ने चैतत्त्वादो व्यभिचारात् बाधकं विनेत्युक्तत्वं च निरस्तत्वात् तयैवाधाराधेयभावादेवोपपत्तेश्च उत्पत्तेः प्रपेक्षयेन पेक्ष्या
पत्याधारत्वात् अन्ये तु शब्दजातिरूपादिरिंद्रियसंबंधः प्रत्यक्षत्वात् घटवदित्यनुमानात् संयोगबाधे इंद्रियसंबंधघटकतया रामः ३६
समवायसिद्धिः इंद्रियस्य संबंधग्राहकत्वात् अत एव समवायो न प्रत्यक्षः इंद्रियेणासंबद्धत्वात् न च संबंधत्वेन तत्सिद्धिरन
वस्थानात् स्वभावादेव ज्ञानवत्स्वसंबंधव्यवहारकारित्वाच्च समवायो हि संबंधं विनैव स्वभावादेव न च जात्यादेरपि संबंद्ध
व्यवहारकारित्वेन समवायविलोपः जातेरिंद्रियासंबंधे समवायवत्प्रत्यक्षतापातादिति तन्न समवायस्वीकारेपि स्वरूपसं
बंधावश्यकत्वात् घटज्ञानयोर्भूतलाभावयोरिवावाच्येगुणात्मादिभिन्नत्वरूपमेव संबंधोस्तु तथा चेदं शब्देंद्रियविशेष

णतया शब्दत्वस्येंद्रियविशेषणविशेषणतया रूपजात्यादेरिंद्रियसंबद्धविशेषणतया रूपत्वादेरिंद्रियसंबद्धविशेषणविशे
षणतया स्वरूपसंबंधरूपया ग्रहणसंभवे किं समवायेन द्रव्यस्वभावसंबंधानिंद्रियग्रहणमिति रूपगुणादेरनेन ग्रहण
मिति चेत् समवायेनापि न द्रव्यग्रहणमिति तुल्यं अपरे श्यामपाकरक्तयामेकत्र घटे क्रमेणैव पामरक्तरूपोपलब्धिः स्ति सा
न तदुभयनिबंधना रूपस्य नित्यत्वेनैकदोपलंभापत्तेः नित्यत्वादेवतयोर्नोत्पादविनाशौ तेन तस्मात्तयोः संबंधस्यैतयोरुत्प
त्तिः स एव समवाय इति तन्न श्यामं नष्टं रक्तमुत्पन्नमिति बाधितानुभवात् समवायस्योत्पादविनाशानुभवे तु बाध त्वन्मते
तस्यातींद्रियत्वात् अन्यथा च घटविनाशे गंधरसादेरपि नित्यत्वे समवायस्योत्पत्तिविनाशाविति किं न रोचयेः न त्युत्पा
दविनाशप्रतीतिरप्रमाणिका बाधकं विनेति उच्यते गुणक्रियाजातिविशिष्टबुद्धयो विशेषणसंबंधविषयाः विशिष्टबुद्धि
त्वात् दंडीति विशिष्टबुद्धिवत् न च व्यभिचारः अभावादिविशिष्टबुद्धेरपि स्वरूपसंबंधविषयत्वात् न चैवमत्रापि तेनैवार्थां
तरं यतो गुणक्रियाजातिविशिष्टबुद्धीनां पक्षधर्मताबलेन विषयः संबंधः सिद्धः न लाघवादेक एव सिद्ध्यति स एव समवायः
न तु स्वरूपसंबंधः तत्तत्स्वरूपाणामनंतत्वात् संबंधत्वेनाक्लृप्तत्वाच्च अथवा विशेषणसंबंधनिमित्तका इति साध्यं हेतौ च
सत्यत्वं विशेषणं विशेषणसंबंधश्च कारणत्वे नैक एव सिध्यति लाघवात् अनुगतकार्यस्य अनुगतकारणनियम्यत्वाच्च न
तु स्वरूपसंबंधस्तेषामननुगतत्वात् अनंतत्वाच्च न चाभयमप्रयोजकं विशिष्टसाक्षात्कारस्य संबंधविषयत्वेन इंद्रस्ते
वागवाशाद्वापि विशिष्टबुद्धिप्रसंगात् न व्याप्तं गुणक्रियाजातिविशिष्टबुद्धिः संबंधिभिन्नविशेषणसंबंधविषया निर्विषय

चिंता·मू· क्षभावविशेषणकविशिष्टबुद्धित्वादित्यत्र निरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वाद्यात्रतोन्याभावज्ञानादिविशि
१७ ष्टबुद्धौ व्यभिचारः न चाप्रयोजकत्वं निरूपाधिसंबंधत्वापत्तेरिति संबंधत्वाद्विशिष्ट्यात्यत्र विशिष्टधीनियामकः पद
इंद्रियप्रत्यासत्तित्वेन समवायसिद्धिरिति तथापि गुणक्रियाजातिसाक्षात्कार इंद्रियसंबंधसाध्यः जन्यप्रत्यक्षत्वात् प्र
तःसाक्षात्कारसंबंधवाधेकारणत्वेंद्रियसंबंधः सिध्यन् पक्षधर्मताबलात् लाघवेनानुगतः समवाय एव सिध्यति
अनुगतकारणजन्यत्वादनुगतकार्यस्य न तु संयुक्तविशेषणतारूपः स्वरूपसंबंधः तस्य च तत्तद्रूपादित्वेनाननु
गतत्वात् एकरूपतया सत्ता साक्षात्कारेऽपि कारणत्वेनेंद्रियसंबंधः समवाय एव सिध्यतीति लाघवात् न चेंद्रियसं
बंधविशेषणविशेषणतानन्स्य रूपतादिरूपत्वेनानुगतत्वात् अत एव संयोगो विशेषणता च प्रत्यासत्तिरस्तु
न समवायादिवत् तत्र धर्मित्रितयं सिद्धं तस्यास्तद्रूपत्वेनाननुगतत्वात् अन्यथा सत्वेनाभ्युपगते समवाये प्रत्यक्षता
संबंधित्वप्रत्यक्षत्वात् नन्वेवं समवायवद्विशिष्टप्रत्ययेऽपि विशिष्टबुद्धित्वात् संयोगसमवायबाधेऽनुगतवैशिष्ट्यं
संबंधो विषयो निमित्तं च भवेदिति चेन्न तस्य हि समवायवदेकत्वे घटाभाववति पटवति पटाभावबुधीप्रसंगः घटाभाववै रामः
शिष्ट्यमेव हि पटाभाववैशिष्ट्यं घटाभाववैशिष्ट्यसत्वेऽपि पटाभाववैशिष्ट्यं नास्ति तस्य हि ततो भिन्नत्वादिति चेन्न पटाभावाभावस्याभा १७
वत्वेऽपि वैशिष्ट्यं न संबंधेन तत्रास्ति वैशिष्ट्यस्यैकत्वात् घटाभावस्य भावत्वे च पट एव प्रतिबंधको वाच्यः एवं पटाभावः पटा
भावधीहेतुः स्यात् पटाभाववैशिष्ट्यं न संबंधेन तत्रास्त्येव वैशिष्ट्यस्य तत्तदभावव्यक्तिनानात्वे चाभाववैशिष्ट्यबुद्धौ नैकः

संबंधः कारणं विषयो वेति तत्तदभावस्वरूपप्रत्यासत्तेननुगतमेव वैशिष्ट्यं विषयः कारणं च वाच्यं तथा चाननुगतत्तत्स्वरूप
रूपविशेषणतैवास्तु क्लृप्तत्वात् किमनंतवैशिष्ट्येन समवायस्य वैशिष्ट्यस्य च प्रत्यक्षत्वे तथापि इंद्रियसंबंधविशेषणतास्वीका
रात् न तु समवायस्यैकत्वे रूपं रूपिनी रूपिवत्स्यात् घटेन सह रूपसंबंधरूपत्वं समवायस्य न बाधादिति चेन्न रूपसंबंध
रूपत्वं समवायस्वरूपमेव यदि तदा रससंबंधरूपत्वं नस्यात् तयोर्विरोधात् अन्यच्च दुर्वचमिति चेत् उच्यते वायौ रूपसमवा
येऽपि रूपात्यंताभावोऽस्तु न घटे रूपमत्वं अधिकरणस्वभावात् अबाधितरूपिनी रूपिप्रतीतेः अन्यथा नन्वेवं ज्ञातो घट इति प्रतीते
ज्ञाततापि स्यात् वर्तमाने बाधकाभावात् अतीतानागतयोस्तु तदभावाद्भ्रांतेति चेन्न अतीतानागतयोर्ज्ञाततायाश्चाभावाद्यवहा
रस्याबाधप्रत्ययेः तस्य ज्ञाततासाध्यत्वात् न च ज्ञातता ज्ञानमेव व्यवहारहेतुः गौरवात् अतीतादौ ज्ञाने तद्विषयत्वे च ज्ञाततार्धी
गौचरविति चेन्न हि वर्तमानेऽपि तावेव तद्विषयौ न स्यातीतवर्तमानयोर्ज्ञातताप्रतीत्योर्विषयत्वे जन्यस्य प्रतीक्षामहे ननु रूप
घटयोर्न समवायः किंतु भेदेन दंडीपुरुष इत्यत्र दंडिपुरुषयोरिव नीलो घट इति नीलघटयोरबाधिताभेदानुभवात्
नीलो घटो दंडी पुरुष इति बुद्ध्योर्विशेषणसंबंधमात्रगोचरत्वे नीलो घट इति वद्दंडः पुरुषो दंडी पुरुष इति वन्नीलोघट्य
त्यपि स्यात् तस्मादेकत्राभेदो विषयोपरत्र विशेषणसंबंधः विषय ऐवं विषयो विशेषात् अपरत्र विशेषणविशेष्यता
वच्छेदकयोर्नीलत्वघटत्वयोरेकरूपितं तथा च दंडित्वपुरुषत्वयोरिव पुरुष एवं नीलघट पदयोः सामानाधि
करण्यं पुरुषे दंडिनील तत्व घटता भ्यां भिन्नप्रवृत्तिनिमित्ताभ्यां तयोरेकत्रार्थे न च समतुल्योपाधेरेप चारादनीलघटेनील

चिंता·मू· वत्पटमितिवाच्यं· न हि प्रयोगं साधकं ब्रूमः। किंतु नीलपटयोरभेदप्रतीतिं प्रदीपनोपचारादिकल्पनागौरवात्· मुख्येबाधका
३८ भावाच्चेति· उच्यते· शुक्लघटशब्दयोरेकार्थत्वे घटः कुंभ इतिवत्· शुक्लो घट इति सहप्रयोगो न स्यात्· अंधस्य घटग्रहवत् रू
पग्रहो रूपाग्रहवत् घटाग्रहोपि स्यात्· महारजनरक्ते पटग्रहवत्· शुक्लग्रहः शुक्लाग्रहवत् पटाग्रहोपि भवेत्· पटमान
येत्युक्ते यं कंचिच्छुक्लमानयेत्· अपटः पट इतिवत्· अशुक्लः पट इति विरुद्ध्येत पटशुक्लयोरभेदात्· अग्निसंयोगादेकत्र श्या
मरक्तयोर्विनाशोत्पादे पटस्य तौ स्यातां घटसत्वे वा तयोरपि तौ न स्यातां अपि शुक्लत्वादीनां द्रव्याभेदात्तद्बोधार्थं सहप्रयोगः
अंधादिनाम्शुक्लादिग्रहे शुक्लत्वादीनामग्रह उपपद्यते शुक्लत्वादिजातेश्च द्रव्येनाभेदेन वा समवायः। किंतु स्वरूपसंबंध इ
ति चेन्न· शुक्लत्वमधुरत्वसुरभित्वोष्णत्वादीनां द्रव्यवृत्तित्वे द्रव्यग्राहकत्वगादिभिर्ग्रहणप्रसंगात्· रूपत्वादीनां प्रतिनियतेंद्रि
यग्राह्यत्वनियमाभावमिति चेन्न· रूपत्वादीनां द्रव्यवृत्तित्वे प्रतिनियतेंद्रियग्राह्यत्वे च न स्यात् योग्यव्यक्तिवृत्तित्वेन जातेर्ग्रहण
योग्यत्वात्· तज्जातित्वेन योग्यत्वेननुगमात्· तस्माद्रूपत्वादीनां प्रतिनियतेंद्रियग्राह्यतापि गुणगुणिभेदे मानं· अभेदेच
कथं पटस्य शुक्लं रूपमिति भेदबुद्धिः पटे नीलमिति बुद्धिप्रसंगश्च· ननु एकांताभेदस्य वृत्तिमिदं दूषणं वयं तु भेदाभेदवादिनः। रामः
तथा च भेदमादाय पौनरुक्त्यादि भेदाभेदं चोक्तमेव प्रत्यक्षं प्रमाणं कथं वोभयसिद्धे भेदे सामानाधिकरण्यधीरभेदे प्रमा ३८
णं पृथक्त्वं तमभेदे भेदे च न सामानाधिकरण्यमिति तत एव भेदाभेदसिद्धिः· न च भेदाभेदयोः परस्परविरुद्धतया विरुद्धयोः
कथमेकत्र समावेश इति वाच्यं· संयोगतदभाववपारिवाविरोधात् पाकानंतरं रक्तोयं न श्याम इत्यबाधितानुभवबलात्तत्रै

वतदन्योन्याभावसिद्धेस्त्वया भेदाभेदस्वीकारात्· अन्योन्याभावत्वमव्याप्यवृत्तिवृत्तिनित्याभाववृत्त्यभावत्वसाक्षाद्व्याप्यधर्म
त्वात्· अत्यंताभावत्ववत् नित्यत्वविशेषणं नेदृयमव्याप्यवृत्तिप्रतियोगिकप्रागभावप्रध्वंसयोरप्यव्याप्यवृत्तित्वात्· इत्य
तोपि भेदाभेदसिद्धिः। उच्यते· तस्य वस्तुतो भावो व भेदाभेदेन वर्त्तते ज्ञायते च यथा संयोगाद्यभावः। रूपाभाववच्छिन्नस्य तस्यैवा
न्योन्याभावस्तत्रैव रक्तावच्छिन्नेतदन्योन्याभावश्च रूपाभावच्छेदेन तद्विहापि नीलस्यान्योन्याभावो घटत्वावच्छेदेनेति नी
लात्· घटस्य भेदस्तु अभेदस्तु नीलान्योन्याभावाभावरूपः· न घटे घटत्वावच्छेदेनैव विरोधात्· एकावच्छेदेन भावाभावयो
रेकत्रावृत्तेः रत्नानाश्च· नाप्यवच्छेदांतरेण घटत्वावच्छिन्ने घटे तदभावात् तदानेपि नीलो घट इत्यनुभवात्तेन चान्योन्याभाव
रूपो भेदोस्तु अभेदस्तु न भेदाभावः किं त्वन्य एवेति वाच्यम्· अभेदव्यवहारे तस्याहेतुत्वात्· तस्मान्नीलो घट इत्यत्र नीलसं
बंध एवभासते तथा सति नीलो घट इति धीः स्यादित्युक्तमिति चेन्नीलो घट इत्यत्र यदि संबंधविषयत्वमापाद्यते तदिष्यत एव
व· अपनीलो घट इति प्रयोगमबंधवाचकपदवत्तत्र पीष्यत एव मनुष्मोपादभेदोपचाराद्वा नीलपदं नीलवत्परमिति·
य ननु शब्दरूपादिषु विशेषणतैव संबंधविशेषणतावद्ग्राहकमस्तु किं समवायादिना· अपि विशेषणतायां समवाय इंद्रि
यसंबंधविशेषणतायां च संयुक्तसमवायादिरूपजीव्यः· तैर्विना तयोरभावादिति चेन्न विशेषणतास्वरूपे तेषामुपजी
व्यत्वं न तु तस्याः प्रत्यासत्तित्वे तैर्विनापि समवायाभावयोर्विशेषणतासत्वात्संयुक्तसमवायादिरपि तत्रास्तीति चेत् ज्ञा
तांन तु प्रत्यासत्तिः किंतु विशेषणतैव क्लृप्तत्वात्· संयुक्तसमवायं विना विशेषणतामात्राद्रूपादेर्न ज्ञायत इति चेत् मात्रापि

चिंता॰ मू॰ ३९ नहि सा प्रत्यासत्तिर्ज्ञाता अपि तु स्वरूपसती मैवं शब्दादीनां साक्षात्कारविषयत्वेनेन्द्रियसंबंधानुमितौ शब्दादौ समवायादिकं
ज्ञातेव विशेषणताग्रह इत्यावश्यकं प्रथमोपस्थितत्वात्समवायादिरेव विषयः न तु विशेषणता चरमोपस्थितत्वात् ननु भा
वग्रहे नेन्द्रियसंबद्धविशेषणता प्रत्यासत्तिः चक्षुषा संयुक्ते परमाणौ योग्यस्य जलत्वादेरभावग्रहप्रसंगात् किंतु स्वग्राह्य
संबद्धविशेषणता महत्यनुद्भूतरूपाभावस्य कुसुमसौरभाभावस्य च चक्षुरादिना ग्रहः अपि तु योग्यानुपलब्ध्यासौ
नुमीयते इंद्रियविशेषणतापि न प्रत्यासत्तिः चक्षुरादिनास्वविशेषणजलत्वाभावग्रहप्रसंगात् यद्विशिष्टाभावः प्रत्यक्ष
स्तदा प्रत्यासत्त्यन्तरं कल्प्यं ततदभावे प्रत्यक्षत एव न भवतीति चेत् मैवं लाघवादिंद्रियसंबद्धविशेषणतैव प्रत्यासत्तिः
न चैवं परमाणौ जलत्वाभावग्रहप्रसंगः यत्र हि यत्सत्त्वमनुपलब्धिविरोधि तत्र तदभाव इंद्रियसन्निकर्षेण गृह्यते न
च परमाणौ जलसत्त्वमनुपलब्धिविरोधि योग्यसंयुक्तसमवायाभावेन पृथिवीत्ववदनुपलब्धिसंभवात् महति वाय्वा
दौ चोद्भूतरूपाद्यभावः चक्षुरादिग्राह्य एव तत्रोद्भूतरूपादिसत्त्वे अनुपलब्ध्यनुपपत्तेः अत एव स्तंभे पिशाचतादात्म्याभावः
प्रत्यक्षः स्तंभतादात्म्ये तस्य स्तंभस्येवानुपलंभासंभवात् एवं शब्दस्याप्यभावः प्रत्यक्षः तत्र शब्दसत्त्वस्यानुपलब्धिवि रामः १ ३९
रोधित्वादिति तत्र चेंद्रियविशेषणतैव प्रत्यासत्तिः चक्षुषि जलत्वादिसत्त्वं च नानुपलब्धिविरोधि चक्षुषा न तद्ग्रहः ननु भावेन
विशेषणता प्रत्यासत्तिः किंतु समवायः समवायसाधकविशिष्टप्रतीतेरविशेषात् न च समवेतत्वे तस्य भावत्वापत्तिः भावस्य
तत्त्वे अभावत्वापत्तिरिति वैपरीत्यसंभवात् रूपादौ च प्रत्यासत्तित्वेन समवायकल्पनमभावेपि तुल्यं विशेषणतापि तुल्या

गभावश्च ध्वंसो प्रतियोग्याश्रये समवेतो प्रतियोग्याश्रयनाशजन्यो ध्वंसो देशे काले च समवेतीति तत्रैव निरूपणात् न समवायि
नाशे ध्वंसनाशः घटोन्मज्जनप्रसंगात् भावत्वस्योपाधित्वाच्च अन्यथा तद्वापि तस्य जन्यत्वेन नाशापत्तिः अत एव मन्योन्या
भावयोर्नित्यत्वेनैकसमवेतत्वे च जातित्वप्रसंगः न च तत्र भावत्वं तं गौरवात् न चाभावानां विशिष्टप्रतीतौ विशेषो येन तत्र
समवायपरित्यागः इति चेन्न घटत्वाभावादेर्जातित्वे सत्त्वद्रव्यत्वपृथिवीत्वादिना परापरभावानुपपत्तेः तेषां व्याप्यत्वे घटेतर
भावप्रसंगः व्यापकत्वे सामान्यादौ घटत्वाभावो न स्यादिति उच्यते ॥ समवेतस्य ध्वंसस्य समवायिकारणनाशान्नाशः स्या
त् स च नाशत्वे भावत्वं गौरवात् प्रागभावे तदभावाच्च असमवेतत्वेन ध्वंसस्य जन्यत्वेपि न नाशः आश्रयनाशादेरभावात्
घटोन्मज्जनापत्तेर्न नश्यतीति चेन्न हि प्रयोजनक्षतिभयेन कार्यभेदमर्जयति सामग्री तस्मादुन्मज्जनाभावानिर्वाहे च ध्वंसस्या
समवेतत्वं कल्प्यतां स्वस्वसमवायिनाशात् ध्वंसपरंपराकल्पने च घटकपालादेः परमाणुनाशे घटादितद्ध्वंसविरोधी चरमो
ध्वंसः परमाणुवृत्तिः स्यात् तथा च न प्रत्यक्षः घटध्वंसस्य कपालसमवेतत्वे च न भूतले निरूपणं स्यात् उभयसमवेतत्वे च
व्यासज्यवृत्तित्वेन कपालं विना न निरूप्यते ननु भावग्रहो नेंद्रियात् किंतु योग्यानुपलब्धेः तदुपलंभे तदभावाग्रहात् न चै
वं भावबुद्धिरप्यभावानुपपत्त्यैनेंद्रियजन्येति वाच्यं भावग्रहे इंद्रियानुविधानात् अन्यथा निमीलिताक्षस्य घटाभावानुपलब्धा
घटग्रहप्रसंगः अत एवाभावग्रहे तदभावानुपलब्धिः पृथगेव मानहेतुः इंद्रियेणान्यथासिद्धत्वात् न हींद्रियसन्निकर्षे तद
नाभावधीविलंबः अभावग्रहेपींद्रियं हेतुः तदनुविधानादिति चेन्न अभावेन चक्षुरादेः प्रामाण्याभावेनाश्रयग्रहहेतुत्वात्

चिंता॰प्र॰ ४० अथाधिकरणधीरिंद्रियव्यापारो न च तयानरन्यथासिद्धं अन्यथा सन्निकर्षोपक्षीणत्वे इंद्रियमपि न हेतुः स्यादिति चेन्न हेतुत्वे
सिद्धे तद्व्यापारत्वं तदेव नास्ति प्राप्त्यभावात् एतेनाधिकरणग्राहकेंद्रिययोः पृथगन्वयव्यतिरेकाद्दंडचक्रयोरिव हेतुत्वं द्वयोरिति
निरस्तं प्राप्त्यभावेनाभावाग्राहकत्वात् नन्वेवं द्रव्यं प्राप्तविशेषणमप्राप्तमपि गृह्णातीति संयुक्तसमवायाद्युच्छेदप्रसंगात् प्राप्त
चैत्रगताप्राप्तदंडस्यापि ग्रहप्रसंगात् इंद्रियस्य प्राप्तग्राहकत्वाच्च न च विशेषणता प्रत्यासत्तिः अन्यत्र तदकल्पनात् न च स
मवायेन तत्कल्पनं तस्यानभ्युपगमात् न तत एवातींद्रियत्वाद्योग्यताभावस्येंद्रियया स्यात्त्वेन संयोगादिबाधे इह वसा कल्प्यते
रूपादेस्तद्बाधे संयुक्तसमवायादिवदिति चेन्न तत्रान्यत्रानुपक्षीणेंद्रियानुविधानात् पूर्वं इह त्वाश्रयग्रहणे एव तदुपक्षीणत्वा
पचान्तत्राप्यनन्तरकल्पनागौरवात् अन्यथा त्वगनुविधानाद्रूपे विनापि वायुधीः प्रत्यक्षेति न सा स्पर्शलिंगग्रहे उपक्षीयेत
किंच विशेषणतायामिंद्रियग्राह्यत्वं तेन सेत्स्यन्योन्याश्रयः अपि च विशेषणताग्राह्यस्वरूपमेव न च त्वगादेः स्वरूपसंबंधो
हेतुः किंतु यथायथा संयोगसमवायौ न च तयोरन्योन्यव्यभिचारादिंद्रियसंबंधं गृह्णातीत्येव व्याप्तिरिति वाच्यं दृष्टांते हि संबं
धिगतः संबंधो हेतुर्गृहीतः चक्षुषान्यत्रापि तथा न तु ग्राह्यस्वरूपं संबंधस्य संबंधिनिष्ठत्वनियमात् न हि स एव तदास्त्वेव राम॰ २ ४०
भवति स्वरूपसंबंधस्य हेतुत्वे च रूपादिग्रहोपि तत एवास्तु किं समवायादिनान्यतः संयोगविशेषणेनैव प्रत्यासत्तीति षोढा
कीर्तनमपि विकल्पेनैनालोकापेक्षणे चक्षुरपेक्षापितस्य तदेकसहचारित्वादिति निरस्तं प्राप्तिं विना चक्षुषोऽहेतुत्वात् आलोक
स्य च प्रतियोगिग्राहकत्वेन योग्यता घटकत्वाद्भावग्राहकत्वात् नन्वेवं प्रतियोग्युपलंभकत्वेन चक्षुरपि हेतुः एवं तत्र दृष्टा

प्येतरयावत्तदुपलंभकसमवधानेऽनुपलब्धिर्ग्राहकेति वाच्यं प्राप्तिं विना तस्या अहेतुत्वात् चाश्रयग्रहोपक्षयात् नन्वेवमं
धस्य त्वगिंद्रियोपनीतेनालोकेऽस्मृतपीतस्यानुपलब्ध्या तमभावग्रहप्रसंगः प्रतियोगिग्राहकेंद्रियग्राह्यत्वेन भावस्यनायं दोषो
धस्य चक्षुरभावादिति चेन्न अभावग्राहकत्वेनाभिमतमिंद्रियमाश्रयग्रहोपक्षीणं तथा च प्रतियोगिग्राहकेंद्रियाश्रयग्रहे
नुपलब्ध्याभावग्रहात् अन्यथा चक्षुः संयुक्ते परमाणौ महत्त्वाभावग्रहप्रसंगः अपि च वायौ रूपाभावः पाषाणे सौरभाभा
वो गुडे तिक्ताभावश्च न गृह्येत वाय्वादीनां प्रतियोगिग्राहकैश्चक्षुरादिभिरग्रहात् न च तर्हि तेऽभावाः कथं प्रत्यक्षाः वाय्वादी
नां तदिंद्रियायोग्यत्वादिति वाच्यं लिंगेन त्वगादिनोपनीते वाय्वादौ योग्यरूपाद्यभावविशेष्यकमिति प्रत्यक्षं चक्षुरादिनैव
न वायावादिविशेष्यकं प्रत्यक्षे योग्यविशेष्यस्य हेतुत्वादिति चेन्न वाय्वादौ रूपाद्यभावप्रतीतीनामनुपलब्धिलिंगकत्वात्
तथा नीरूपो वायुरिति वायुविशेष्यक परोक्षप्रतीतिवत् अपभूतत्वेऽभावधीरिंद्रियजन्या साक्षात्कारित्वात् न तत एव विशेष
णताकल्पनमपि न च साक्षात्कारित्वमसिद्धं परोक्षत्वे ज्ञाताज्ञातकरणकत्वानुपपत्तेः तथा हि मंदिरे दूरे चैत्रोऽनिपुणतरेणानु
श्रितोपि न चोपलब्ध इत्याप्तवाक्यावगततानुपलब्ध्या श्रोतानुमिनोति नासौ तत्र चैत्र इति एवमभावधीस्तत्र परोक्षा चेन्न ज्ञा
तात करणिका परोक्षत्व जाते ज्ञातकरणप्रयोज्यत्वात् ज्ञातकरणकत्वं च ज्ञानकरणकत्वं लिंगादिजनकत्वात् तस्मात्सा
क्षात्कारित्वमज्ञातकरणकत्वात् नन्विंद्रियजन्यत्वमुपाधिः तत एव तत्साधनादिति चेन्न मैवं परोक्षत्वं हि न जातिः अनुभवत्वे
न जातिसंकरप्रसंगात् किंतु साक्षात्कारिभिन्नज्ञानत्वमेवं चाभावज्ञानं परोक्षमेवस्मृतिवत् यथा ज्ञातकरणकत्वेपि ज्ञाहादि

चिंता॰म॰ नानुमितिः एवमसाधारणकरणकत्वेपींद्रियजन्यं साक्षात्कारि अनुपलब्धिजन्यं तद्विजातीयमानुपलब्धं ज्ञानं यद्विवासाधारणक
४१ रणकत्वेन साक्षात्कारित्वं तद्वारा शब्दे साधारणकरणकत्वेनानुमितित्वापत्तिः ज्ञातलिंगादिकरणभेदादनुमित्यादिफलभेदइ
तिचेन्न अज्ञातानुपलब्धिइन्द्रियकरणकभेदात्फलभेदः इहापि एवं साक्षात्कारित्वेंद्रियजन्यत्वप्रयोजकं परोक्षत्वे इंद्रिया
जन्यत्वं न तु ज्ञाताज्ञातकरणकत्वं गौरवात् स्मृतावभावाच्च · ननु अनुपलब्धिर्न मानं भावभूतमानसहकृतस्यैव मनसो
त बाह्यानुभवजनकत्वनियमादिति चेन्न भावत्वस्य गौरवेणाप्रयोजकत्वात् अन्यथेन्द्रियसहकृतस्यैव मनसो बाह्यानुभव
जनकत्वमित्यनुमानं दिनमानं स्यात् न चेदमभाववत्तोनं भावमानसहकृतमनःसाध्यं बाह्याभावज्ञानत्वात् लिंगादिजन्या
भाववत्तानुवदिति वाच्यं अयमभावोनेन्द्रियपद्यीत्योऽभाववत्वात् अयोग्याभाववत् इयमभावबुद्धिर्नेन्द्रियजन्याध्यभावबुद्धि
त्वात् अयोग्याभावबुद्धिवत् इति सत्प्रतिपक्षतात् अयप्रतियोगिग्राहकमानं तदभावमपि गृह्णाति यथानुमानादिः प्र
तियोगिग्राहकं चेन्द्रियमतोऽभावग्राहकमिति चेन्न भावग्राहकयोरेव लिंगशब्दयोस्तदभावाग्राहकत्वात् प्रतियोगिग्राहक रामः
जातीयमानं तथेति चेन्न उपमाने व्यभिचारात् नन्वचक्षुरादिकमभावग्राहकं द्रव्यभावग्राहकत्वे इन्द्रियजातित्वात् शाब्दत्ववत् ४१
उपमानत्वं न जातिरिति वाच्यं प्राप्तिं विना चक्षुरादेरभावग्राहकत्वसाधनात् अप्रभवति भाववत्वभावभ्रमः सुचकरण
दोषात् न च प्रतियोगिस्मृत्याश्रयग्रहानुपलब्ध्यर्थःस्वरूपतो दुष्टः किंतिंद्रियं पित्तादिना दुष्टमिति तदेकभ्रमहेतुरित्यभावभ्र
मापामपि तदेवमानमिति चेत् इन्द्रियस्यापि दुष्टत्वं दोषसाहित्यमात्रं न तत्वन्यत् तद्वानुपलब्धावपि तुल्यं न च ज्ञातकरण

जन्यत्वेनेन्द्रियजन्यत्वमेवं बहिरभावभ्रमाकरणत्वमिंद्रियस्यतत्त एवास्तु किं मनपाकुसुधाएवमस्त्विति चेन्न ग्राम्यभावेन।
नोक्तोत्सरत्वात् किंचासन्निकृष्टेपि दोषादुपनीतेऽभावेभ्रमइन्द्रियेणसंभवति चक्षुषा पाषाणे सुरभिरिति भ्रमवत् अ
भावप्रमानसंभवति प्राग्भावादिसुक्तं ननु अधिकरणभावयोर्विशिष्टबुद्धिरस्तिसानेन्द्रियजन्येति अभावबुद्धित्वात् नानुप
लब्धिजन्याभावबुद्धित्वात् नोभयजन्या जातिसंकरप्रसंगात् अत उभयग्राहकमिन्द्रियमभ्युपेयमिति चेत् अभाववद्भूत
लमित्यनुपलब्ध्युपनीताभावविशिष्टबुद्धेरिन्द्रियेणैव चक्षुषा सुरभिचंदनमितिवद्भूतले घटो नास्तीति चक्षुरूपनीते भूतले
ऽभावबुद्धिरनुपलब्ध्यैव घ्राणेन चंदने सौरभमितिवत् यत्तु व्यापारं भावान्नानुपलब्धिः प्रमाणं व्यापारवत् एव करणत्वा
दिति तन्न क्रियायाःयोगव्यवच्छेदेन संबंधि करणं न तु व्यापारवदित्यपि विशेषणगौरवात् अत्रोच्यते प्रतियोगिग्राहकेंद्रि
येणाश्रयग्रहोन हेतुः प्राङ्नास्तितास्यल ग्रहे तत्र व्यभिचारात् बाघ्यादीनरूपाद्यभाववधीरिन्द्रियजन्येव नानुपलब्धि
लिंगजन्या अनुपलब्धेरज्ञानात् आ नवाकस्यचतत्तुल्यापकस्याभावात् अयाशाते वरूपाद्युपलंभस्यानुपलब्धौ रूपाद्य
नुपलब्धिः गृह्णाति भूतले घटाभावे मिवेति चेन्न तत्रयैव उपलंभस्यातीन्द्रियत्वेनायोग्यानुपलब्ध्या तदुपलंभाभावस्यगृही
तुमशक्यत्वात् अनुपलब्धिमात्रस्याभावाग्राहकत्वात् अस्तु तर्हि ज्ञानं योग्यमिति चेन्न अपसिद्धांतात् योग्यत्वेपि भूतले य
घटाभावेपि तानि व योग्यघटानुपलब्धिर्लिंगमस्तु योग्यघटोपलंभस्यानुपलब्ध्याग्रहणसंभवात् कृतमनुपलब्ध्याप्रमा
णकरणघटाभावधीरज्ञातकरणिकालिंगाद्यनुसंधानं विनैव ज्ञापमानत्वादिति चेन्न ग्राह्यादौरूपाद्यभावप्रतीतिरपत्तेः

चिंता·मू· अथ रूपादिमत्त्वयाज्ञाततयाभावः तदनुमितरूपाद्यनुपलब्धिर्वा लिंगमिति चेन्न· वाय्वादौ ज्ञाततयाभावस्यापि रूपाद्यभाव
४२ र्लम्यतया गृहीतुमशक्यत्वात्· वाय्वादौ नस्य प्रत्यक्षत्वे रूपाद्यभावो हि तथास्तु· नापि कार्याभावाख्यापाराभावेनानुपलब्धि
रनुमीयते उपेक्षाज्ञानमूकत्वभ्रदर्शनयोर्व्यभिचारात्· नन्वव्यवहाराभावमात्रं लिंगं कस्यचिद्व्यवहाराभावस्य व्यभिचा
रित्वात्· सर्वव्यवहाराभावस्य गृहीतुमशक्यत्वात्· किं चेघटवत्त्वयाज्ञाततयाभावेन तदनुमितानुपलब्ध्या वा लिंगेन भूतला
भावानुमितिरस्तु कृतं प्रमाणान्तरेण· अनुपलब्ध्यापि च भाति योगिग्राहकेंद्रियजन्यमधिकरणज्ञानमनुपलब्धेः सह
कारितदास्यात् यदि तेन विना ज्ञानाभावं बोधयेत्· न चैतद् दृष्टं वा वाय्वादौ रूपाद्यभावे तथादृष्टमिति चेत्· असिद्धेः। न च व्या
प्तिबलात्तत्सहकारित्वं एवं हि वाय्वादौ रूपाद्यभावप्रत्ययो न स्यादनुपलब्धेः ताद्रूप्याग्रहणमाक्षिपेत्· अनाक्षेपेणा
नानुपलब्धेर्भवेत्· अनुपलब्धेर्न भवति किं तु लिंगादिति चेत्· लिंगमपि सैव तच्च दूषितमेव किं च नानुपलब्धिर्लिंगं ततो
हि नीरूपो वायुरित्यनुमितिप्रत्ययः स्यात्· ननु वायौ रूपाभाव इत्यपि न घटवत्सुपलंभप्राक्काले नुपलब्ध्या
घटस्मृतिमतः कुतोनाभावधीः घटाभावाभावादिति चेन्न तर्हि स्वभावरूपार्थजन्या भावबुद्धिरर्थजन्यत्वेन साक्षात्का
रणेंद्रियजन्या चस्यात्· तदा घट एव प्रतिबंधक इति चेत्· तथापि तदभावो भावबुद्धौ जनक एव स्यात्· स्यादेतत् गृहमुप
लभ्य निर्गतस्य चैत्रो यत्र केनचित् पृष्टः तत्र मैत्र आसीदिति स तत्क्षणं ध्यात्वा मैत्राभावमनुगम्याह नासीत्तत्र मैत्र इति से यथा ज्ञा
ताधीर्न स्मृतिः पुरा गेहेनुभूयमाने मैत्रास्मरणे तदभावाननुभवात्· एवं च तत्रेन्द्रियव्यापारं विनैवानुपलब्ध्या भावानु
रामः ४२

भवात्क्वचापि सैव हेतुः कुमत्वात्· तदुक्तं स्वरूपमात्रं दृष्टं हि पश्चादप्यस्मरन्नपि तत्रान्यनास्तितां पृष्टस्तदैव प्रतिपद्यत
इति मैवं· प्राङ्ज्ञाततायां हि न तावदज्ञातानुपलब्धिर्भूतले घटाभावस्येवाभावग्राहिका तदानीं गेहस्याविप्रकृष्टत्वेन योग्यानु
पलब्धेरभावात्· नापि ज्ञातानवस्थाप्रसंगात्· अनुपलब्धेरप्यभावरूपतयानुपलब्ध्यंतरग्राह्यत्वात्· उपलभ्यस्यानुप
लब्धिरज्ञाने वस्वरूपसती मैत्रानुपलब्धिं गृह्णातीति चेत्· न तच्चये उपलंभस्यायोग्यत्वेन तद्भावस्य योग्यानुपलब्ध्या
ग्राह्यत्वात्· अपगेहस्य योग्य मैत्रवत्तयास्मरणं हस्यस्मरणाभावस्तत्राज्ञाततान एव गेहे मैत्राभावग्राहक इति चेत्न·
स्वरूपसतः स्मरणाभावस्य ग्राहकत्वे· तस्मिन्सत्यभावसंशयविपर्ययाभावप्रसंगात्· भवति च कदाचित्तत्रासीदिति वि
पर्ययस्तत्रासीन्न वेति संशयः अपदोषात्संशयविपर्ययो भवतः न चासाधारणं प्रमाकरणं दूषयन्त एव दोषाः संशयवि
पर्ययहेतवो भवंति· न चात्र स्वरूपसिद्धस्य योग्यास्मरणस्य किंचित् दूषितमिति वाच्यं· दोषसाहित्यमेव हि करणानां दुष्ट
तान हि इरस्यत्वादिना चक्षुषः किंचिदपि क्रियते किं तु मणिपादेर्दूरत्वादिदृह इव स्वरूपसत्तामेव प्रतिबंधकत्वमिति चेत्· अज्ञातायो
ग्यास्मरणमज्ञाभावधीरित्यसिद्धेः किं तु मनसा ज्ञाततायोग्यास्मरणं लिंगात् प्रमाणत्वेन कॢप्तात्तत्राभावप्रतीत्युत्पत्तौ नानु
पलब्धिः प्रमाणांतरं कल्प्यते योग्यस्मरणाभावो न मनोग्राह्यः प्रत्यासत्त्यभावात्· ज्ञानस्यायोग्यत्वादेतिचेन्न· वाय्वादौ रूपाद्य
भावप्रतीतेरलैंगिकत्वे नेंद्रियानुविधानान्तरकृत्वेसिद्धेः इंद्रियसंबद्धविशेषणतायाः प्रत्यासत्तित्वकल्पनात् ज्ञानं च प्रत्यक्षं ज्ञा
नामीत्यनुव्यवसायस्य लिंगमद्यजन्यत्वात्· न च ज्ञाततालिंगं तस्यानिराकृतत्वात्· तथापि कर्पसंशयविपर्ययावितिचेन्न· लिं

चिंता॰मू॰ ४३ गसंशयविपर्ययाभ्यां लैंगिकसंशयविपर्ययदर्शनात् परानुसुनिपुणेनैकज्ञानविषयतायोग्यस्यैवात्रस्याप्रवेसनिस्म
रणाद्दस्यास्मरणमयथार्थं तत्राद्यनुमितिः प्रमा अत एवास्मरणमात्रस्य व्यभिचारमुपलभ्य तदपेक्षविशिष्टास्मरणं ज्ञातु
कामस्य प्रणिधानमुपयुज्यते ऽन्यथा ध्यानमनुपपन्नं स्वरूपसत एव स्मरणाभावस्याभावग्राहकत्वात् तस्माद्योग्या
स्मरणं लिंगत्वेनैवोपयुज्यते प्रयोगस्तु तत्रेहं तदा मैत्राभाववत् तत्तुल्यपरिमाणादियोग्यतयास्मरणेपि तद्वत्त्वाऽस्मर्य
माणत्वाद् एवं तद्देवयथा भाववद्भूतलमिति ॥छ॥ ननु भावाभावात्मैवानस्तत्रसंयोगादिरेवः प्रत्यासत्तिरिति न तत्र विशे
षणता प्रत्यासत्तिः ॥ ॥तत्र ज्ञांचः ॥ अस्तिताविदि हभूतले घटो नास्तीत्यबाधिता बुद्धिः सा च यं न भूतलावलंबना घटव
त्यपि प्रसंगात् नापि केवलभूतलावलंबना अतिरिक्तकैवल्यानभ्युपगमात् भूतलमेव कैवल्यमिति चेन्न हि पूर्वोनरुक्तम
धिकं च अभेदे आधाराधेयभावानुपपत्तिश्च स्वरूपाधिकाभाववादिनाप्यभावस्याश्रयो वाच्यः देशादिनियमेन व्यवहा
रात् तथा चास्ति भूतलविशेषणोऽभावाश्रयः स च भूतलमात्रं घटवत्यपि प्रसंगात् नाभावयुक्तं अन्योन्याश्रयात् न च
टवद्विरोधादिति चेन्न विशेषस्याभावाश्रयतात् स चानुगत एव एकाश्रयतात्वननुगतस्य घटाश्रयतेवमनवस्थितिः किंच रामः ४३
कुत्राभाव इति प्रश्ने यत्र प्रतीयते इत्येवोत्तरं कुत्र प्रतीयत इति प्रश्ने यत्रास्तीत्यत्र अन्यथा गोत्वादिकमपि न स्वीक्रियेतत्तदा
श्रयविशेषादेव व्यवहारसंभवात् तथापि कीदृशे भूतलेऽभाव इति चेत् अभावपूर्वसमये कीदृशं भूतलमिति प्रश्ने घटवदि
त्युत्तरं अभावसमये अभाववदिति मध्यसमये तु नास्त्येव इह भूतले घटाभाव इत्याधाराधेयभावप्रतीतेश्च अभावाधा

रत्वं भूतलस्य न प्रतीयते किंतु तन्मात्रबुद्धिविषयत्वमिति चेत् अहो व्याख्या कौशलं मनुभवोपि व्याख्यायुक्तप्यते तन्मा
त्रपदार्थं निर्वचनं च न हि भूतलबुद्धिस्तन्मात्रबुद्धिः घटवद्भूतलबुद्धेरपि भूतलबुद्धित्वात् सा च न बुद्धिर्भूतलस्यैव किंतु घट
भूतलयोरुभयविषयो मयारिव देवतात्वमिति चेत् न ततो भूतलस्याव्यवहारप्रसंगात् भूतलस्याविषयत्वात् अस्तु भाविभू
तलविषयकज्ञानांतरादिकं तानां तराद्यादि चेन्न सेव बुद्धिस्तन्मात्रबुद्धिरिति न दृश्ये घटाभावव्यवहारप्रसंगः एतेन भू
तलेंद्रियसन्निकर्षजघटवद्भूतलेंद्रियसन्निकर्षजज्ञानयोर्विशेषो गीकरणीयः सामग्रीभेदस्य कार्यभेदनियतत्वा
त् तथा च स एव तन्मात्रपदार्थ इति निरस्तं ततोपि भूतलव्यवहारात् प्रतियोगितयाप्येतरजनिताभूतलबुद्धिरभा
व इति चेत् न घटवृत्तितत्त्वन्निकायामपीदृतरजनितत्वात् तन्मात्रजनितास्येति चेन्न मात्रार्थस्याभावत्वात्स्य चाज्ञाना
त् घटाविषयास्वीभूतलाविषयेति चेत् न उक्तोत्तरत्वात् किंच प्रतियोगिनिरूपणाधीननिरूपणीयोऽत्यभावः बुद्धिस्तु
न तथा प्रतियोगिप्रकारं विनापि बुद्धिनिरूपणात् व्यवहारार्थं सा तत्र प्रतियोगिज्ञानापेक्षा अभावो ज्ञात एवेति चेन्न व्य
वहारस्य व्यवहर्तव्यापलंभमात्रनिबंधनत्वेन तथा दृष्टचरत्वात् यदि प्रतियोगिस्मरणसापेक्षा तन्मात्रधीरभावपदार्थः
तदांधकारंशोयातन्मात्रधीसाऽभावो न स्यात् तथा च तत्र विचरन् कंटकैर्विध्येत कंटकस्मरणं विना कंटकाभावा
भावात् निर्गुणे च प्रविष्टे पि दृ जलनिःस्मरणं न स्यात् तदानी तन्मात्रबुद्धेः सर्वथाभावात् किंच तन्मात्रधीनाशे घटोन्म
ज्जनप्रसंगः घटाभावाभावस्य घटत्वात् यदि चाभावो नातिरिक्तः तदा यत्र घटसंसृष्टत्वबुद्धिरासीत् तत्र तन्मात्रधीन

चिंता० मू० मुकरपानजन्यातिरिक्तविषयानंगीकारात्। अतिरिक्ताभावे किं मानमिति चेन्नास्तीति बुद्धिरेव न तत्त्वभावव्यवहारानुपपत्तिरन्यो
५५ न्याश्रयादिति। अत्र प्राभाकराः घटवद्भूतलज्ञानबुद्धिभिन्ना भूतलबुद्धिरभावव्यवहारकारणं न च दोषात् घटवति घटवत्ताज्ञाने
भूतलज्ञानमभावः स्यादिति वाच्यं। घटवतो भूतलस्य ज्ञाने तद्भिन्नस्य भूतलज्ञानस्याभावात्। तत्र मानाभावभ्रमः। वस्तुतो
ऽनंताभावे प्रतियोगिमदधिकरणज्ञानस्याप्रसिद्धेः प्रतियोगिमत् ज्ञानभिन्नमधिकरणज्ञानं व्यधिकरणाभावव्यवहारका
रणं समानाधिकरणनिषेधप्रतीतिश्च प्रतियोग्यधिकरणज्ञानयोः स्वरूपभेदमवलंबते तेन घटत्वेन ज्ञायमानेपि भू
तले भूतलं घटो नेति प्रतीतिः तयाऽपि तस्याभावज्ञानकारणत्वपरेषां तदेवाभावव्यवहारकारणमस्तु न त्वधिकरणबुद्धिवि
नाशा बुद्धिः न च भूतलबुद्धित्वापा घटवत्यपि प्रसंगात्। न चाभावाधिकरणभूतलविषयता बुद्धेर्विशेषः प्रतियोगिसत्त्वेपि
प्राग्भूतासीदिदमत्रेति प्रतीतेः। किंच ज्ञानविषयभूतलस्याभावो यदि विशेषणं तदाऽभावज्ञानमेव तत् ज्ञानकरणमुपलक्षणं
चेन्न कश्चिद्विशेषः प्रतियोगिमत्तयाऽनुपलब्धिरूपि कारणमिति चेन्न। प्रतियोगिमत्तयोपलंभेपि प्राग्भूतासीदिदमत्रेति प्रती रामः १
तेः। बुद्धोस्त्वभेदः स्वरूपविशेषादेव नान्योन्याभावोऽनवस्थानादात्माश्रयाच्च। यद्वा भूतलज्ञानापेक्षया घटवद्भूतलज्ञानत्व ५५
मेवैकधर्मभेदः। न चातिरिक्ताभावपक्षेऽप्यन्योन्याभावे त्वत्ताभावे च नित्ये प्रमाणमस्ति प्रतियोगिनि बुद्धिस्थेऽधिकरणे स्वरू
पस्यैव नास्तीति प्रसंजकत्वात्। न हि तत्राधिकरणस्य प्रतियोगितादात्म्यं प्रतियोगिमत्त्वं वा संभवति। अत एवाभावे भावांतरत्व
यानसौ क्रियते। अधिकरणस्य द्वैरूप्याभावात्। ननु अर्थे नैव विशेषो बुद्धेः नचात्राधर्मे दोषोऽस्ति मैवं। न हि तावदर्थो ज्ञान

कारणमवरूपं किंतु सामग्रीविशेषात् बुद्धिविशेषो जायते धारावाहिकवत्। यद्वा घटवद्भूतलभिन्नभूतलमभावः। यत्र परे
षामभावः भेदश्च स्वरूपमेव तादात्म्येनाप्रतीतेः प्रतीतिश्चनित्तु वापि स्वरूपभेदलक्षणं इदानीमिदं भूतलं घटवद्भूतलं न भव
तीति भेदप्रतीतेः एतावांस्तु विशेषोऽपरत्र व समानाधिकरणनिषेधप्रतीतिरियमन्योन्याभावं भेदमवगाहते मम तु स्वरूपभेदं
ननु परेण भूतलं घटवद्भूतलाभिन्नमासीत् तदेव कथं तेन भिन्नमिति चेन्न तथाप्यबाधितसामानाधिकरण्यनिषेधप्रतीतिबलेन
नान्योन्याभाववैशिष्ट्यमपादेयस्य दुर्वारत्वात्। मम च भेदेन भेदाभेदौ न विरुध्येते इति तु समानं। यदि च घटवद्भूतलाभिन्नं तदा
नीं स्यात् तदा घटवद्भूतलव्यवहारस्तत्रापि स्यात् घटतदभावावच्छेदेनान्योन्याभाववत् तदभावो भूतले वर्त्तते इति चेत्। ममापि
भूतलबुद्धिघटवद्भूतलबुद्ध्यवच्छेदभेदेन स्वरूपभेदाभेदौ वर्त्तेते इति गृहाण। ननु भूतले घटो नास्तीति संज्ञायां घटोऽस्तीति
विपर्ययो वा कथं भवेत् प्रतियोगिनि बुद्धिस्थे अधिकरणस्य तज्ज्ञानस्य वाऽभावस्योपलंभादिति चेत्। न भूतलेतज्ज्ञाने वा
घटवत्त्वभ्रमस्य घटवद्भिन्नज्ञानत्वस्य वा दोषवशेनानिश्चयात् भूतलतज्ज्ञानस्वरूपाणामननुगमात्। कथमनुगतप्र
तीतिरिति चेत् अभावेपि तुल्यत्वात्। न स्वभावत्वं सामान्यं अभावत्वमसामान्यगतान्योन्याभावाव्यापनात्। न च भावविरोधित्वं
विरोधस्याभावनिरूप्यत्वात्। भावाभावयोः सहानवस्थानाभावस्य स्वरूपानतिरेकात्। नापि भावप्रतियोगित्वं प्रतियोगित्वस्या
भावविरहरूपत्वात्। अभावाभावस्य भावाप्रतियोगित्वाच्च। नापि समप्रतियोगित्वं समवायसादृश्यादीनामपि तथात्वात्। ना
पि परकीयस्वभावत्वं ज्ञानादिगतत्वात्। स्वभाववशात् स्वस्वरूपाधर्मत्वेनानुगतत्वाच्च। नापि सत्तान्यून्यत्वं सत्ताया मेवगतत्वात्। शून्य

चिंता·मू· तस्याभावरूपत्वात्ध्वंसत्वात्यंताभाववत्वमभावत्वं·अत्यंताभावध्वंसाभावानवगुताव्यवगतइतिचेन्न·अभावे·भावानभ्युप
४५ गमात्प्रमेयत्वेपितथात्वावृतइनभ्युपगमात्·सप्ताबोधाविधुरत्वमभावत्वंसामान्यादौसत्तावगमेपिबाधात्सात्यजते·अभावस्यतद्वि
रोधित्वयैवप्रतीतेरितिचेन्न·विरोधित्वस्यस्वरूपानतिरिक्तत्वात्·सहानवस्थाननियमेविरोधइतिचेन्न·अनवस्थानस्या
भावत्वेनात्माश्रयात्·भावभिन्नत्वमितिचेन्न·भेदस्यस्वरूपान्योन्याभावरूपत्वेउक्तदोषात्·वैधर्म्यस्याभिन्नत्वमानत्वात्·प्रा
गभावत्वादेवभावनिरूप्यत्वात्·एवंवेदभावेपिनानुगमः·तदाकिमधिकेनएवंस्वरूपविशेषादेवघटव्यवहारोस्तुइतिचे
न्न·भूतलविलक्षणघटानुभवात्·एकएवाभावोनुगतइतिचेन्न·तस्यनित्यत्वेप्रतियोगिकालेप्यभावव्यवहारप्रसंगात्·
प्रागभावादिव्युत्पादनविरोधाच्च·यद्वा·अभाववादिनापिकाभावदशानकारणमनुगतोभूतादिर्वा·बुद्धिविशेषःस्वीकार्यः
तदरंसएवास्तुप्रमेयंप्रमाणंचस्वप्रकाशत्वात्·बुद्धीनांननुतन्मात्रबुद्धेरभावत्वे·तस्याःस्वप्रकाशत्वेनप्रतियोगिज्ञाना
पेक्षानस्यादितिचेन्न·नग्रहणापलतदपेक्षा·किंतुव्यवहारापत्तानस्यसत्यामिच्छायांव्यवहारार्थमधिकानपेक्षेतिचेन्न·द
ष्टाहिव्यवहारार्थमधिकापेक्षायथापरिमाणस्यदीर्घत्वव्यवहारेतथासाधिकसंख्यावच्छिन्नहस्तवितस्त्याद्यवच्छेदःपरिमा रामः
णस्यदीर्घत्वं·तद्वीपरीतंह्रस्वत्वंतादृशापरिमाणंचावयविग्रहणसमकालमेवानुभूतं·दीर्घव्यपदेशस्तुन्यूनसंख्यावच्छिन्नह ४५
स्तवितस्त्याद्यवच्छेदपरिमाणज्ञानमपेक्षतेतन्मात्रबुद्धेरभावत्वेदृश्यप्रतियोगिज्ञानापेक्षादृश्यतासंपत्त्यर्थंअतएवकेवलाको
टादिस्तन्मात्रसाम्प्यर्थंवतीनवतन्मात्रबुद्धेरभावत्वेनक्रियाद्याभावाभावेभावोन्मज्जनप्रसंगइतिवाच्यंयथापटाभावोबुद्धि

रूपाबुद्ध्यभावस्यापिबुद्ध्यंतरत्वात्·निर्गुणेबंधविच्छेदेजजनिस्सरणेनानुपपन्नंमनुष्याभावेपिपक्षिकीटादिबुद्धिविशेषसं
भवात्·मोक्षेपिपुरुषांतरनियमेप्रमाणंनास्तीतिचेन्न·कार्याकारणकल्पनात्·नचैवंबुद्धिनाशेपुनःसंसारितापत्तिःबुद्धिधा
रासंभवात्·नचसर्वमुक्तिःप्रमाणाभावात्·प्रतियोगिमदधिकरणभिन्नाधिकरणस्वरूपस्याभावत्वे·सर्वंसमंजसमितिपूर्वपक्षः॥
सिद्धांतस्तु·सप्रतियोगिकोभावोनुभूयतेघटोनपटोनपटोमित्यनुभवात्·नतुतन्मात्रमतोभावविविक्तत्वंप्रतियोगिनःप्रतियो
गिज्ञानाधीनज्ञानत्वंचाभावस्यानुभवसाक्षिकगोत्वादरूपादिवत्·नचकेवलमधिकरणं·तत्ज्ञानंवात्राभावःप्रतियोगिज्ञानंवि
नापितद्दिशेःतद्वित्तौप्रतियोगिनोविषयताभावस्सप्रतियोगिकत्वाभावेचकस्यप्रतियोगीघटःअपकेवलमधिकरणंतत्ज्ञानं
वाअभावःस्यात्प्रतियोगिकएवव्यवहारस्तुप्रतियोगिज्ञानमपेक्षतइतितस्यप्रतियोगीघटःघटतरभावव्यवहारयोर्विशेषा
दितिचेन्न·अत्रघटोनेतिनजर्थस्यप्रतियोगीघटोनुभूयते·नत्वभावज्ञानोत्तरभाविनोभावव्यवहारस्यतस्याभावानुभवसमयेऽप्र नं
तीतेः·भूतलरूपनेसोनतन्नुभूयतइतिचेन्न·तादृशानुभवंविनातथाव्यवहाराभावात्·व्यवहारेप्रतियोगिज्ञानापेक्षेतिनयुक्तं
व्यवहर्तव्यज्ञानस्यसत्यामिच्छायांव्यवहारेधिकापेक्षायाअदृष्टचरत्वात्·लाघवादिहतथाकल्प्यतेन्नत्वभावइतिचेन्न·व्यवहार
मात्रेतथाकारणत्वानवधारणात्·व्यवहारविषयस्यानुगतत्वात्·ह्रस्वत्वदीर्घत्वेचपरिमाणांतरेएवतत्वाप्यन्याधिकसंख्या
वच्छिन्नहस्ताद्यवच्छेदघृत·ह्रस्वत्वदीर्घत्वंवान्याधिकावधिज्ञानाधीनंज्ञानमतोवयवग्रहसमकालंपरिमाणानुभवेपिनानुभूत
१न मितितत्राव्यवहारःगोसादृश्यपदपिगवयगतानिसामान्यानिततज्ज्ञानसमकालमेवानुभूतानि·तथापिगोरत्रिवेगवय

चिंता·मू· ४६ त्वनिवृत्तं गोसादृश्यत्वं गोज्ञानाधीनज्ञानमिति नूतरसादृश्यव्यवहारः स्यादेतत् अस्मितावत्कस्यचित्ज्ञानात् कचिदभावपदप्र
योगः सर्वसिद्धः तत्र प्रयोगालंबनं भूतलाद्येव घटवत्तितिरिक्ताप्रकाशनात् ततश्च यदपेक्षं यस्याभावपदप्रयोगविषयत्वं तत्त
स्याभावत्वमुपेयते तद्बुद्धिजनिताभावपदप्रयोगविषयत्वमेव घटभूतलयोः प्रतियोग्यनुयोगिरूपः संबंधः अत एव भूत
लस्य सप्रतियोगिकत्वं न तद्बुद्धिजनिताभावपदप्रयोगविषयत्वेन तद्बुद्धिं विना अभावपदप्रयोगाविषयत्वात् अनेनैवोपाधिना
घटाभावादिपदव्युत्पत्तिग्रह इति तन्न अभावपदप्रयोगालंबनं न भूतलं न हि भूतलं घटाभाव इति प्रतीतिप्रयोगो ऽपि तु भूतले
घटाभाव इति भूतले घट इति वत् भूतले घटो नास्तीति भूतलाधिकरणातिरिक्तेनार्थप्रकाशनात् अपि च घटबुद्धिजनिताभावप
दप्रयोगविषयत्वे भूतलस्य घटाभावत्वं तथा च घटाभावत्वेन तस्यावगते घटाभावपदप्रयोगविषयत्वं घटाभावपदप्रयोगवि
षयत्वे च ज्ञाते तस्य घटाभावत्वमित्यन्योन्याश्रयः पदप्रवृत्तिनिमित्तेनावगते पदप्रयोगनियमात् घटाभावत्वं च घटाभावपद
प्रवृत्तिनिमित्तं यदि न भूतलं सप्रतियोगिकं तदा प्रतियोगिनं घटं विना केवलं न भासेत सादृश्यादिवत् घटाभावपदप्रयोगव्या
प्यं तत्सप्रतियोगिकं नान्यदेति चेन्न तर्हि सप्रतियोगित्वे तस्य घटबुद्धिजनिताभावपदप्रयोगविषयत्वं सति च तस्मिन् घटप्रति रामः ४६
योगिकत्वमित्यन्योन्याश्रयः केवलस्याप्रतियोगिकत्वात् एवं च गोबुद्धिजनितसादृश्यपदप्रयोगविषयत्वं गवयस्य गोसादृश्य
मस्तु भूतमतिरिक्तसादृश्ये नेति सप्रतियोगिकपदार्थलोपः अपि च केवलभूतलमभावः भूतलाभावयोराधाराधेयभावानुभवा
त् अभेदे तदनुपपत्तेः दुःखवदात्माभिन्नस्य चात्मनो दुःखाभाववत्वे मोक्षस्यापुरुषार्थत्वप्रसंगः आत्मनोऽसाध्यत्वात् अपघटवद्भू

तलज्ञानभिन्नं भूतलज्ञानमभावः तस्य च भूतलाधारतास्वरूपसंबंधेनानुभूयत इति चेन्न ज्ञानस्य निःप्रतियोगित्वेनाभावत्वानु
पपत्तेरित्युक्तत्वात् अपि च तत् ज्ञानं किं स्वरूपसदेवाभावव्यवहारकारणं भूतलाधिकरणनिषेधरूपतयानुभूयमानं वा नाद्यः स्वरू
पसतो भूतलाधेयतया प्रयोगानुपपत्तेः न द्वितीयः घटवद्भूतलज्ञानस्येदानीमनुपस्थितेः तद्भिन्नज्ञानस्य प्रत्येतुमशक्यत्वा
त् किं च यदि घटवद्भूतलज्ञानाभिन्नं भूतलज्ञानमभावस्तदा घटवत्तिरोधानात् घटवत्ताज्ञाने भूतलज्ञानमभावो भवेत् तथा च तदेव घ
टवद्घटाभाववत् स्यात् न स्यात् तावद् घटाभावज्ञानव्यवहारो विसंवादिनो विषयबाधाभावात् अथ वस्तुतो घटवतो भूतलस्य
ज्ञानाभिन्नं भूतलज्ञानमभावः न च घटवति भूतले ज्ञानं तथा व्यवहारस्तु विसंवादितया दिग्भ्रमदर्शनादिति चेन्न तर्हि घटवतो भू
तलस्य ज्ञानाभिन्नत्वेन ज्ञातं भूतलज्ञानं तदभावव्यवहारहेतुः न च तत्संभवति स्वप्रकाशेनानुव्यवसायेन वाधिकरणज्ञाने त
त्प्रकाशनात् भेदप्रतियोगिनोऽनुपस्थितेः न च ज्ञानांतरेण तथानुभवयोग्यानुपलब्धात्र घटाभावनिश्चयं विना तथा निश्चेतु
मशक्यत्वात् अपि च अधिकरणतज्ज्ञानानामननुगतत्वेनानुगताभावव्यवहारोऽनुपपत्तिः न चातिरिक्ताभावपक्षेऽपि तथा अभा
वत्वस्याननुगतत्वस्याभावादिति वाच्यम् अनुगताभावत्वं विनापि घटादिर्न पट इति समानाधिकरणनिषेधानुगतव्यवहारः घटा
न्योन्याभावेनैकेन क्रियते एवं घटादावपि न गोत्वमित्याद्यनुगतव्यवहार एकेनात्यंताभावेन कपालेषु भूतले इदानीं घटो विनष्ट
इत्यनुगतव्यवहार एकेन ध्वंसेन घटानुत्पाददशायामेतेषु नास्तीति व्यवहार एकेन प्रागभावेन एवं चतुर्धानुगतनिषेधव्यव
हाराः चतसृभिरभावव्यक्तिभिः क्रियंते तत्तद्भावचतुष्टयं तत्तदधिकरणानां तत्तद्बुद्धीनां चाननुगतत्वान्न संभवति अनुगताभावव

चिंता॰मू॰ ४८ तुल्यव्यवहारस्य प्रत्येकाभावेनोपपादयितुमशक्यत्वादित्यतिरिक्ताभावचतुष्टयसिद्धिः तस्य च यथा भावत्वे नैकेनैकपदार्थत्वं
तथानुपरमेव वक्ष्यामः स्यादेतत् यस्मिन्समयविशेषे यत्र भूतले ऽभावः परैः स्वीक्रियते तत्समयविशेषयोग एव भूतले घटाभा
वः एवं चेह भूतले घटो नास्तीति आधाराधेयभावप्रतीतिरप्युपपद्यते समयविशेषयोगस्य भूतलवृत्तित्वात् न च समयविशेष
योगस्याभावत्वे ऽननुगमो दोषः अतिरिक्ताभावपक्षेऽपि समानत्वात् अभावत्व जातेरुपाधेर्वाऽसत्त्वात् यद्वा अभावप्रतीतिप्रयो
गानुगमाय तत्र धर्मान्तरं स्वीक्रियते तत्र दासमयविशेषयोगवृत्त्येव तदस्तु लाघवादिति तन्न समयविशेषयोगस्य निःप्रतियो
गित्वेनाभावव्यवहारासामर्थ्यात् किं च भूतलवत् समयविशेषोपि अभावाधारतयानुभूयते इदानीं भूतले घटो नास्तीति प्रतीतेः
न च तत्समयविशेषतत्समयविशेषयोगयोरभेदसंबंधानुपपत्तेराधाराधेयभावाभावात् अपि च समये किमभावाश्रयत्वेन विशेषः
तत्र तत्समयस्वरूपं वा आद्ये अभावस्वीकारः द्वितीये ननुगमः समयत्वेनाभावव्यवहारे वर्तमानानां समयवृत्तित्वात् किं च समयविशे
षयोगादिदानीं भूतलमिति प्रतीतिप्रयोगौ स्यातां विशेषणस्य स्वप्रकारकविशिष्टप्रत्ययजनकत्वात् न तु भूतले घटाभाव इति
न यद्वि तत्समयविशेषयोगात् भूतले घटाभावव्यवहारं गतसपादरूपसंस्थानविशेषविशिष्टे कपाले घटो वर्तते तादृककपाला रामः ४९
दिकमेव तत्समययोगात् घटादिव्यवहारजनकमस्तु किं घटादिना प्रतीतिस्तु स्यैव एतेन दृष्टस्तावद्रूपं घटोत्पत्तेन दृष्टस्तत्पामु
ग्ररोदृष्टाकर्परसंहतिः परमितोऽभावो न दृष्टोपरगतेनाभाव इति स्तुतिः कृति हि तार्किं वात्र तत्कारणं स्वाधीनाकलनशास्य केवल
मियं दृष्टाकपाला वलीनिरस्तं मुद्गरपातानंतरं विनष्टो घट इति प्रतीत्यातिरिक्तविनाशानुभवात् न च केवलभूतलत्वं तद्बुद्धि

तत्रान्यात्वेन निरूपितयोः सत्वात् नन्मते च तयोरभावमात्रत्वे न हि विनाशित्वायोगात् योगे वा अभावमात्रस्य विनाशिता
पत्तिः अपत्तन्मते यद्विनाशकं तद्वस्तुत्वहितं भूतलनाशानंतरा विनाशाद् इति चेन्न मुद्गरपातजन्यो हि नाशो नुभूयते न च तस्मै
वनजनकत्वं स प्रतियोगिकस्याभावो नुभूयते न च मुद्गरपातस्तत्पान्यभावेन सम्यं भूतलस्य संबंधाभावात् कथं भूतले घटाभाव
प्रत्यय स्वरूपसंबंधादिति चेन्न तर्हि घटवद्भूतलस्यापि च तदीयाभावेन स्वरूपसंबंधोस्ति भूतल मभावश्च इत्यतो धिकस्य स्वरूप
संबंधस्याभावात् प्रतियोग्यारोपए वस्वरूपसंबंधो न एवारोप्य निषिध्यते इत्युच्यते इति चेन्न तत्राभावसंबंधे सत्यारोपः स एव चा
भावसंबंध इत्यन्योन्याश्रयादिति चेन्न वैसंबंधांतरमंतरेण विशिष्टप्रत्ययजननयोग्यतत्स्य स्वरूपसंबंधत्वात् न च घटकभूत
लवत्वरीय घटाभावयोः परस्परं विशिष्टप्रत्ययः ज्ञानविषययोः समवायसमवायिनोरिव संबंधसंबंधांतराभ्युपगमे वान
वस्थाभियेति संबंधसंबंधिनोरपि तादृशस्वरूपसंबंधस्वीकारादिति सिद्धो ऽतिरिक्तो भाव इति तन्न ह्रादिकाविशेषणे तेतिव्यवस्थित
मेतत् ॥ षोढा सन्निकर्षः प्रत्यक्षविशेषे कारणमिति विषये आलोकसंयोगश्च तत्र कारणं न तु चक्षुषा प्रकाशस्ये न चक्षुषां
धकारस्यस्याग्रहादेपरीत्यं च ग्रहात् नन्वेवं पृष्ठभागावच्छेदेनालोकसंयुक्तोपि घटो गृह्येत न चावयविग्रहसामग्र्यास्थावयव
ग्रहसामग्रीनियमात् परभागावच्छिन्नो न गृह्यत इति वाच्यं अणुके व्यभिचारात् प्रत्यक्षावयवे च सामग्रीभेदकल्पने मानाभा
वात् अभ्यभिमुखावयवावच्छेदेन घटालोकसंयोगः कारणं तस्य सम्मुखावयवावच्छेदेन चक्षुरालोकसंयोगो पि हेतुरस्तु य
द्वा आलोकसंयोगावच्छिन्ने चक्षुःसंयोगस्तथा समानदेशतावैरी पृथग्विनि विडावयवयोरेवान्यथा घटमहारजनयो घंटजनपो

चिंता॰ प्र॰ ४८ श्राग्रहप्रसंगः। न हि घटसंयोगावच्छिन्नचक्षुरालोकसंयोगः कारणमस्तु यद्विचालितनीत्यायेनालोकसंन्निहिते चक्षुर्घटसं
योगः कारणं तदा घटचक्षुःसंयोगसन्निहितचक्षुरालोकसंयोगो हेतुरस्त्विति चेत्। मैवं। अन्वयव्यतिरेकाभ्यां विषयालोकसंयो
गस्य कारणत्वे निश्चिते तेनैवोपपत्तौ न चक्षुरालोकसंयोगः कारणं कल्प्यते। अन्यैस्तु द्वयोरप्यालोकसंयोगयोः कारणत्वे विषया
लोकसंयोगः कारणमेवेति नन्वभिमुखावयवावच्छेदेन विषयालोकसंयोगस्य हेतुत्वे आवरकता द्रव्ययुवालोकसंयोगएव कार
णमस्त्विति चेत्। अवयवसंयोगमात्रस्यातिप्रसक्तेः स्वावयवसंयोगावच्छिन्नस्य गतयाच स्वसंयोगो हेतुर्लाघवात्। अवयवसंयोगेना
न्यथासिद्धेः संयोगस्य कारणत्वे वनस्पत्यादिपुक्तं आलोकस्योद्भूतरूपमपि व्यंजकं अन्वयव्यतिरेकात्। ननु तेजः कारणमावश्यकं
तद्भासादिषु नालोकचाक्षुषत्वाभावात्। न च स्वातंत्र्येणान्वयव्यतिरेकित्वात् द्वयोरपि हेतुत्वं अन्यथा दंडादेरपि चक्रावच्छेदकत्वं स्यादि
ति वाच्यं उद्भूतरूपतेजोमात्रयोः समवधाने कार्यानुदयादिति चेत्। मैवं। उद्भूतरूपतेजस्त्वं तेजस उद्भूतरूपत्वं वा वच्छेदकमिति
विनिगमकाभावादुभयोरपि हेतुत्वात् दंडचक्रयोरिव एकं विहायापरस्यान्वयव्यतिरेकाभावात्। एवं चक्षुरूपमपि व्यंजकं व्यंज प्रो
कतेजोरूपत्वात् आलोकरूपवत् रूपस्य व्यंजकत्वे उद्भूतरूपत्वं तेजोगतोद्भूतरूपत्वं वा नोपाधिः व्यभिचारेण गौरवेण वाप्रयो रामः ४८
जकत्वात् किंतु व्यंजकरूपत्वमेव हेतुर्लाघवात्। विषयस्यापि रूपमुद्भूतं सहकारी तदुद्भवत्वेच मानं इंद्रियालोकादिप्रत्यासं
त्तौ महद्द्रव्यपि वायूपनीतसुरभिसूक्ष्मचंपकादिकं साक्षात्कारणीभूतं किंचित्समवधानं प्रत्यक्षत्वात्। अंधकारस्य घट
वदिति तत्र कारणं लाघवादनुगतं सामान्यं रूपादिरहितं द्रव्यगतं उष्मादौ स्पर्शग्रहे रूपस्याभावात् रूपग्रहे स्पर्शस्याग्रहप्रसंगा

त् उद्भवत्वैकार्थसमवायाविशेषात् अन्यथा स्पर्शरूपयोरग्रहप्रसंगात्। नाप्युद्भवत्वं रूपादिवृत्तित्वेनैवोपपत्ते रूपस्पर्शयोस्तु न
नानात्वं ग्रहेप्यपरस्याग्रहात्। न च रूपत्वादिना परापरभावानुपपत्तिः नानात्वादिवृत्तेर्नानात्वात् रूपादिप्रत्यक्षे एकैकोनुवृत्तस्यैव
प्रयोजकत्वात्। ननु महत्त्वएवोद्भूतत्वमस्तु तदेव प्रत्यक्षे तंत्रं लाघवात्। न तु रूपमपि गौरवात् इति चेन्न। आश्रयमहत्त्वोद्भवाभावेपि
गंधस्पर्शयोः प्रत्यक्षत्वेनोद्भवत्वमिति प्रत्यक्षमूर्तविशेषगुणत्वेन रूपेप्युद्भवात् न महत्वे सामान्यगुणत्वात्। अपानुभवत्वमेव जा
तिः अप्रत्यक्षत्वप्रयोजकत्वेन साक्षादेव तत्कल्पनात्। तदभावात् प्रत्यक्षत्वमिति चेन्न। अप्रत्यक्षतायाः प्रत्यक्षकारणविरहप्रयो
ज्यत्वेन प्रत्यक्षकारणस्य लाघवेन जातेः कल्पनात् न तु प्रतिबंधकत्वेनानुद्भवत्वं कल्पितात् तदभावः कारणं गौरवादिति संप्रदा
यविदः। वयं तु ब्रूमः शुक्लत्वादिना कारणरूपादिसंयोगप्रयोज्याभ्यां च जातिभ्यां परापरभावानुपपत्त्या रूपत्वव्याप्यमुद्भूतत्वमनेकवाच्यं
तथा चोद्भूतत्वेन कारणत्वेप्यननुगमः तस्मादनुद्भूतत्वं शुक्लत्वादिव्याप्यं नानाजातिस्तदभावकूटस्तु प्रत्यक्षे प्रयोजकः अन्य
थानुगतप्रत्यक्षतानुपपत्तेः एवं स्पर्शादावपि अथवोद्भूतत्वमनुद्भूतत्वं वा न जातिः किंतु रूपत्वव्याप्यव्याप्यजातिमत्त्वमेवोद्भूतत्वं
तदभावोनुद्भूतत्वं प्रत्यक्षे रूपे शुक्लतरतमत्वादिजातिसत्त्वात्। उष्मचक्षुरादिरूपे तु शुक्लत्वमात्रमेव तद्व्याप्यजातेर्मानाभावादुद्भूतरूपा
भावात्। न च रूपत्वमेव मानं लाघवेन तस्य प्रयोजकत्वे प्रत्यक्षत्वप्रसंगात् एवं स्पर्शादावपि द्रव्येपि महत्त्वेनोद्भवत्वं प्रयोजकं लाघवा
दौ महत्त्वोत्कर्षेप्यप्रत्यक्षत्वात्। ननु भर्जनकपालगतो वह्निर्वारिस्थघटव्यंजकसौरतेजः गृहीत वारिकपालयोः संबंधेत योः प्रत्य
क्षत्वेन उद्भूतरूपवत्त्वात्तयोः संयोगविशेषएव प्रतिबंधक इति चेन्न जलकपालवारीनामालोकव्यंग्यत्वपात प्रतिबंधकत्वा

चिंता०भू० वात्प्रतिबंधकत्वे वा भर्जनकपालसंयोगिवह्निवारिसंयोगिनोः रूपयोरग्रहप्रसंगात् संयोगे च विशेषो न जातिकृतः अन्यत
४९ रकर्मजत्वादिना संकरप्रसंगात् तारतम्यज्ञानानतिगौरवात् नापि तत्संयोगभेदः अननुगमादिति मैवं जलस्पर्शे तेजोभूयस्त्व एव उ
भयोः स्पष्टतया विविच्याग्रहो न भवति भर्जनकपाले वानुद्भूतरूपमुद्भूतस्पर्शमन्यदेव तेजः तादृशैरवयवैर्वह्निसहचरितैरारभ्य
ते अन्यथा तैलादौ कदाचिदुद्भूतरूपावयवप्रवेशाद् ध्यारंभोपि स्यादेवं दुग्धसहचरितदधिपरमाणुभिरेव दध्यारंभः दुग्धधु
सजन्यद्रव्यत्वे न खंडदुग्धवद्दध्नोपि दुग्धोपादानोपादेयत्वात् नन्वेवमुद्भूतरूपवह्न्यादौ उद्भूतस्पर्शो नास्ति तत्सहचरिततेजो
नरसंबंधनियमेन तत्रोष्णत्वबुद्धेरुपपत्तेः उद्भूतरूपोद्भूतस्पर्शसामग्र्योः रूपाणि प्रभादौ च विशेषावधारणादिति चेत् नयं वह्नि
मतोष्णं स्पर्शामीत्य बाधितप्रत्यभिज्ञाबलाद्दर्शनस्पर्शनाभ्यां वह्नौ रूपस्पर्शयोरुपलंभात् न च तेजस्त्वं बाधकमुद्भूतानुभवयो
र्निमित्तभेदप्रयोज्यत्वात् तेजस्त्वस्य रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वेनोद्भूतरूपस्पर्शवद्वृत्तित्वाच्च न चोद्भूतरूपस्पर्शयो
र्विरोधो जलपृथिव्योरुभयसत्वात् तेजसि विरोधस्य निमित्तभेदोपाधिकत्वात् इत्युद्भूतरूपसहचरितयोर्महत्वानेकद्रव्यत्वयो
र्गगनदृष्टाहितया अन्वयव्यतिरेकतुल्यत्वेपि द्रव्यचाक्षुषत्वे नानेकद्रव्यवत्वमुभयवातंत्र्ये गौरवात् किंतु महत्वमेव लाघवात् नेक रामः ४९
द्रव्योत्कर्षं विना तूलकादौ प्रचयजन्योत्कृष्टपरिमाणात् प्रत्यक्षोत्कर्षदर्शनाद्दूरस्थकेशादौ द्व्याणुकानुत्पादेन महत्वाभावेप्ये
ककेशस्य सजातीयसंयोगेनानेकद्रव्यत्वात् द्रव्यप्रत्यक्षतापत्तेरनेकद्रव्यवत्वं तत्र तंत्रमिति चेन्न अनेकद्रव्यसंबंधित्वस्य सम
वायेन प्रयोजकत्वान्न तु संयोगेनातिप्रसंगात् तथा च दूरग्रहणे सजातीयसंयोगस्यानेकद्रव्यवत्वे सहकारितावाच्या सा महत्व

एवास्तु नन्वयदि उद्भूतरूपवत्वं महत्वं च द्रव्यप्रत्यक्षतायां स्वरूपयोग्यता तदा दंडत्वचक्रत्वयोः कारणतान स्यादिति चेन्न तदुक
र्षात्प्रत्यक्षोत्कर्षे एतयोः कारणत्वात् न ह्यकारणोत्कर्षमकार्यमनुविधत्ते दंडत्वादौ तु नैवं प्रकारभेदे नोभयरूपत्वाच्च चाक्षुषद्र
व्यज्ञाने विषयत्वेन तयोः कारणत्वं द्रव्येनुगतत्वेन कारणतावच्छेदकमिति ॥ ॥ ननु नोद्भूतरूपवत्वं तत्र तंत्रं वायोः प्रत्यक्षता
त् तथा हि वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् महत्वे सत्युद्भूतस्पर्शवत्वाद्वा घटवत् उष्मादेः प्रत्यक्षत्वान्न व्यभिचारः न चाप्रयो
जकत्वं स्पार्शनप्रत्यक्षत्वे महत्वे सत्युद्भूतस्पर्शवत्वं प्रयोजकं नोद्भूतरूपवत्वमपि गौरवात् न च पक्षधर्मावच्छिन्नसाध्यव्यापकः
साधनावच्छिन्नसाध्यव्यापकश्चोद्भूतरूपवत्वमुपाधिः स्पार्शनप्रत्यक्षत्वे तस्याप्रयोजकत्वात् त्वगिंद्रियव्यापारानंतरं वायुर्व
तीति प्रतीतेश्च न च स्पर्शाश्रयहेतुरुपक्षयः घटे पितपात्वापत्तेः लैंगिकत्वे च स्पर्शो वायुर्वेति ति धीः स्यात् न त्वनुष्णाशीतस्पर्शो
वायुरिति स्पर्शाश्रये हि शीतो वायुरिति प्रतीतेश्च न च शीतद्रव्योपनायकत्वेनानुमितेवायोतथाधीः बाधकाभावात् विशेषदर्श
ने सत्यारोपाभावाच्च अपि वायोश्चाक्षुषत्वं स्पार्शनत्वे बाधकं चक्षुषानुपलभ्यमानस्य त्वचानुपलंभादिति चेत्तर्हि चक्षुरेव द्रव्यग्राह
कं त्वचा स्पर्शमात्रं प्रतीयते वायावपि प्रत्यभिज्ञापितद्देव वायोस्पानुभवस्य दुरपह्नवत्वात् त्वचाश्रयसहित एव स्पर्श उपलभ्य
ते तदा वायावपि तुल्यं श्रयदोषाभावे सति द्रव्यग्रहे तत्संख्यादिग्रहनियमाद्वायोस्तु पातदग्रहात् सोऽप्रत्यक्ष इति चेन्न
न तावदयं व्याप्तो नियमः पृष्ठवस्त्रलग्नादेः संख्यापरिमाणग्रहे त्वचाग्रहात् न जातीये तु फूत्कारादौ संख्यापरिमाणादीनां
वा यभिपातस्य च शरीरे प्रत्यक्षत्वात् स्यादेतत् बहिरिंद्रियजन्यद्रव्यसाक्षात्कारे महत्वे सत्युद्भूतरूपवत्वं प्रयोजकं सन्निसंभ

चिंता·मू· वेत्यागमप्रयोगात्· नतु जन्येंद्रियग्राह्यविशेषगुणवत्त्वं कार्यमहत्त्वसमानाकरणविशेषगुणवत्त्वं वा रसनगतपित्तद्रव्यस्योद्भू
५० ततिक्तरसस्य वायूपनीतसुरभिद्रव्यस्य च प्रत्यक्षतापत्तेः· अभेकं नोद्भूतरूपवत्त्वं तथा नयनगतपित्तद्रव्यस्य प्रत्यक्षतापत्तेः· अनु
द्भूतस्पर्शवत्त्वं· तैत्रं न चैवं प्रभायां न प्रत्यक्षत्वं प्रभा हि तेजसो रूपं न द्रव्यं तदाश्रयतेजः प्रतीतिः प्रत्यक्षरूपलिंगाधीनैव यथा
तबोध्यादिप्रतीतिः· तत्र संयोगकर्मादिकं प्रत्यक्षमिति चेत्· चांद्रसौरदीपप्रभादीनां कथं विदिं द्र नीलप्रभायां तु रूपस्य पूर्वदेशा
नुपलंभेनोत्तरदेशोपलंभेन च लिंगेन तदाश्रयतेजः संयोगविभागाद्यनुमानमिति चेन्न येषपालवास्पर्शमात्रग्रहान्नेतरफू
त्कारसंयोगादीनामेतेन धूमबाष्पयोः स्पार्शनत्वे नानुद्भूतस्पर्शवत्त्वेपि चाक्षुषत्वं· अन्यथा तत्संयोगविभागकर्मणां प्रत्य
क्षतानस्यात्· लिंगाभावादिति निरस्तं· न च बहिरिंद्रिययोग्यानेकविशेषगुणवत्त्वं प्रयोजकं तत्र सरेणुप्रभयोः प्रत्यक्षतापत्तेः
गौरवाच्च· नन्वेवं विनिगमकाभावादुभयोरपि तत्पात्वमस्तु तथापि वायुर्न प्रत्यक्ष इति चेन्न· एवं बहिरिंद्रियजन्यद्रव्यसाक्षात्
कारे चाक्षुषत्वे स्पार्शनत्वे च प्रत्येकमुद्भूतरूपवत्त्वे सत्युद्भूतस्पर्शवत्त्वं प्रयोजकं पर्यवस्यतीति गौरवं मम तु चाक्षुषत्वे उद्भूतरू राम ५०
पवत्त्वं स्पार्शनत्वे उद्भूतस्पर्शवत्त्वं यस्य विशेषे प्रयोजकत्वं· तस्यानुगतेन रूपेण सामान्ये प्रयोजकत्वमिति· द्रव्यग्राहकबहिरिं
द्रियव्यवस्थापकोद्भूतविशेषगुणयोगित्वं सामान्ये प्रयोजकमिति लाघवं स्यात् विशेषस्य सामान्यस्य च भिन्नभिन्नप्रयोजकत्व
नियमात्रे कं प्रयोजकं· अथ वायुर्यदि बहिरिंद्रियजन्यसाक्षात्कारविषयद्रव्यं स्यात् स्पार्शनजन्यसाक्षात्कारविषयद्रव्यं वा स्या
त्· उद्भूतरूपवान्स्यात्· नचैवं तस्मान्न तथा तादृशसाक्षात्कारविषयद्रव्यस्य रूपजनकत्वनियमात्· इति चेन्न· रूपवत्समवेतत्वे

न हि द्रव्यस्य रूपजनकत्वं ननु तादृशसाक्षात्कारविषयद्रव्यत्वेन तस्य रूपजननतोत्तरकालीनत्वात्· घटो यदि चक्षुरित
रेंद्रियग्राह्यद्रव्यं स्यात् रूपमस्पर्शमचाक्षुषादि स्यात्· त्वगिंद्रियं यदि द्रव्यग्राहकबहिरिंद्रियं स्यात्· रूपवत्स्यात्· स्पर्शग्राह
कं वा न स्यात्· रूपग्राहि चक्षुर्वा स्यात्· नचैवं तस्मान्न तथेति घटोपि न त्वगिंद्रियग्राह्यः स्यात्· तद्गतसंख्यादिज्ञानं फूत्कारदादि
वस्यात्· स्पर्शो गीत्यनुव्यवसायश्च घटवद्वायावपि· अपस्पार्शनत्वे उद्भूतस्पर्शवदुद्भूतरूपमपि तंत्रं उद्भूतरूपवत्त्वेपि चाक्षु
षत्ववत्स्पार्शनत्वदर्शनादिति चेन्न· उद्भूतरूपवत्त्वे सत्यपि प्रभायां न स्पार्शनत्वमिति उद्भूतस्पर्शस्यावश्यकत्वेनोद्भूतरूपस्या
न्यथासिद्धत्वात्· न ह्युद्भूतस्पर्शेऽस्तु उद्भूतरूपाभावात्स्पार्शनत्वाभावः ननु एवं स्पर्शगतउद्भवः कारणमस्तु न तु रूपमकारण
मिति चेत्· तथापि स्पर्शेऽस्तु उद्भवः कारणं न तु रूपमपि तस्मिन् व्यतिरेकाभावेन तदभावाद्दर्शनात्· वस्तुतस्तु· रूपस्प
र्शगते उद्भवत्वजातौ कारणता अवच्छेदकेन तु कारणे इति॥ ॥छ॥ उच्यते· द्रव्यस्पार्शनत्वे उद्भूतस्पर्शवत्त्वमात्रं तंत्रं नित्यादयो
ष्मणि वायूपनीतशीतोष्णद्रव्ये च प्रत्यक्षत्वेन तत्संख्यापरिमाणसंयोगविभागकर्मणां प्रत्यक्षत्वप्रसंगात्· योग्यवृत्ति
त्वेन तेषां योग्यतया द्रव्यग्राहकसामग्र्या प्राप्तत्वावधारणात्· न चोष्मादिजातीये दोषाभावेपि घटादाविव करपरामर्षकरा
पि संख्याग्रहस्तेन तयोद्भूतरूपवत्त्वमात्रस्य तत्पात्वं च नाघुघो तस्य नयनगतपित्तद्रव्यस्य च प्रत्यक्षत्वे· तद्गतसंख्याग्रहोपि स्यात्·
न च घटादाविव दोषाभावे निपुणं निभाल्यं तोपि तद्गतदित्वादिसंख्यामाहत्य वितत्त्वादिपरिमाणं कर्म वा वीक्ष्यामहे इत्येके क
व्यभिचाराद्विनिगमकाभावादुभयमपि बहिरिंद्रियद्रव्यप्रत्यक्षते प्रयोजकमिति वायुरप्रत्यक्षः· नचैवमपसिद्धांतः· प्रोक्तः शा

चिंता॰मू॰ ५१ रजस्त्वादौनयनगतपीतिमेवगृह्यतेनतुपित्तद्रव्यंविषकावयवत्वात्·प्रभायामिवतेजसइति·टीकाकृतामभिधानादिति·न
वीनाःसंप्रदायविदस्तु·चलतिपक्षिकांडादेःपूर्वदेशविभागोत्तरदेशसंयोगयोःप्रत्यक्षतान्नस्यात्·पूर्वोत्तरदेशस्यप्रभामंडलस्या
नुद्भूतस्पर्शनत्वेनाप्रत्यक्षत्वात्·तथाचपरेषांतत्रचलतीतिप्रतीतिरपितल्लिंगिकानस्यात्·अस्माकमपिचंद्रतारादेःसंयोगवि
भागलिंगिकंगत्यनुमानंनस्यात्·नचपूर्वोत्तरदेशयोरुपलंभानुपलंभाभ्यांसंयोगविभागावनुमायताभ्यामेवगत्यनुमानंपू
र्वदेशयोरप्रत्यक्षत्वेनलिंगासिद्धेः·तस्मादुद्भूतरूपवत्वंतत्रप्रयोजकमितिवायुरप्रत्यक्षः·ननुशीतोवायुरिति·आरोपोन
स्पार्शनःविशेष्यस्यायोग्यत्वात्·नचप्रमायांतथासामान्येबाधकाभावात्·नाप्यनुमानोपनीतवायौतगिंद्रियोपनीतशी
तारोपः·शीतद्रव्याभेदारोपोवामनसातल्लिंगस्पर्शादिस्तुकस्याग्रहणात्·शीतस्पर्शस्यातल्लिंगत्वात्·नचशीतद्रव्योपना
यकत्वेनानुमितेवायौमनसाशीतारोपः·शीतानाश्रयत्वेनानुमितेवायौतदनारोपात्·नापिपीतःशंखइतिवत्बहिरिंद्रियज
न्योयंयेनानुमानिकविशेषग्रहेपिदोषमहात्म्यात्भवेत्·शीतद्रव्योपनायकत्वप्रमाणादिकामविदुषोपिशीतोवायुरितिप्रत्ययाद्बना
पिलिंगाभासजन्योऽनुमितिरूपोभ्रमः·तदप्रतीतेः·शीतस्पर्शवायुलिंगत्वेनभ्रमाविषयत्वात्·नचशीतस्पर्शानुमितेद्रव्येस्मृत रामः ५१
वाय्वभेदारोपोवायुविशेष्यकप्रत्ययत्वात्·अतएवशीतस्पर्शोयंवायोरितिभ्रमःशरीरमुपास्ते·नस्वस्पर्शभिन्नमवतत्स्वात्मेभ्रसि
तपदार्थसंसर्गारोपवृत्तमानसोयंत्वगिंद्रियव्यापारानुविधानादिति·उच्यते·यथावायुवैधर्म्येणजलहतितयागृहीतस्पर्शी
तस्पर्शस्यवायावारोपोदिङ्मोहवद्दोषमहात्म्यात्·तथाशीतस्पर्शवायुलिंगत्वारोपात्क्षायवीयतानुमानंनचैवंशीतोवायुरि

तिधीर्नस्यादितिवाच्यं·शीतोयंवायवीयइतिज्ञानानंतरंशीतोवायुरितिमनसारोपादनुष्टोवायुरितिवत्·त्वग्व्यापारानंतरं
वायुर्वातीतिकथंप्रतीतिः·नतल्लिंगसंयोगविभागयोरप्रत्यक्षत्वात्·नचशरीरेवायुभिघातएवलिंगं·अभिघातस्यसंयोगत्वेना
प्रत्यक्षत्वादितिचेन्न·अभिघातजन्यसुखदुःखविशेषेणाभिघातमुन्नीयतस्यस्पर्शवद्वेगजन्यत्वमनुमायवेगेनकर्मानुमाना
त्·एवंप्रणालीमविदुषस्तत्प्रत्ययासिद्धेः·अथवायुःशीतोवातीतिकथंविशिष्टवैशिष्ट्यप्रतीतिरिकाशीतविशिष्टप्रतीतेर्मानस
त्वेनकर्मविशिष्टप्रतीतेरानुमानिकत्वेनजातिसंकरप्रसंगादितिचेतन्न·शीतविशिष्टत्वेनवायौकर्मानुमानात्·नतूभयवि
शेषणं·एकदाभासतेनचैवंकल्पनागौरवंदोषायप्रत्यक्षत्वेबाधवद्विरोधात्·एवंबहिरिंद्रियजद्रव्यप्रत्यक्षेउद्भूतरूपस्यप्र
योजकत्वेव्यवस्थिते·प्रत्यक्षत्वबाधकानुमानेपक्षधर्मावच्छिन्नस्यसाधनावच्छिन्नस्यवासाध्यस्यव्यापकमुद्भूतरूपवत्वमु
पाधिः·नचविशिष्टव्यभिचारव्यतिरेकयोःसाधनेबाधोंतरविशेष्यव्यभिचारव्यतिरेकसिद्धिपर्यवसानादित्युपाधौवक्ष्यामः
अथवायुवदात्मापिनप्रत्यक्षः·द्रव्यप्रत्यक्षत्वेउद्भूतरूपवत्वस्यप्रयोजकत्वात्·नचलिंगज्ञानंविनैवाहंजानामीतिप्रत्ययात्
प्रालैंगिकत्वज्ञानमविदुषोजानामीतिविशिष्टप्रत्ययाभावेतत्तानस्यैवलिंगत्वात्·नचघटमहंजानामीतिवर्तमानार्थप्रत्य
योनस्यात्·घटज्ञानस्यानुमितिपूर्वतृतीयक्षणविनाशादितिवाच्यं·स्थूलसमयोपाधिमादायवर्तमानप्रत्ययोपपत्तेः·यथाकु
लालेवेष्टादर्शनेनकरोतीत्यनुमितिः·उच्यते·योहंघटमद्राक्षंसोहंस्पृशामीत्यभेदप्रत्यभिज्ञानादात्माप्रत्यक्षः·नचैतत्स्पर्श
नज्ञानाश्रयोहंतद्दर्शनज्ञानाश्रयादभिन्नःमशरीरादंप्रत्ययविषयत्वात्·तद्दर्शनज्ञानाश्रयवदित्यात्माभेदप्रत्ययइतिवाच्यं·

चिंता·मू· मस्तस्याप्रत्यक्षत्वेन लिंगासिद्धेः नच ज्ञानेनात्मानुमानं ततस्तत्र ज्ञानेच्छाजातीयत्वानुमानं ततो मदीयाहंप्रत्ययविषयत्व
५२ ज्ञानमात्मनीति वाच्यं एवं प्रणाजीमविदुषोपि ज्ञो हं सोहमिति प्रत्ययात् नच वायो प्रत्यभिज्ञानमस्ति मंदागतिमत्वेन तस्य
पुनरज्ञानात् स एव पुनः पुरो वात इति प्रतीतेस्तज्जातीयत्वानुमानरूपत्वात् तस्मात् वायुर्बहिरिंद्रियाप्रत्यक्षः नीरूपद्रव्य
त्वादाकाशवत् तु साधनावच्छिन्नसाध्यव्यापकमुद्भूतस्पर्शानाश्रयत्वमुपाधिः उद्भूतस्पर्शस्य तत्राहेतुत्वेनोपाधेः साध्याव्या
पकत्वात् किं चोद्भूतस्पर्शवत्त्वस्य बहिरिंद्रियजन्यद्रव्यसाक्षात्कारप्रयोजकत्वे सुवर्णरूपतेजोद्रव्यं प्रत्यक्षं न स्यात् अभावत्त्व
स्यानुद्भूतस्पर्शवत्त्वात् रूपं तु तस्योद्भूतमेव किंतूपष्टंभकपीतरूपाभिभूतं अभिनववस्त्रबज वत्सजातीयसंबंध एव तेनांधका
रे पीताग्रहणेप्यभिभवः नचैवमंधकारे सुवर्णोपलंभापत्तिरभिभूतरूपस्यापि तेजसो ग्रहात् नच तेजसि तेजोंतरं व्यंजक
मिति वाच्यं रूपे गृह्यमाण एव चक्षुषा द्रव्यग्रहात् सुवर्णरूपमभिभवादेव नोपजप्यते उपष्टंभकरूपं चालोकाभावादपयपा
रुणं कपिलादिरूपाभिभूतमपि वह्निरूपं परमात्मानं च प्रकाशयति तपाकनकरूपमपि प्रकाशेत प्रकाशते इति चेन्न तत्राभि राम·१
भूतरूपवह्निसंबंधाः नभिभूतरूपावयवादिमध्यवर्तिनी प्रभेव व्यंजिकायवावहो रूपभास्वरत्वेनाभिभूते किंतु शुक्लत्वमात्रं ५२
सुवर्णे तु रूपमभिभूतं तेन न शुक्लत्वभास्वरत्वे अभिभूते अभिभूतव्यक्तयग्रहान्न गृह्यत इति फलबलात्कल्प्यते नच पीति
मगुरुत्वाश्रयातिरिक्तं तदसिद्धं अस्ति हि सुवर्णस्यात्यंतानलसंयोगेपि पीतरूपं न तद्विजातीयं तदुपपन्नं असति द्रवद्रव्य
संबंधे पार्थिवेत्यंतानलसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वनियमात् जलसंबंधे तदपगमे च घटादेर्दाहादर्श

नात् तदिदं ध्मायमानं कनकं पयस्यंतानिसंयोगि पार्थिवत्वे सति विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयोगि न स्यात् पूर्व
पूर्वरूपविजातीयरूपवत्स्यात् वह्निसंबंधपटवत् अन्यथा पार्थिवं न स्यात् जलं वा स्यात् तदयं प्रयोगः अत्यंतानलसं
योगिपीतं विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तं अत्यंतानलसंयोगित्वे सति पूर्वरूपविजातीयरूपानधिकरणपार्थिव
त्वात् जलमध्यस्थितानलसंयुक्तपीतपटवत् यद्वा पीतं सुवर्णपीतरूपातिरिक्तरूपोत्पत्तिप्रतिबंधकद्रवद्रव्यसंयुक्तं नक्तं दिवम
ग्निसंयोगेपि पीतरूपानाश्रयत्वात् तात्पर्यतमग्निसंयुक्तजलमध्यस्थपीतघृतवत् नचात्राप्रयोजकत्वं विरोधिद्रवद्रव्यसंबंधं विना
पार्थिवेत्यंतानलसंयोगस्य विजातीयरूपजनकत्वात् तच्च द्रवद्रव्यं न जलं न जलं स्वाभाविकद्रवत्वानाश्रयत्वात् नचानुद्भूतं
तत्रैव जलविजातत्वे अग्निसंयोगाद्दाहदर्शनेनानुद्भूतद्रवत्वस्य दाहाविरोधित्वात् नैवं द्रव्यं न जलं स्वाभाविकद्रवत्वानाश्र
यत्वात् नचानुमितिकद्रवत्वाद्व नापि तत एव पार्थिवं वृत पार्थिवस्य विजातीयरूपप्रतिबंधकत्वे घृतादावपि तपात्तापत्तेः
तत्रापि रूपपरावृत्तिप्रसंगाच्च उपष्टंभकस्यापि पार्थिवत्वेन विजातीयरूपप्रतिबंधकत्वात् यद्यपि तेजोंतरं नैमित्तिकद्रव
त्वाधिकरणं नापि विजातीयरूपप्रतिबंधकं किंतु तज्जनकं तथापि प्रत्यक्षद्रवत्वेन तस्य रूपत्वे पृथिवीजलान्यत्वेन तेजस्त्वाद्
मिथ्याहकमानसिद्धं तथा तं पीतभागद्रवत्वमप्यग्निसंयोगेन न नश्यति इतत्तेजः प्रतिबंधादेव जलमध्यस्थितसंयुक्तघृतवदि
२न त्यपयदि इत तेजसो विजातीयरूपप्रतिबंधकत्वं दाजजस्यपटवत् इत सुवर्णमध्यस्थितपरादेरपि रूपपरावृत्तिर्न स्यादि
ति चिन्न लोके हि सुवर्णत्वेनानुभूयमाने पीतद्रव्ये अविनिर्भागवर्तिन्युपष्टंभके इतत्तेजो विजातीयरूपं प्रतिबध्नाति नान्यत्र तत

चिंता·मू· ५२ पैवान्वयव्यतिरेकात्· तर्हि उपष्टंभकत्वं अनुभवसिद्धं सुवर्णस्येत्यावरकत्वात्· तस्यैव रूपपरावृत्तिप्रतिबंधकत्वमस्तु उक्तं दृष्टविजा
तीयतेजःकल्पनयेति चेन्न· उपष्टंभकमात्रे हि विजातीयरूपप्रतिबंधकस्वभावत्वं हतं तेजसो धर्मिग्राहकमानसिद्धत्वात् स्पतेनैव
वरूपेण सिद्धेश्च यद्दितं तेजो रूपपरावृत्तिप्रतिबंधकं स्यात्· परादिरूपपरावृत्तिमपि प्रतिबध्नीयादिति तर्कस्य तद्विपर्ययस्य च सिद्ध
सिद्धिपराहतत्वात्· अनुभूयमानसुवर्णस्य स्वरूपपरावृत्तिप्रतिबंधकस्वभावत्वेन धर्मिग्राहकमानादन्यतो वा सिद्धं येन पार्थिवे ऽस्
ति विरोधि द्रवद्रव्यसंबंधे ऽग्निसंयोगस्य रूपपरावृत्तिकत्वमन्वयव्यतिरेकसिद्धं परिभूयेतेत्याचार्याः· नवीनास्तु· अत्यंताग्निसंयो
गे नानुच्छिद्यमानप्रत्यक्षद्रवत्वाधिकरणं· तेजस्त्वं जलपृथिवीभ्यामन्यत्वे सति रूपवत्त्वाद्दहिवत्· न चासिद्धिः· प्रत्यक्षद्रवत्वाधारत्वेन
तत्स्वरूपवत्त्वात्· न च तज्जलं सांसिद्धिकद्रवत्वानाधारत्वात् नैमित्तिकद्रवत्वाधारत्वात्· स्नेहशून्यत्वाद्वा लाक्षावत् स्नेहे सति स्नेहा
धीनसंग्रहप्रसंगात् नापि पार्थिवं अत्यंतानलसंयोगे ऽप्यनुच्छिद्यमानं यत् द्रवत्वं तदधिकरणत्वात्· जलपरमाणुवत्· असति वि
रोधिद्रवद्रव्यसंबंध इति विशेषणेन तेन क्वथ्यमानजलस्थघृतेन न व्यभिचारः· न चाप्रयोजकत्वं· अत्यंतानलसंयोगेन लाक्षाघृता रामः ५२
दिद्रवत्वोच्छेदे पृथिवीद्रवत्वमेव प्रयोजकं असति बाधके ऽनुगतस्य प्रयोजकत्वे संभवति त्यागायोगात्· न तु घृतद्रवत्वादिकम
ननुगमात्· नापि नैमित्तिकद्रवत्वं द्रवत्वमेव वा सुवर्णे ऽपि द्रवत्वोच्छेदप्रसंगात्· अथ पार्थिवमपि सांसिद्धिकद्रवत्वं तैलजलन्यजुत्वां
तरे वा अत्यंताग्निसंयोगानुच्छिद्यते अतो ननुगतमेव तृणारणिमणिन्यायेन द्रवत्वोच्छेदे प्रयोजकमिति चेन्न· पृथिवीद्रवत्वोच्छेदे
पृथिवीद्रवत्वं जलद्रवत्वोच्छेदे जन्यजलद्रवत्वं द्रवत्वमात्रोच्छेदे च जन्यद्रवत्वं प्रयोजकं लाघवात्· एतेन विवादविषयः पृथिवीनैमि
रमव

त्तिकद्रवत्वाश्रयत्वात्· घृतवदिति सत्प्रतिपक्षत्वमपास्तं· अनुकूलतर्काभावेनाग्निसंयोगाद्द्रवत्वोच्छेदप्रसंगलक्षणप्रतिकूल
तर्केण च हीनबलत्वात्· अथ नैमित्तिकद्रवत्वे पृथिवीत्वं समवायिकारणतावच्छेदकमसति बाधके त्यागायोगादिति चेन्न· घटादा
वपि तत्प्रसंगात्· न च घृतलाक्षादिषु पृथिवीत्वावांतरं किंचिदनुगतमस्ति नैमित्तिकद्रवत्वसमवायिकारणतावच्छेदकं पृथिवी
नियतं नैमित्तिकद्रवत्वं कथमपृथिव्यामिति चेन्न· तावन्निर्व्यग्गमनोऽर्ईज्जलनवत्त्वजातिनियतं तत् घटादावभावात्· नापि पृ
थिवीत्वावांतरजातिविशेषनियतं· घृतं विहाय लाक्षादिषु अभावात्· अपि तूपष्टंभके पीतिमगुरुत्वाश्रये पार्थिवे ऽत्यंताग्नि
संयोगेनानुच्छिद्यमानद्रवत्वाधारत्वमनैकांतिकं न हि तेजोद्रवत्वदृष्टांतं द्रवत्वमेव न स्तीति पीतं दृतमिति प्रतीतेरिति चेन्न· तत
त्र द्रवत्वाभावात्· पार्थिवद्रवत्वस्यात्यंताग्निसंयोगोच्छित्त्यापत्त्याबाधकेन दृतप्रतीतेर्भ्रमत्वात् हि पीतं कठिनमेवोपलभ्यतेति
चेन्न जलमध्यस्थितस्योदरादेरिव तरवयवानां द्रवद्रव्यसंबंधेन प्रशिथिलसंयोगाश्रयत्वात्· न तु तेषां द्रवत्वं नन्वेवं घृतमपि
तथा द्रवत्वे बाधकाभावात्· अन्ये तु· उपष्टंभके द्रवत्वमुत्पद्यत एव अनुभवस्य दुरपह्नवत्वात्· अत्यंताग्निसंयोगेन तदुच्छेदस्तु
स नभवति द्रवद्रव्यस्य तेजः प्रतिबंधकत्वात्· न चैवं दृतते जस्यि मानाभावः· तथा हि पीतं द्रवत्वाधिकरणं द्रवत्वोच्छेदप्रतिबंध
कद्रवद्रव्यसंयुक्तं· अत्यंताग्निसंयोगे ऽप्यनुच्छिद्यमानद्रवत्वाधारत्वे सति पार्थिवत्वात्· क्वथ्यमानजलमध्यस्थितघृतवत्· अ
थवा रूपित्वे जलान्यविवसति तैजसत्वपार्थिवत्वसंदेहे विवादाध्यासितं द्रवत्वाधिकरणं तैजसं असति द्रवद्रव्यसंबंधे ऽत्यंता
ग्निसंबंधेनानुच्छिद्यमानद्रवत्वाधिकरणत्वात्· यन्नैवं तन्नैवं यथा क्वथ्यमानघृतं जलं वेति व्यतिरेकी न चासाधारण्यं अगृह्यमाण

विशेषदर्शनायांतस्यदोषत्वात्·तथाहियथासाध्याभाववद्वृत्तित्वेनतस्यपक्षेसाध्यसाध्यसाधकत्वंतथासाध्यवद्वृत्तित्वे
नसाध्याभावसाधकतापिस्यादितिसत्प्रतिपक्षोत्थापकतयातस्यदोषत्वंनचसाध्याभावसाधकस्यपृथिवीत्वसिद्धिपर्यवसायि
नस्तुल्यबलत्वं·अनुकूलतर्काभावेनयदीदंपार्थिवंस्यात्·अस्यातिद्रवद्रव्यसंबंधेत्यंताग्निसंयोगेनोच्छिद्यमानद्रवत्वाधिकरणंस्या
त्·तैलवदितिप्रतिकूलतर्केणचहीनबलत्वात्·यदीदंजलान्य·रूपवत्वेसतितैजसंनस्यात्·पार्थिवंस्यात्·यदीदंपार्थिवंस्याद्त्य
ताग्निसंयोगेनोच्छिद्यमानद्रवत्वाधिकरणंस्यादित्यनुकूलतर्कसद्भावेनप्रतिकूलतर्काभावेनचतैजसत्वसाधकस्याधिकबल
त्वात्·यद्विवासाधारणस्यसाध्यतदभाववद्वृत्तित्वेनतदुभयसंशयजनकतयादोषत्वंतथापिविशेषादर्शनसहितसंशाय स्य
कत्वंप्रकृतेवानुकूलतर्कविशेषदर्शनसत्वकृतस्यव्यतिरेकिभावेनसाध्यसाधकत्वंतस्माद्यदासाध्यतदभावकोटौनविशे
षदर्शनंतदासाधारणस्यदोषत्वं·नचैवंशब्दोऽनित्यःशब्दत्वादित्यादिकमपिहेतुःस्यात्विशेषदर्शनदशायामिष्टत्वात्·अन्येतु·
तैजसत्वंनाद्रवरूपवन्मात्रवृत्तिसुवर्णवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात्·पृथिवीत्ववत्·यद्वातैजसत्वंद्रवत्वशून्यरूपवद्वृत्तिद्रव्य
त्वसाक्षाद्व्याप्यजातित्वात्·जलत्ववत्·नचरसवद्वृत्तित्वमुपाधिःरसवत्वंवृत्तसमानाधिकरणात्यंताभावप्रतियोगिअदृतवृत्ति रामः
द्रव्यत्वव्याप्यधर्मत्वात्·घटत्ववदितिहेतौतैजसःसिद्धौसाध्याव्यापकत्वादितिसामान्यतोदृष्टेनतैजसिद्रवत्वंप्रसाध्यविवा ५४
दाध्यासितंरक्तंतैजसंअत्यंताग्निसंयोगेनानुच्छिद्यमानद्रवत्वाधिकरणत्वात्·नयदेवंनतदेवंयथाजलमितिवदंतिअयप्र
थमानुमानेतेजोमात्रावृत्तित्वमुपाधिःनचपक्षेतरत्वं·प्रदीपतादेरपिव्यावर्त्यत्वादितिचेन्न·बलवद्विपक्षबाधकेनविवा

स्र॰ ता

दविषयेरक्तेतैजसत्वसिद्धावुपाधेःसाध्याव्यापकत्वात्·एवंविवादाध्यासितंपार्थिवत्वतैजसत्वसाधकानियद्यपिबहून्यनुमा
नानिसंभवंतितथापिविपक्षबाधकतर्कात्तैजसत्वसाधकस्यबलवत्वमितिज्ञातव्यं·अयदततरतादेःकमृशःप्रतीतेःप्रबलाग्निसंयो
गेनसुवर्णनाशानंतरद्रवत्वंनप्रतीत्यमितिहेतुः·नचद्रवत्वप्रागभावासमानाधिकरणद्रवत्वध्वंसरूपउच्छेदोनसुवर्णद्रवत्वनात्रोप्य
सिमद्रवतोऽन्यादात्·घृतेचनतथेतिवाच्यं·सुवर्णद्रवत्वनाशेसतिविनष्टाश्रयेद्रवत्वांतरस्यानुत्पादेनद्रवत्वप्रागभावासमानाधि
करणद्रवत्वध्वंसस्यसत्वादितिचेन्न·सुवर्णद्रवत्वंतदाश्रयनाशादिनरूपतिनत्वग्निसंयोगात्·यद्विवाग्निसंयोगादिनरूपेततदा
नघृतवद्द्रवत्वांतरमुत्पद्येतद्रवत्वोच्छेदकाग्निसंयोगस्यद्रवत्वांतरप्रतिबंधकत्वात्·तथाचाग्निसंयोगेसतितद्धेतुकनाश
प्रतियोगिकद्रवत्वाधिकरणत्वादितिहेत्वर्थः·अथवाघृतेद्रवत्वोच्छेदसमयेसमानाधिकरणद्रवत्वसामग्रीसमवधानंनास्ति
सुवर्णेत्वस्तिएवंचसमानाधिकरणद्रवत्वसामग्रीसमवहिताग्निसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रवत्वांतरभातिमत्वंहेत
र्थःयद्वाघृतपरमाणावग्निसंयोगदशायांद्रवत्वनाशेद्रवत्वांतरंनोत्पद्यतेतदारंभेभस्मनिद्रवत्वाभावात्·एवंसुवर्णपरमाणुद्रवत्वं
अग्निसंयोगाद्यदिविनश्येततदारंभसुवर्णमद्रवंस्यान्नचाचसुवर्णारंभकःपरमाणवोनपार्थिवाःअत्यंताग्निसंयोगेनानुच्छिद्यमा
नद्रवत्वाधिकरणत्वात्जलपरमाणुवत्·तैजसावांततएवनयदेवंनतदेवंयथाघृतपरमाणुरितिव्यतिरेकीएवमपार्थिवारब्धंतै
जसारब्धंवासुवर्णंअपार्थिवंतैजसंवाअत्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणपरमाण्वारब्धत्वादित्यन्वयीव्यतिरेकी
चेति·एकदेशीतुद्रवत्वाधिकरणंनतेजःपीतत्वात्नचासिद्धिःपीतंद्रव्यमितिप्रत्ययात्·पीतत्वेपार्थिवत्वाप्रत्यक्षबाधकेनपीतप्रतीति

चिंता॰मू॰ र्म्मइति चेन्न· शुक्लत्वेप्यपार्थिवत्ववत्· पीतत्वेप्यपार्थिवत्वं बाधकाभावात्· यथा नैमित्तिकद्रवत्वे पृथिवीत्वं न तन्त्रं· अतिप्रसंगात् नथा
५५ पीतत्वेपि गंधानियतत्वमपि नैमित्तिकद्रवत्ववदेव पृथिवीजलान्यत्वे सति रूपित्वेन तेज इति चेन्न· अप्रयोजकत्वात्· अन्यथा जल
तेजोन्यत्वे सति स्पर्शवत्त्वेन वायोरपि पृथिवीत्वापत्ते· गन्धरूपरसगंधानामभावान्न तथा त्वे तेषां अनुभवे च पृथिव्युद्भूते रूपर
सगंधाद्यन्यतमवत्त्वात्पादि बहुविधव्याप्तिविरोध इति चेन्न· तेजोद्रव्यमेव प्रत्यक्षं तेजः प्रत्यक्षरूपस्पर्शान्यतरवदेव वस्तुपरप्रका
शकमेवेत्यादिव्याप्तिविरोधस्य तेजस्त्वेपि सत्त्वात्· द्रवत्वाधिकरणं च न तत्त्वपृथिवीतित्वये च साधितं· अतो नैमित्तिकद्रवत्वाधिकरणं
पीतसुवर्णं द्रव्यांतरमेवेत्याह नन्विंद्रियजन्यत्वं सुखादिप्रत्यक्षाव्यापकं प्रत्यक्षलक्षणमिति चेन्न· ज्ञातकरणजन्यसुखाद्यनुभ
वइंद्रियजन्यः जन्यप्रत्यक्षत्वात्· रूपप्रत्यक्षवत्· साक्षात्कारस्येंद्रियजन्यत्वादिति तत्रापि तल्लक्षणसत्त्वात्· स्पर्शाद्यविषयत्वे
नत्वगादिना नार्थांतरं गंधरूपरसस्पर्शेषु एकैकमात्रसाक्षात्कारजनकत्वेन पृथिव्यादिभेदसिद्धेर्निःस्पर्शजाद्य वाह्निरवयवं
च मनः· तच्च विभुज्ञानासमवायिकारणसंयोगाधारत्वात्· नित्येंद्रियत्वात्· नित्यत्वे सति द्रव्यानारंभकद्रव्यत्वात्· विशेषगुण रामः
शून्यद्रव्यत्वादात्मादिवत्· न च महत्त्वमुपाधिः साधनव्यापकत्वादिति भावः· न नु सुखादिमूर्त्तसंयोगासमवायिकारणगुणत्वा ५५
गुणत्वव्याप्यजातियोगि नित्यद्रव्यानित्यविशेषगुणत्वात्· शब्दवत् पाकजरूपेणेति चेन्न· अनात्मवृत्तित्वस्य शब्दभिन्नविशेषगुण
ग्राहकेंद्रियाजन्यत्वस्य वा हृष्यद्रव्यत्वेन मूर्त्तवृत्तित्वस्य चोपाधित्वात्· अप्रयोजकत्वाच्च· कारणे मूर्त्तत्वस्य गुरुत्वात्· अस्तु वा श
रीरात्मसंयोगजन्यत्वेनार्थांतरं· अपि समवाय्यधीनो विभुकार्याणां प्रादेशिकत्वनियम इति विभुमनोयोगादात्ममात्रे सुखा

द्युत्पत्तौ नियमदेशतानस्यात्· अतो अणुमन इति मैवं किमसमवायिकारणं स्वावच्छिन्ने विभुकार्यं जनयतीति नियमः स्वावच्छि
न्ने जनयत्येवेति वा स्वावच्छिन्न एव जनयतीति वा आद्ये सुखादेरधिकदेशत्वे आपादकाभावः द्वितीये अणुमनः संयोगोपि स्वाव
च्छिन्ने अधिकदेशे च जनयेत् नियामकाभावात्· अंत्ये तत्रापि सुखादेरणुमात्रदेशतापत्तिः मनो वैभवेप्यविरोधश्च· अपि च निमित्तवद
नानुरोधेन सुखादेर्न्यूनाधिकदेशता निमित्तवापुंसंयोगादिवशादेव तत्समवाय्यनुरोधात्· तथा च सुखादिकं न दृष्टावच्छिन्नएवोत्प
द्यत इति चेन्न दंत· नहि वैभवेपि तथास्तु न च विभुकार्यासमवायि स्वावच्छिन्ने कार्यं करोत्येव भेर्याकाशसंयोगइव शब्दमिति वदना
धनवच्छिन्नेपि सुखादिकमुत्पाद्यतेति वाच्यं तद्देशीयसुखे हित देशीय चंदनसापेक्षो समवायिहेतुरिति कल्पनं तन्निरपेक्षत्वकल्पनात्
चंदनं च स्वावच्छिन्ने सुखजनकं कथं स्वानवच्छिन्नेपि तदुत्पादयेत्· कथं वा तद्देशीय चंदनसुखं तद्देशचंदनसंबंधजन्यं तेन विनैव
त्पद्येत· अपि च मनो वैभवे सुखाद्युत्पत्तौ नियत उपाधिर्वाच्यः· अन्येन नानानिमित्तसमवधानेपि तद्वच्छेदेनैकदा सुखदुःखादेर्कस्मै
वोत्पद्यते न नानाऽकावच्छेदेनैकक्षणे एक एव विभुगुण उत्पद्यत इति नियमात्· निमित्तस्य तदवच्छेदकत्वेनानुसुखादिकमुत्पद्येत
त्रावृविदिति चेन्न· श्रोत्रे कर्णेन्द्रः कुल्यवच्छेदेन नानानिमित्तादनेकशब्दोत्पादात्· अन्यथा कोलाहलप्रत्ययो न स्यात्· नानावच्छे
देनैकदा चंदनदहनादिसंबंधे सुखदुःखयोरेकदानुभवजन्यत्वेनापादनाच्च· न च तद्यौगपद्यप्रत्ययो भ्रमः· बाधकाभावा
त्· न चान्यत्र क्रमाद्यापि क्रमानुमानं अन्यत्र क्रमस्य निमित्तक्रमाधीनत्वात्· एवं विवादाध्यासितानि सुखदुःखानि युगपदु
त्पन्नासमवायिकारणकानि युगपदुपमानत्वात्· युगपदुत्पन्नघटवत्· अबाधितानुभवाच्च नासिद्धिः· एतेन चक्षुः स्वयाद्धि

चिंता॰मू॰ ५६ रीरावच्छिन्नासमवायिहेतुकं स्यात्. शरीरव्यापकं स्यादिति निरस्तं. निमित्तसमवधानस्य तंत्रत्वेनास्याप्रयोजकत्वात्. अन्यथाणु
पक्षे शरीरव्यापकं सुखादि न स्यात्. आभिमानिकाध्यात्मिकमानोरपि कसुखेषु इच्छाप्रयत्नद्वेषादिषु च न देशनियमः. शरीरा
वयवेषु पक्रियायामिच्छा तदवच्छेदेन प्रयत्न इति. तत्रैव चेष्टाआवश्यकत्वात्. अनियतदेशताह्यानेच्छादौ न धुताच्च. अन्यथाणुत्व
पक्षे प्रयत्नस्याणुदेशत्वं शरीरमात्रदेशत्वं वा स्यात्. अन्ये तु सुखादीनां निमित्तावच्छेदेनात्ममनःसंयोगासमवायीतन्मात्रे सुखाद्यु
पलंभात्. अनियतदेशताना दोऽकमत्वाल्लघुताच्च. नत्वात्ममनःसंयोगमात्रं अतिप्रसंगादित्याहुः. यावत्तियत्सुखादि प्रागभावस्य
तावत्येव तत्सुखादिकमुत्पद्यत इत्यपरे. परंतु तदितरहेतुसाकल्ये तद्व्यापकत्वेन प्रागभावावश्यकत्वमिति. तन्न. प्रागभावस्याहेतु
त्वापत्तेः. तदितरकारणसाकल्ये तस्याविकार्याभावाभावात्. एतेन व्यापकमनो नवच्छिन्नं नेंद्रियमतिप्रसंगादित्याकाशेकर्ण
शष्कुलीवच्छिन्नपतउपाधिर्वाच्यः. स च न शरीरं नद्रव्यपवमात्रं वानियतत्त्वाद्व्यपवृक्षशश्रयमात्रं वानानावयवावच्छेदेनाव्या
प्यवृत्तिसुखाद्युपलब्धेः. एवं च सूक्ष्मं अतींद्रियमुपाधित्वेन कल्पनीयं तथा च तदेव मनः. किमुपधेयेन विभुना तच्च सर्वएव
सर्वएव हेतवो धर्मिग्राहकप्रमाणबाधिता इति निरस्तं. इंद्रियत्वेन तस्य शरीरमात्रस्योपाधित्वेन निमित्तवशात्सुखादेर्नियतदेश रामः ५६
तोपपत्तेः. न चैकदा नेकविषयेंद्रियसंबंधे युगपज्ज्ञानानुत्पत्तेरिंद्रियस्तद्कारितया नुमितं मनो णुतदेव सुखग्राहकमिंद्रिय
जाघवादिति. तत्र्यैभवत्त्वेनवो बाधितः इति वाच्यम्. बुभुत्सावशात्करणधर्मीभावात्रणुत्वप्रश्नोत्रेः नेकराद्धे समवायपि बुभुत्सित
मात्रग्राहकत्वग्रहवद्यासंगदशायां युगपज्ज्ञानानुत्पत्तेस्समपत्तेः. अन्यत्र दीर्घशष्कुलीभक्षणादौ युगपज्ज्ञानोत्पत्तेरिष्टत्वादिति. ॥ ॥

अत्रोच्यते. व्यासंगदशायां भिंद्रियाणां स्वस्वविषयसंबंधेप्येकस्मात्ज्ञानं नान्यस्मादित्यनुभवसिद्धं. अतो यस्यासंबंधान्न युगप
त्ज्ञानानि तदिंद्रियसहकारिक्रमेण तदधिष्ठापकं मनस्तदेव सुखादिग्राहकमिति तस्य धर्मिग्राहकमानबाधितं विभुत्वं. तथाहि.
चाक्षुषज्ञानवतो मेत्रस्य स्वस्वविषयसंबंधानि घ्राणरसनत्वक्श्रोत्राणि तदानीं स्वस्वविषयसाक्षात्कारजनकसंयोगमूल्यानि
तदानीं स्वस्वविषयसाक्षात्काराजनकत्वात्. घटवत्. एकैकं वा पक्षः. अन्यथा हेतुसाकल्ये युगपज्ज्ञानोत्पत्तिप्रसंगः. न च
वैभवेप्यदृष्टविलंबादिविलंबः. तदितरहेतुसाकल्ये तस्यापि सत्वात्. इंद्रियांतरविलोपप्रसंगाच्च. न च बुभुत्सावशात्क्रमः दृश्यते
हि नित्यदर्शनवतो बुभुत्साताभिमतविषयांतरज्ञानमिति वाच्यं. सा हि न स्वविषयज्ञानहेतुः. अबुभुत्सतोपि ज्ञानोदयात्. नाप्य
न्यज्ञानप्रतिबंधिका. घटबुभुत्सायामपि पटज्ञानोदयात्. बुभुत्सा च क्रियाहेतुमनोगोचरप्रयत्नद्वारा इंद्रियांतरमालृष्या
भिमतपदार्थविषयेंद्रियांतरे मनो निवेशयतीति बुभुत्सितग्रहहेतुरन्यग्रहप्रतिबंधिका च न तु साक्षात्. अत एव बुभुत्सा सत्वे
पि मनोगोचरप्रयत्नाभावेज्ञानं किंचित्करीनानिंद्रियमनःसंयोगविशेषएव विषयविशेषग्रहहेतुः कल्प्यतां. न चैवं असिद्धका
रणाभावस्य विशेषकल्पने हेतंतरोच्छेदः. गतस्याप्यन्वयव्यतिरेकित्वादिति. चेन्न. इंद्रियमनःसंयोगे हि विशेषो न जातिरूपः. अन
नुगतहेत्वभावात्. जातिसंकरप्रसंगाच्च. नापि सहकारिरूपः. तस्यैव हेतुतापत्तेः. अथास्तु करणधर्मत्वेन क्रियाक्रमः. एकक
रणमेकत्र एकदा एकावच्छेदेन तुल्यदेशो वा एकजातीयामनेकां क्रियां न करोति. किं त्वेकामेव एकत्वादिविशेषणात्. कु
गरादग्निसंयोगशतेषु च न व्यभिचार इति चेत्. तर्हि चक्षुरग्रावच्छेदेन भिन्नदेशं शब्दवत्. परमाणुविव विजातीयामग्निसं

चिंता॰मू॰ ५७ योगवदनेकक्रियांकुर्यादेव॰ अपज्ञानकरणमेकत्वात्मन्येकदा एकमेवज्ञानं करोति समूहालंबनकरणवत्॰ कथमन्यथा
नानासामग्रीसत्वे समूहालंबनमेकं यत्तु परज्ञानसामग्रीसत्वे ज्ञानावश्यंभाव॰ तदसत्वे किं करणधर्मेण तस्य सह कार्यं
तरपर्यवसायित्वादिति॰ तन्न॰ समूहालंबनसाम्यात्करणस्यैकदैकमात्रजनकस्वभावत्वेनापराजनकतया तत्र करणा
वैनेकसामग्र्यसत्वादितिचेन्न हि॰ पंचसुपदेकं जनयति नापराणीति तत्र नियामकमास्थेयं॰ अन्यथा ज्ञानजननेतेषां कृतहेतुक॰
समाद्ध्यात् किं नैवं युगपत् ज्ञानानि माभुवत् युगपत् ज्ञानं तु केन वार्यते एकजन्यसमूहालंबनवत्॰ न च चाक्षुषत्वादिजाति
संकरापत्तौ नैकं ज्ञानमिति वाच्यं एवं हि फलविरोधेनैकमपि ज्ञानं न जनयेत्॰ अविशेषात्॰ उपतां वा चाक्षुषादिविजातीयज्ञा
नं सामग्रीसत्वात् चित्ररूपवत् फलबलात्तत्र तथेति चेत्॰ तर्हि तत्र फलाभावे हेतुः कल्प्यतामन्योन्यप्रतिबंधकस्य तत्त्वे बाह्य
नमेव न स्यात् न त्वेकस्य ज्ञानमित्युक्तं॰ ननु चक्षुरादिनसंभूयजनकं॰ अन्यविषयेऽन्यस्यासामर्थ्यात्॰ ज्ञातं भुंजे सुरभिचंदन
मित्यत्रैव करणान्तरानुपनयाच्च॰ न च स्वस्वविषयज्ञानायोद्यतमिंद्रियमिंद्रियांतरसहकारात्तद्विषयमादाय स्वस्वविषयं
ज्ञापयेदिति वाच्यं भिन्नभिन्नविषयप्रमाणानां संभूयाजनकत्वनियमात्॰ तन्नयेंद्रियं तत् ज्ञानांशे जनकमित्यपि न विषयस्यांश रा॰म॰ ५७
त्वादिति॰ मैवं॰ न हीन्द्रियाणां संभूयैकावित्तं किं त्वार्थः समाजः॥ प्रत्येकं ज्ञानसामग्रीसत्वादेकदानानाज्ञानप्रसक्तौ करणधर्मत्वेन
मनस्तावदेकोचरमेकामेव ज्ञानक्रियामुत्पादयेत्॰ समूहालंबनवत्॰ ननु नैकक्रियाजननदशायामपरविषयक्रियायां मनोऽसम
र्थमिति कथं तां जनयेदिति वाच्यं॰ भिन्नक्रियायामसामर्थ्येप्येकक्रियायां सामर्थ्यात्॰ वस्तुतस्तु विशेषाभावादेकामिवापरबुद्धिं

जनयेदविशेषात्॰ न चैकामपीत्यनेकज्ञानोत्पत्तिर्ज्ञानानुत्पत्तिर्वानितैकविषयकज्ञानोत्पत्तिरितिनियामकमास्थेयं समूहालं
बनेतु फलबलेन परस्परापेक्षतत्त्वेनैकैव सामग्री॰ ननु मनोणुत्वेपि कथं मंदोपि बुभुक्षितः शाकाग्रहेतन्नान्यः॥ अपशब्दैर्बुभु
क्षेवेतरग्रहप्रतिबंधिका॰ अग्रहस्य तदनुविधानात्॰ अनन्यगतिककार्यदर्शनात्॰ बुभुक्षितशाकग्रहसामग्र्येव बलवती
ति मन्यसे तदावैभवेपि न त एव युगपत् ज्ञानानुत्पत्तिरिति चेत् मैवं॰ बुभुक्षा न रूपादिग्रहहेतुः॥ न चेतरप्रतिबंधके तु कल्पात्॰
किं च रूपादिसकलबुभुत्सायां परस्परप्रतिबंधाद्ज्ञानं बुभुत्साधीनसामग्री बलवतायां सर्वेषां ज्ञानं स्यान्नत्वेकस्य पंचावधा
न्यस्य सर्वज्ञानं न वत्येवेतिचेत्॰ तत्रापि क्रमानुमानात्॰ अन्यथा सर्वबुभुत्साधीनप्रणिधानेप्यन्येषां कुतो न स्यात्॰ न न्वणुत्वे
पि दर्शनिःपद्यमानासु गाथासु तावदेकोचरबुभुत्सायां प्रणिधानेन उक्तरीत्या सर्वासां ज्ञानमज्ञानं वा नत्वेकं ज्ञानमिति चेत्॰ अ
त्र केचित्॰ श्रोत्रमनःसंयोगे आत्ममनःसंयोगे चाविशेषः॥ कार्यैकदेशः॥ किंचिद्ग्रहहेतुः॥ तदन्यग्रहप्रतिबंधकः इति॰ तन्न वैभ
वेपि इंद्रियमनःसंयोगविशेषस्य तथात्वे व्याप्यसंगोपपत्तेः॥ अननुगतरूपाभावेन प्रतिव्यक्ति प्रतिबंधकत्वे हेतुत्वे वा व्यभिचारात्
संयोगविशेषस्य जातित्वे जातिसंकरः॥ उपाधित्वे स एव हेतुर्न मनः॥ अपरे तु॰ प्रत्यक्षानुकूलेंद्रियमनः संयोगद्वारा बुभुत्
सा प्रणिधानयोः प्रत्यक्षहेतुत्वमिति चाक्षुषादि बुभुत्सितग्रहे कारणता॥ श्रोत्रे बुभुत्सितशाकावच्छिन्ने मनः॥ संयुज्यते इ
ति गृह्यते नान्यः॥ कश्चित्प्रणिधानं विनैव तथा अन्यत्र प्रणिधानाधीनक्रियया॥ श्रूयमाणशाकावच्छिन्नात्मनो विभज्य बुभुत्सित
शाकावच्छिन्नेन मनः संयुज्यत इति तद्ग्रहो नान्यस्येति तत्तुच्छं॰ युगपत् पद्यमानासु विरतिगाथासु तावदेकोचरबुभुत्सायां प्रणि

चिंता०मू० धानेच तावत् ग्राह्यावच्छेदेन मनःसंयोगात् युगपत्तासामुपलंभप्रसंगात् प्रत्येकसामग्रीसत्वात् निकटाहन्यमानढक्कादि
५८ शब्दानां श्रोत्रव्यापकत्वनियमाच्च अथ यत्र कोलाहले श्रूयमाण एव बुभुत्सितशब्दग्रहस्तत्रोभयशब्दावच्छेदेन मनःसंयोगा
दुभयग्रहः कोलाहले तूपेक्षाज्ञानं तदितिचेत् तर्हि कृतमनया कुसृष्ट्या अबुभुत्सितउपेक्षाज्ञानमेवास्तु नचतन्
दपि इतोन शब्दांतरमनोषमित्यनुभवात् अन्यथा विभवेपि व्यासंगदशायामितरेषामुपेक्षाज्ञानमेवेति अत्रोच्यते यद्यपि
बुभुत्साप्रणिधानेन शब्दग्रहमात्रे सहकारिणी नवेतरग्रहप्रतिबंधके तथापि नानाशब्दसमवायदशायां यः शब्दग्रहः तत्र तयो
स्तथाभावः तथैव तयोरन्वयव्यतिरेकनियमात् यत्र कोलाहले श्रूयमाण एव बुभुत्सितग्रहस्तत्रान्येपि कोलाहलत्वेनातद्विष
या एव बहूनामेकदा समाजेन युगपत्संनिधानेव्यक्तियहे तत्तत्कत्वादि ग्रहोन भवति अग्रहीतकत्वादिनानाशब्दस्य कोला
हलबुद्धिविषयत्वात् तस्यां दशायां बुभुत्सितशब्दकत्वादि जातिग्रहे बुभुत्सैव कारणं एककालीन बहुशब्दबुभुत्सा च न हेतुः व्यभि
चारात् यत्तु कोलाहलादन्यत्रैकदा नानाशब्दग्रहे श्रोत्रं न समर्थं किंतु एकैकग्रहे नियामिका बुभुत्सैवेति तन्न एकगीयमाना राम० ५८
पेक्षयैकदा नानागीयमानसजातीयगीतादिषु सुस्वरादिवैलक्षण्यानुभवात् अपदीर्घशष्कुलीभक्षणे एकपंचज्ञानानि क्रमस्त
इति चेन्न शब्दानां योगपद्यप्रत्ययस्य बाधकं विना भ्रमत्वात् व्यासंगो बाधक इति चेत्तर्हि मनोऽवयवास्तु तेन संकोचविकाशा
भ्यामुभयमुपपद्यत इति केचित् तन्न यदि संकोचविकाशहेतुरदृष्टं तर्हि तत एव तदुभयमस्तु कृतं मनसा नानापेक्षपंचबुभुत्सया तो
भवतः अस्याहेतुत्वात् हेतुत्वेवास्तु विभुमनः अवयविनो लघुत्वात् अपययपाकचितबुभुत्सयाक्वचित्तीव्र विषयेंद्रियसंनिक

र्षादिंद्रियमनःसंयोगः एवं मनःसंकोचविकासयोर्बुभुत्सादिकं हेतुरितिचेन्न हि पंचबुभुत्सायां प्रणिधाने च सर्वत्र सर्वदा सर्वेषां
पंचज्ञानानि जायेरन् पंचावधानज्ञाने क्रम एव एतेन अणुमनःपंचतयमस्तु अवयविनो लघुत्वात् बुभुत्सावशात्तेषामेकपं
चेंद्रियसंबंधात् तदुभयमुपपद्यत इति निरस्तं पंचबुभुत्सायां सर्वेषां पंचेंद्रियसंबंधापत्ति प्रसंगानुपपत्तेः कथं तर्हि शष्कुली
भक्षणे गंधरसरूपस्पर्शशब्द प्रत्येमीत्यनुव्यवसायः क्रमिकज्ञानपंचतयेन युगपन्मनःसंनिकर्षाभावादितिचेन्न अनुव्यवसा
यस्यैकत्वासिद्धेः अनुव्यवसायाः पंचैव समयसौक्ष्म्यात्तेषां क्रमो न लक्ष्यते अथवा क्रमिकानुव्यवसायाहितसंस्कारात् पंचज्ञान
विषयस्मृतावनुभवत्वारोपात् युगपत्प्रत्येमीत्यनुव्यवसायः विभुत्वे हेत्वभावादात्ममनःसंयोगाभावात् ज्ञानोत्पत्तिसुखाद्युपलंभः स्या
त् द्रव्यत्वेनात्मसंयोगित्वसाधने न संयोगसिद्धौ तत एव न दिग्भागित्वे सर्वदा तयोः परस्परविरुद्धसंयोगविभागप्रसंगः नन्वणुत्वे
समवाय्यनुरोधात् अदृष्टहेतुप्रयत्नस्याणुदेशत्वं शरीरमात्रदेशत्वं वा स्यात् न तु शरीरतदवयवदेशत्वं येन क्रियानियमो भवेत् निया
मकाभावात् न च नोदनाभिघातादिवाव्यापिनोपि प्रयत्नात् शरीरादिक्रियात्वातिप्रसंगात् एवमेकदा विंशतिप्रयत्नाभावात् कथ
मंगुलीषु विंशतिः क्रियाः न च योगपद्यभ्रमः बाधकाभावात् युगपत्सन्निकर्षाभावेनांगुल्यंतरे तत्तत्सुखाद्यनुपपत्तेः विंशति
ज्ञानानामेकदानुव्यवसायासंभवात् अग्रपश्चाभावे विनिगमकाभावात् क्रमोत्पादे च भूनयनकरचरणादिसकलशरीरावयवा
नां युगपत् विचित्रनानाकर्मसमूहरूपं नृत्यं न प्रत्यक्षं स्यात् न पाच प्रत्येककर्मजन्यसुखादिविलक्षणः सुखविशेषो नानुभूये
तेति अत्र ब्रूमः सुखदुःखादिवद्भिकीर्षैव नियामिकाप्रयत्नक्रियायां चिकीर्षा च क्रियात्वाच्चिकीर्षाजन्यात् अणुमात्रदेशात् प्रयत्नो

चिंता॰मू॰ ५९ भ्यति ततः शरीरक्रियापि तत्क्रियाचिकीर्षाजन्यादणुमात्रदेशादपि प्रयत्नाद्भवति· अथवा यस्य क्रियायां चिकीर्षा तदवच्छेदेन
प्रयत्न उत्पद्यते तेन शरीरावच्छेदेनोत्पन्नप्रयत्नादेव शरीरक्रिया एवं विंशतिक्रियाचिकीर्षाजन्यादणुमात्रदेशापि देवप्रयत्नात् विं
शतिक्रियाः युगपदुत्पद्यंते· अथवांगुली विंशतिक्रियायां चिकीर्षेति विंशत्यवच्छेदेन विंशतिप्रयत्ना विंशतिक्रियाहेतव उत्पद्यंते· एवं
नृत्यादावपि एतत् चिकीर्षानुविधानात्· क्रियाप्रयत्नयोरध्यक्षे यंत्र देवमणुमनःसिद्धौ तन्नाशाज्ञात्मविशेषगुणाः बुद्धिः दुःखाद्
यइति नाव्यापकं प्रत्यक्षलक्षणं॥ ॥ननु वर्त्तमानं न मानसं किंतु स्वयमेव स्वव्यवहृतिहेतुः स्वस्मिन् सत्येव स्वव्यवहारात्· न तु ज्ञा
नांतरमपेक्षते तद्व्यतिरेकाननुविधानात्· ज्ञानांतरविरहदशायां स्वविरहादेव व्यवहारविरहात् स्वत एव स्वव्यवहारोपपत्तौ
ज्ञानांतरकल्पने गौरवात्· घटादिव्यवहारे ज्ञानान्वयव्यतिरेकादस्तु तदपेक्षा· स्वीयमतीतमनागतं परकीयज्ञानं च स्वव्यवहारे
ज्ञानांतरमपेक्षते एव स्वव्यवहारकाले तदभावात्· ज्ञानांतरान्वयव्यतिरेकानुविधानाच्च न चैवमिच्छादिकमपि स्वव्यवहारे ज्ञानां
तरं नापेक्षेत ज्ञानतुल्यतया स्वयमेव स्वव्यवहारसमर्थत्वादिति चेन्न व्यवहारस्य ज्ञानजन्यत्वनियमेनेच्छादिव्यवहारे ज्ञाना
पेक्षणात्· अपि ज्ञानमात्रं न व्यवहारहेतुरतिप्रसंगात् किंतु व्यवहर्त्तव्यविषयमिति ज्ञानव्यवहारोपि तद्विषयज्ञानांतरमपेक्षेत् रामः ५९
ति चेत् सत्यं स्वस्यैव स्वविषयत्वात्· यद्व्यवहारानुकूलशक्तियोगि यत् ज्ञानं तस्यैव तद्विषयकत्वात्· शक्तिश्च पदार्थांतरं न कार
णतेति नान्योन्याश्रयः स्वव्यवहारे ज्ञानं शक्तमिति स्वविषयकं व्यवहारशक्तिसमवायादयस्तु स्वभावत एव तदीयाः संबंधांत
रेप्यनवस्थानात्· स्वभाव एव व्यवहारेणैतेन भेदनियतो विषयविषयिभावः कथमभेद इति निरस्तं स्वव्यवहारशक्तस्य स्वविषय

तस्याभेदेपि संभवात्· अस्तु वा ज्ञानस्य स्वभावविशेष एव स्वविषयत्वसंबंधो विनैव संबंधांतरं विशेषात्· यथा ज्ञानं घटीयं घटव्य
वहारजननयोग्यं तथा स्वीयमपि कोसौ स्वभावविशेष इति चेन्न आख्यातुमशक्यत्वेप्यनुभवसिद्धस्य स्वभावविशेषस्य नाधुपरि
व विशेषात्· प्रत्याख्यातुमशक्यत्वात्· यद्यपि स्वभावविशेष इति वाक्येनाख्यायते एवं तथापि पदेनाख्यातुमशक्यत्वात्· अथ व्यव
हारो व्यवहर्त्तव्यभिन्नज्ञानसाध्यः कथं तेन विना स्यादिति चेन्न व्यवहारं प्रति व्यवहर्त्तव्यज्ञानत्वेन कारणत्वात्· न व्यवहर्त्तव्यभि
न्नज्ञानत्वेन गौरवात्· समूहालंबनं चैकैकव्यवहारजनकं तादृशैकैकविषयमपि न तु समूहविषयमेवातिरिक्तस्य तस्यासत्त्वे
न संनिकर्षाभावात्· भ्रमस्य जेवरजतव्यवहारानुकूलाच शक्तिरस्त्येव रजतज्ञाने किंतु दोषाभिभूतेवस्ता जायत इति न तथा
रजते व्यवहारः रजतज्ञानं तु कोन प्रवर्त्तकं किंतु इंद्रियजन्यमिदं ज्ञानमेव रजतार्थिप्रवृत्यर्थं रूप्यस्थितरजतभेदाग्रहमपे
क्षत इति रजतज्ञानं कारणतावच्छेदकं एवं च स्वविषयत्वं स्वप्रकाशत्वं न तु स्वव्यवहारे ज्ञानांतरानपेक्षत्वं गौरवात्· अन्यथा
ज्ञानस्य स्वाविषयत्वे न संस्काराभावात्स्मरणं न स्यात्· यत्तु स्वव्यवहारे ज्ञानांतरानपेक्षत्वमुक्तं तत्स्वप्रकाशत्वनिर्वाहकतया ज्ञा
प्रमाणं स्वप्रकाशे प्रत्यक्षमेव सर्वाः प्रतीयत इदमहं जानामीत्येवमाकारा ज्ञातारं ज्ञानं ज्ञेयं चोल्लिखंत्यो जायंते तेन चात्मा कर्तृत्वेन
ते यं कर्मतया ज्ञानं क्रियात्वेनाभासते· अतो ज्ञाततेयस्य विषयकं स्वं ज्ञानमनुभूयत इति त्रिपुटीप्रत्यक्षवादिनः नान्निदमि
योर तिव्यवसायः तदनु रमिदमहं जानामीत्यनुव्यवसायो मानस इति चेन्न स्वप्रकाशत्वेनोपपत्तौ ज्ञानांतरकल्पना गौरवात्· परिशेषा
च्च स्वप्रकाशत्वं परप्रकाशत्वे ज्ञानमेव न सिध्येत् मानाभावात्· नहि तत्र ज्ञाततालिंगं अतीतानागतयोस्तदभावात् नापि मानसप्रत्य

चिंता·मू· संज्ञजिज्ञासितस्य मानसत्वे ज्ञानाविश्रामादनवस्थानादिविषयांतरासंचाराच्च जिज्ञासितस्य ग्राह्यत्वे ज्ञानं नु मानसं· जिज्ञासाया ज्ञात्म
६० धर्मत्वात्· संस्कारवदित्यनुमानप्रतिरोधः अत एव जिज्ञासां विनैव सुखादौ नो मानसत्वं जिज्ञासापि धर्मिज्ञानसाध्येत्यनवस्था धर्मि
ज्ञानेच्छादिभिर्ज्ञानस्य नाशाच्च न प्रत्यक्षत्वं अपज्ञानं मानसप्रत्यक्षं प्रत्यक्षात्मगुणत्वात् क्षणमात्रस्यापि आत्मविशेषगुणत्वे सतिता
त्वाज्ज्ञानं प्रत्यक्षजनकेंद्रियसन्निकर्षाश्रयः जन्यप्रत्यक्षत्वात् सुखवदिति चेन्न मानसत्वे· नवस्थानात्· अत एव चक्षुर्जन्यं ज्ञा
नं न चक्षुर्जन्यज्ञानविषयः प्रत्यक्षत्वात् रासनवत् नेतत् ज्ञानविषयो वा एतज्जनकेंद्रियसन्निकर्षानाश्रयत्वात्· गगनवत्त्व
क्षुर्न वा क्षुषज्ञानग्राहकं बहिरिंद्रियत्वात्· रसनवदिति प्रतिपक्षानुमानमपास्तं परप्रकाशत्वे· नवस्थयाज्ञानासिद्धेश्चाप्रसि
द्धेः स्वप्रकाशत्वेन तत्सिद्धौ धर्मिग्राहकमानबाधात् किं च स्वव्यवहारशक्तत्वं· स्वविषयत्वं· तच्च स्वसन्निकर्षाजन्यत्वे स्वाजन्ये च न
विरुद्धं· न च स्वव्यवहारशक्तत्वाभाव एव साध्यः अप्रयोजकत्वात् स्वसन्निकर्षाजन्ये स्वाजन्यत्वे स्वव्यवहारशक्ते घटादौ व्यभि
चाराच्च अत एव स्वप्रकाशत्वेन पूर्वानुभवविषयतानतानुभूतमात्रविषयके स्मरणे उत्सर्गतो भासते ज्ञानांतरस्यानावश्यकत्वा
त्· स्वस्य स्वाजन्यत्वे कथं कर्मतेति चेत्· अतीतानागतयोरिव तस्य स्वविषयत्वं न तु कर्मत्वं विषयत्वं चाभेदेपि स्वव्यवहारशक्त रामः
त्वस्य ज्ञानस्वभावविशेषस्य वा विषयत्वात्· न चाधीकर्मतया शशशृंगवदसत्त्वं तस्य कदाप्यप्रकाशात् धीजन्यव्यवहारस्यापि ६०
त्वं च धीकर्मत्वं ज्ञाने स्वप्रकाशेपि· तदन्यफलभागित्वं घटेप्यप्रसिद्धं ज्ञाततानिषेधात्· ज्ञानानपेक्षेंद्रियसन्निकर्षजं ज्ञानं प्रत्यक्ष
मतः अर्थज्ञानं ज्ञानानपेक्षात्ममनःसन्निकर्षजन्यत्वेन स्वात्मनि प्रत्यक्षं विशिष्टज्ञानं च न विशेषणज्ञानजन्यं निर्विकल्पकं निषे

धात् सविकल्पकत्वेन ज्ञानाजन्यं ज्ञानं वा प्रत्यक्षं तेन निर्विकल्पकजन्यं जातिविशिष्टज्ञानं प्रत्यक्षं· नन्वसाधारणेंद्रियादिकर
णं कं तेन विनाप्यनुमित्यादेः स्वात्मप्रकाशात् इंद्रियादिकं तथा प्रकाश एव हेतुः न तस्येव तत्प्रतिबंधहेतुजन्यत्वादिति· अत्रोच्यते·
प्रत्यक्षं न स्वप्रकाशे प्रमाणं व्यवसायानामिदमहं जानामीत्याकाराऽसिद्धेः न चैवमनुभवविरोधः अर्थनिश्चयेन प्रवृत्तिदर्शना
त् व्यवसायस्यार्थमात्रविषयत्वं ज्ञानुभूयते न तु स्वविषयत्वमपि गौरवेण स्वविषयतया तस्य प्रवृत्त्यहेतुत्वात् अनुभवोपीदं रज
तमित्याद्येव न त्वेवमिदमहं जानामीत्यनुभवाभिलापेऽप्यपेक्षणीयता व्यवसायोत्तरकालं तदुपगमात् इदं रजतमित्यादिलौकि
कानुभवात् व्यवसायस्य तदाकारतानिषेधात् न तु व्यवसायस्याभिन्नानुव्यवसाये अनवस्थानात्· व्यवसाय एवानुव्यवसाय
इति चेन्न तर्हि परप्रकाशे बाधकात्· स्वप्रकाशत्वसिद्धौ सर्वप्रतीतीनामिदमहं जानामीत्याकारतासिद्धिः तथा च स्वप्रकाशतासि
द्धौ सर्वप्रतीतीनामिदमहं जानामिदमहं जानामीत्याकारत्वमसिद्धमिति न सा प्रतीतिः स्वप्रकाशे प्रत्यक्षं प्रमाणं· अपि च क्रियायाः
कृतेर्वा समवायित्वं कर्तृत्वं परसमवेतक्रियाफलशालित्वं करणव्यापारविषयत्वं वा कर्मत्वं· धात्वर्थत्वमन्यदा क्रियात्वमिदमहं
जानामीति व्यवसायेन भासते न तद्बोधकेंद्रियसन्निकर्षाभावात्· किंचिदं विषयज्ञानत्वविशिष्टज्ञानं वैशिष्ट्यमात्मनि भासते न च
स्वप्रकाशे व्यवसाये तादृशस्य वैशिष्ट्यं भासितुमर्हति पूर्वं विशेषणस्य तस्याज्ञानात्· तस्मादिदमहं जानामीति न व्यवसायः किं
त्वनुव्यवसायः स्यादेतत्· कर्तृत्वादि ज्ञानादिवैशिष्ट्यमात्मनि मा ज्ञायि व्यवहारस्य स्वविषयकज्ञानसाध्यत्वसिद्धौ तदेव ज्ञानं
स्वविषयकं कल्पते लाघवात्· ज्ञानविशिष्टवेद्य आत्मापि तद्विषय इत्यात्मस्वात्मविषयत्वं· सर्वविनीनामिति चेन्न· स्वजनकेंद्रि

चिंता॰मू॰ ६१ यसंनिकर्षानाश्रयत्वेन स्वस्य स्वाविषयत्वात् स्वविषयत्वनियामकेंद्रियसंनिकर्षादेरभावे स्वविषयत्वानुपपत्तेः कारणं विना कार्या
नुत्पादात् प्रत्यक्षाजनकस्य प्रत्यक्षाविषयत्वानुपपत्तेश्च आत्मधर्मादिप्रत्यासत्त्यानाश्रये प्रत्यक्षविषयतायाः प्रत्यक्षजनकत्व
व्याप्यत्वात् ज्ञानस्य प्रत्यक्षत्वेनेंद्रियसन्निकर्षाश्रयत्वात् मनःसन्निकर्षजन्यत्वेन मानसत्वं तदुपप्रयोगः विवादपदमिंद्रिय
जन्यं ज्ञानं नैतत्ज्ञानविषयः एतज्जनकेंद्रियसन्निकर्षानाश्रयत्वात् एतदजनकत्वाद्वा असन्निकृष्टवत् नैतत्ज्ञानविषयकं
वाज्ञात्मधर्मप्रत्यासत्त्यनाश्रयत्वे सति एतज्जन्यत्वे सति स्मात्मकभिन्नत्वात् प्रत्यक्षविषयो ज्ञानं स्वप्रत्यक्षजनकेंद्रियसन्निकर्षा
श्रयः प्रत्यक्षविषयत्वादिति मनःसन्निकर्षग्राह्यं चाक्षुषज्ञानं न चक्षुर्जन्यज्ञानविषयः चक्षुरसन्निकृष्टत्वात् घटवत् ज्ञानं प्रमे
यमेवेति व्याप्तिज्ञानं ज्ञानत्वप्रत्यासत्त्या स्वविषयत्वे ईश्वरज्ञानमहेतुकत्वेन सर्वविषयत्वात् स्वप्रकाशं न तु परप्रकाशत्वेन ज्ञा
नमेव न सिध्येत् अनवस्थानादिति धर्मिग्राहकमानात् स्वप्रकाशत्वसिद्धावनन्यगतिकतया सन्निकृष्टस्यापि प्रत्यक्षविष
यत्वमतो धर्मिग्राहकमानबाधितास्तदीया हेतव इति चेन्न विनैव स्वरूपवेद्यत्वाभावेनानवस्थाविगमात् संयुक्तसमवायेन म राम॰ १ ६१
नोवेद्यत्वात् अपेक्षणीयांतराभावाच्चोत्पन्नैव कुतो नावरूपवेद्यतेति चिन्त्यं सुखादितत् बुद्ध्यादिसामग्र्याप्रतिबंधात् विषयांतरसं
चाररूपेनैव तस्याबलवत्त्वात् अनुकूलत्वादिति केचित् योग्यात्मविशेषगुणत्वात् ज्ञानत्वात् ज्ञानं प्रत्यक्षमेवेति व्याप्तिरिति स्व
रूपवेद्यत्वेन स्वप्रकाशत्वमिति चेन्न व्याप्तेरसिद्धेः परप्रकाशेऽनवस्थानात् स्वप्रकाशाकारणानुपपत्तेः सन्निकृष्टमेव प्रत्यक्षं तत्
द्विषयजन्यमेव प्रत्यक्षमिति व्याप्तेश्च अन्यथा कारणं विना कार्यानुत्पत्तेः व्याप्तेश्च विनिगमकं कारणसत्त्वेऽपि प्रतिबंधात् कार्या

नुत्पादे कारणत्वमप्यनुपहतं प्रकारणं विना कार्योत्पादे कारणताभंगः कार्यानुत्पादस्य अपि च परप्रकाशेऽनवस्थानात् परि
शेषात् अनुमानेन ज्ञानस्य स्वप्रकाशत्वं तथा च स्वप्रकाशत्वानुमितेरपि स्वप्रकाशत्वमनुमित्यंतरजन्यमेवं तस्याप्यनवस्थास्त
प्रकाशत्वानुमितिपरंपराधारा तथापि स्यात् विषयांतरसंचारस्य प्रतिबंधकत्वं यावत् जिज्ञासंबद्ध स्वप्रकाशत्वानुमितिपर्यंति
दानुत्थं परप्रकाशेऽपि न च ज्ञानं स्वप्रकाशमित्यनुमित्या स्वप्रकाशत्वमपि विषयीकृतं सामान्यप्रत्यासत्त्येति वाच्यं परतःपक्ष
पि तुल्यत्वात् तथा तदनभ्युपगमाच्च किं चानुमित्यादौ जातिसंकराद्प्रत्यक्षत्वं न वृत्तानस्यापेक्षं मनोजनकमिति विषयवत्त्वा
त्वात्तेनैव न प्रत्यक्षत्वं तस्य स्वविषयत्वे ज्ञानानपेक्षेति चेन्न ज्ञानं ज्ञानजन्यं तद्वत्स्वात्मन्येकमेवेति कथं तदपेक्षं तदनपेक्षं विरुद्ध
त्वात् न च ज्ञानभिन्नविषयत्वं न तदपेक्षं तथात्वे हि ज्ञानं प्रत्यक्षं न स्यात् ज्ञानापेक्षत्वात् कथमन्यस्यान्यविषयत्वे सन्निकर्षादि
र्नियामकः स्वस्य स्वविषयत्वे किं तेन तदननि प्रसंगात् सन्निकर्षस्याननुगमाच्च व्यवहारशक्तत्वं स्वविषयत्वमभेदे सन्निकर्ष
विनापीति चेन्न अन्यत्र प्रत्यक्षविषयत्वमात्रे सन्निकर्षस्य हेतुत्वात् अन्यथाननुगमापत्तिरूपयाविलिन्न वेद्यास्य प्रमाणाभा
वादसन्नितिनरधोनमानस्याविषयपर्यंतस्यासत्वं स्यादिति चेन्न अविरलतरप्रत्ययात् दिप्रधारानाभ्युपेयते किं नाम केनचित् करावि
न् कादाचित्कीव्यवहारस्मरणलिंगादिना प्रमीयते इति सर्वाविनिः प्रमाणसिद्धे वेत्यभ्युपगमात् अपस्यादेवं यदि घटोयं घटमहं
जानामीत्यतोऽधिका प्रतीतिर्धारा विषयज्ञानभारमपरा काचिद्भिन्ना स्मरणादेरनुपलभ्यमानानुभूयेत न चैवमिति चेन्न अनुव्यव
सायो विषयमात्रनिरूप्यो न तु तद्विषयनिरूप्यो गौरवात् तथा च ज्ञानं ज्ञानत्वेन सर्वविशिष्टं स्मरणादेरनुपलभ्यमानानुभूयत एव नैव

तद्विषय

मनिर्मोक्षः योगजधर्मेण सामान्यप्रत्यासत्त्या वा व्याप्तिज्ञानरूपस्यानुव्यवसायस्यापि स्वविषयताभ्युपगमात् न च तद्व्यवहारस्या
कत्वं तद्विषयत्वं तद्विषयत्वेन तद्व्यवहारकारणत्वग्रहे सति तज्ज्ञानत्वेन तज्ज्ञाने तदुल्लेखकत्वं च तद्विषयत्वमित्यन्योन्याश्रयात् कारणत्वग्रहं वि
नाशंकेरग्रहात् त्वन्मतेऽपि रजतज्ञानस्य शुक्तिविषयतापत्ते रजतार्थिप्रवृत्तौ रजतज्ञानं हेतुर्न तद्वच्छेदकमित्युक्तत्वात् आपणे
न स्वविषये ज्ञानस्य प्रवर्त्तकत्वं सर्वैरेव प्रवृत्तौ तथाऽवगमात् इति चेन्न एवं तैरेवमन्यथाख्यातिरस्तु न तु तदन्यथासिद्धेः रजतज्ञानस्या
प्रवर्त्तकत्वमिति एतेन यथा तद्गुणसंविज्ञानबहुव्रीहिसिद्धं कुंडगादिपदमर्थाकामपि कुंडगुणमादायैव प्रधानमन्यपदार्थं बोधय
ति तथा ज्ञानमविषयमपि ज्ञात्मानमादाय स्वविषये व्यवहारं करोति संस्कारं च स्वजन्यव्यवहारविषये ज्ञानस्य संस्कारजनक
त्वात् स्वजन्यव्यवहारविषयत्वं स्वात्माविषयत्वेति प्राचीनगुरुमतमपास्तं अन्यत्र ज्ञाप्येन ज्ञानस्य स्वविषये संस्कारव्यवहा
रजनकत्वकल्पनात् स्वाविषये स्वात्मनि च तदजनकत्वात् स्वजन्यव्यवहारसंस्कारयोः स्वविषयज्ञानसाध्यत्वेन स्वाविषय
ज्ञानासाध्यत्वात् ननु ज्ञानस्य मानसत्वे कथं जानामीति विशिष्टबुद्धिर्ज्ञानत्वनिर्विकल्पजन्यज्ञानक्षणे विशेष्यस्याभावेन प्रत्य
क्षानुत्पत्तेरिति चेन्न ज्ञानवानात्मक्षण एव ज्ञाने ज्ञानत्वविशिष्टबुद्धेः विशेष्यस्य पूर्वक्षणसत्त्वात् प्रत्यक्षे स्वसमयवर्त्तितया गौरवेण राम:
विशेषस्याहेतुत्वात् जानामीति वर्त्तमानत्वेन स्थूलकालोपाधिर्भासते न तु क्षणगतेस्तस्यातीन्द्रियत्वात् ततो ज्ञानविशिष्टबुद्धिरात्मनि ६२
विशेषणज्ञानस्य पूर्वसत्त्वात् विशेषणं च न विशिष्टप्रत्ययहेतुः गौरवात् किंतु तत्तज्ज्ञानमात्रजन्यकत्वात् अत एव तत्त्वं विनापि तद्बु
द्धेः प्रत्यभिज्ञापश्चात् व्यवसायमनाक्षणोत्पन्नव्यवसायांतरे ज्ञानत्वविशिष्टबुद्धिरिति तन्न तद्धेतोरसंभवात् अनुमिनोमीत्यादेरनु

नुव्यवसायेऽनुमितित्वाभावाच्च यद्वा ज्ञानं ज्ञानत्वं च निर्विकल्पके भासते ततो ज्ञानत्ववैशिष्ट्यं ज्ञाने ज्ञानवैशिष्ट्यं चात्मनि भासते
विशेषे विशेषणं विशेषणे विशेषणांतरं च भासत इत्येवं हि विशिष्टवैशिष्ट्यार्थः वस्तुतस्तु ज्ञानमभावश्च विशिष्टज्ञानविषयः ए
वच्यनुव्यवसायस्य विषयस्तत्र विशेषणविषयकव्यवसायसाध्यत्वेन विशिष्टज्ञानसामग्रीसत्त्वात् ज्ञानत्वमपि तत्र भासते सा
मग्रीसत्त्वात् अंशे तत्प्रकारकं निःप्रकारकं चेति नरसिंहाकारं तत्रैव विशिष्टज्ञाने ज्ञानत्ववैशिष्ट्यं च भासते अनुमिनोमीत्या
दौ न तथा अनुव्यवसाये अनुमितित्वाभावादिति ज्ञातं च प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चेति तत्र नामजात्यादियोज
नारहितं वैशिष्ट्यानवगाहि निःप्रकारकं निर्विकल्पकं न तु ज्ञानत्वं सविकल्पकभिन्नत्वं नीत्पत्ति किं मानं न प्रत्यक्षं असिद्धेरतीं
द्रियत्वाभ्युपगमाच्च न व्यवहारः तस्याविकल्पसाध्यत्वात् नापीदं पूर्वं न विवेचितं अधुनावि वेचयामीत्यनुभवप्रमाणकावेवालो
चनविकल्पौ बहुविशेषणज्ञानाज्ञानाभ्यां तदुपपत्तेः गौरनुगौरिति प्रत्यक्षं विशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् अनुमितिव
त् न चापि विशेषणविशेष्यभानसामग्रीतः संस्कारोद्बोधे यत्र विषयकं स्मरणं कंज्ञानं विशिष्टज्ञानं तत्र प्रत्यक्षे योग्येन्द्रियसन्निकर्षाद
नुमितौ च पक्षधर्मताबलात् व्याप्तताविच्छेदकप्रकारेण ग्रहे योग्यताबलात् पदार्थतावच्छेदकरूपेण पूर्वमेव विशेषणं
भासते उपमितौ उपमितावप्येवमिति न क्वापि विशेषणज्ञानं हेतुः नन्वेवं प्रत्यभिज्ञायां तत्तानुभवतया तत्तानुभवे वा संस्कार
स्यानुद्बोधादिना लोपाद्वा प्रत्यभिज्ञानुत्पादेन उद्बुद्धसंस्कार एव तत्ता सन्निपात्य विशेषणाभानार्थमिंद्रियसहकारी स्फुरत्वं त्वन्मि
त्यादावपि विशेषणज्ञानार्थं तत्ज्ञानप्रत्यासत्तिस्थानीयपनिविडपसहकारित्वं मोविशिष्टज्ञानमेव नास्तीति चेत् उच्यते साध्य

प्रसिद्धिपदार्थोपस्थितिवाच्यत्वज्ञानतत्रानुभवानामनुमित्यादिहेतुत्वंसाध्यप्रसिद्ध्यादिकंविनातदभावात्साध्यादिकंचविशेषणमितितत्‌ज्ञानमनुमित्यादिहेतुयद्यपिअनुमित्यादिप्रत्येकंप्रतिसाध्यादिप्रत्येकज्ञानत्वेनहेतुतातथापिविशिष्टज्ञानमात्रंप्रतिविशेषणज्ञानमात्रत्वेनकारणतानहीयतेबाधकाभावात्‌‧स्यादेतत्‌वह्निमानित्यादिज्ञानंप्रतिनवह्निज्ञानस्यविशेषणज्ञानत्वेनकारणतान्वयव्यतिरेकाभ्यांनतत्‌ज्ञानेपिवह्निमानितिज्ञानाभावात्‌‧किंतुविशेषणतावच्छेदकप्रकारज्ञानत्वेनातोनविशिष्टज्ञानेविशेषणज्ञानंहेतुःविशेषणज्ञानत्वमपितत्रास्तीतिचेन्नतस्यातिप्रसक्तत्वादन्यथासिद्धेश्चनचतादृशविशेषणज्ञानजन्यत्वंसाध्यंबाधादितिनक्रविशिष्टवैशिष्ट्यज्ञानंप्रतिहिविशेषणतावच्छेदकप्रकारकंज्ञानंकारणंउभयप्रसिद्धमतोविशिष्टज्ञानमात्रंप्रतिविशेषणज्ञानंकारणंयद्विशेषयोःकार्यकारणभाववत्तत्सामान्ययोरपीतिकंविनातथात्वमपिमात्‌‧अन्यथासामान्यकार्योच्छेदःनचातिप्रसंगःविशेषसामग्रीविरहेतत्कार्यविशेषानुत्पादात्‌‧नचपरोक्षत्वमुपाधिःप्रत्यभिज्ञायांसाध्याव्यापकत्वात्‌‧नापिविशिष्टविशेषणकत्वंपक्षेतरत्वादितिमैवंतथापिस्मृतिवत्पूर्वानुभवस्यसंस्कारद्वाराजनकत्वेनसिद्धसाधनात्‌नचाव्यवहितविशेषणज्ञानजन्यत्वंसाध्यंअप्रयोजकत्वात्प्रत्यभिज्ञावत्स्मृत्यैवोपपत्तेर्विनापितत्‌एवाव्यवहितविशेषणानुभवजन्यत्वंसाध्यं‧अप्रसिद्धेःप्रत्यभिज्ञादौव्यभिचाराच्च‧किंचतत्काेत्पन्नरूपादिविशिष्टप्रत्यक्षेसंस्काराभावात्‌स्मरणाभावेनपक्षधर्मतावजातुनिर्विकल्पकस्यासिद्धावन्यत्रापिसामग्रीतौल्यात्‌‧तद्विशिष्टप्रत्यक्षेसंस्काराभावात्‌ ... तेनैवप्रत्युत्पन्नविशेषणस्यजेहिशुक्लत्वादिविशिष्टशुक्लवैशिष्ट्यबोधोवाअविशिष्टतद्विशिष्टबोधोवाआद्येशुक्लत्वादि

जातिस्मरणंप्रथमंततःप्रत्यक्षेणतद्विशिष्टशुक्लबोधःतत्‌शुक्लत्वादिविशिष्टवैशिष्ट्यबोधोद्वयइतिकिमनुपपन्नंशुक्लत्वादिजातिस्मरणमेवचासामान्यलक्षणयासकलरूपादिविषयकमस्तुइतिपेनानुभवःनहिशुक्लत्वादिप्रत्ययविलक्षणशुक्लरूपादिविशिष्टबोधकश्चिदनुभवतिअपजागराद्यविशिष्टानुभवोविशेषणज्ञानजन्योविशिष्टज्ञानत्वाच्चतत्रसंस्कारद्वारापूर्वविशिष्टानुभवःनतज्जन्यविशेषणस्मरणंवासंभवतिउद्बोधंविनासंस्कारस्यस्मरणेविशिष्टबोधेवासामर्थ्याभावादितुबोधकंवक्तव्यंउद्बोधकंचान्यत्रज्ञानंदृष्टमितितदेववाच्यंनचतद्विशिष्टज्ञानमेवतत्रापिविशिष्टज्ञानापेक्षायामनवस्थापत्तेरित्यालोचनसिद्धिरिति‧तन्नसत्यपिज्ञानेसंस्कारानुद्बोधात्‌यस्मात्फलंभवतिसज्ञानविशेषस्तथेतिचेन्न‧अननुगमात्‌यदनंतरंफलंदृश्यतेतदेवाननुगतमप्युद्बोधकंकल्प्यतेफलबलादितिचेन्नहिजागरकारणानंतरंसंस्कारोद्बोधःस्मीतिनदेवकारणमस्तुक्लृप्तत्वात्‌अतएवसंस्कारोद्बोधेननियतोहेतुरितिसदृशादृष्टचिंताद्याःस्मृतीबीजस्यबोधकाइत्यादृगंशतएवप्रणिधानादिसूत्रमपिसंगच्छतेअपिचविशिष्टज्ञानत्वादित्यत्रव्यवच्छेद्यमविशिष्टज्ञानंतच्चासिद्धंसिद्धौवाव्यर्थमनुमानंज्ञानत्वंचसत्तासिद्धंव्याप्तिकंनिर्विकल्पकेव्यभिचारात्‌अनवस्थानाच्च‧किंचविशिष्टज्ञानत्वंनतावद्वस्तुगत्याविशेषणविशेष्यविषयज्ञानत्वंआलोचनेनव्यभिचारात्‌‧नापिविशेषणत्वविषयकत्वंअतथाभूतबोधजनकज्ञानविषयत्वस्यविशेषणत्वस्यतत्राप्रकाशात्‌‧नापिवैशिष्ट्यविषयज्ञानत्वं‧तथासतिगौरितिविकल्पेवैशिष्ट्यविशेषणमित्यालोचनस्यापितद्विषयकत्वेनविशिष्टज्ञानत्वेऽनवस्थापातात्‌‧नापिसप्रकारकज्ञानत्वंप्रकारश्चविषयताविशेषइतिवाच्यं‧ज्ञानविषय

सरूपातिरिक्तायाविषयताया अभावात्॥ नापि विशेषणज्ञानजन्यत्वं सप्रकारकत्वं यद्विशेषणज्ञानजन्यं यत् स एव तत्प्र
कार इति गौरिति विकल्पे तस्यैव साध्यत्वात्। ईश्वरज्ञानस्य निःप्रकारत्वापातात्॥ नाप्यनुव्यावृत्तविषयत्वं विशिष्टज्ञानत्वं अ
पोहनिरासे गौरिति विकल्पे तथात्वासिद्धेः। नाप्यनुव्यावृत्तबोधजनकत्वं। ननु आलोचनया वृत्तानुगतरूपमंतरेण जनकत्व
स्यागृहीतुमशक्यत्वात्। न च गौरिति ज्ञानमेव तदन्यसविकल्पकान्यज्ञानाद्भिन्नप्रमेयत्वात्। यथा चक्षुः चाक्षुषसविकल्पज्ञाना
तिरिक्तज्ञानजनकमिंद्रियत्वादिति तत्सिद्धिः। अप्रयोजकत्वात्। उभयत्र सविकल्पकरूपपक्षनेतरं निर्विकल्पकादि पर प्रक्षेपे
ण तृतीयादिज्ञानसिद्धिप्रसंगाच्चेति॥ ॥अत्रोच्यते॥ ॥प्राथमिकं गौरिति प्रत्यक्षं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वा
त् अनुमितिवत्। न च तत्र स्मरणं संभवति तज्जन्मनि तेन गोत्वस्याननुभवात् अथ यथा बालस्य आद्यप्रवृत्तिर्जातमात्रस्य पूर्वीय
संस्काराध्यानस्मरणं तथेहापि जन्मांतरीयसंस्काराद्गोत्वस्मरणमस्तु प्राथमिकविशिष्टज्ञानवदादितिचेन्न तत्र जीवनादृष्टेन सं
स्कारोद्बोधात् यथास्तु इह तु न विलक्षणमुद्बोधकमस्ति यतः एवं गोत्वा सन्निकर्षे गोत्वस्मरणप्रसंगः यत एव गोत्वेंद्रियसन्निकर्षस्त
व निर्विकल्पकहेतुः स एव संस्कारोद्बोधक इति चेत् तर्हि अन्यत्र क्लृप्तकारणाभावाद् गोत्वेंद्रियसन्निकर्षाद्गोत्वानुभव एवास्मात्
स्मरणसामग्रीतोऽनुभवसामग्र्याः बलवत्वात्। न च तद्विशिष्टज्ञाने पूर्वविशेषणज्ञानाभावादित्यर्थाभिर्विकल्पकं। अत एव
तत्र नज्ञानत्वेन विशिष्टज्ञानानुमानं कारणबाधेन बाधात् यदि चानुभवसामग्रीनः स्मरणं तदानित्यानां वैदिकानां च स्म
रणं स्यात् तत्व अनुभवः। न च जन्यगोत्वज्ञानं जन्यगोत्वज्ञानजन्यं जन्यज्ञानं जन्यविशेषणज्ञानजन्यं चेति। अन्यत्र तथा दर्शना

त्प्रथमं गोत्वानुभव इति वाच्यं एकस्यैव जन्यजनकत्वानवच्छेदकत्वात्। ज्ञानत्वस्यापातात्॥ ननु गौरित्यत्र गोत्वं वैशिष्ट्यं गविभा
सते तथा च तद्विषयकं ज्ञानं कारणं स्यात्। तच्च न निर्विकल्पकं इति चेन्न गोत्वं हि तत्र विशेषणं न तु तद्वैशिष्ट्यं न तु तथाभूतवि
शेषणधीजन्या विशिष्टज्ञाने विशेषणं स्वधर्मविशिष्टं रूपं भासेत पूर्वं तस्यानवगमात्। अवगमे वा तस्यापि विशेषणांतरवत्तो
विशेषणांतरवत्तो विशेषणत्वमित्यनवस्थेति चेन्न। गौरिति विशिष्टज्ञाने विशिष्टस्य गोत्वस्याभानात्। अथ सर्वं विशेषणं विशे
षणवदेव गोत्वादावपि व्यक्त्यादेर्विशेषणत्वादिति चेत्। अस्तु तथा किंतु विशेषणं विशेषणवदेव भासत इति न नियमः। अन्यथा
गौरिति ज्ञाने विशेषणवद्विशेषणविशेषणांतरपरंपराविषयत्वे विषयापर्यवसानप्रसंगः। कचिन्निर्विशेषणस्यापि भाने प्र
मतोपि तथा स्यात्। अविशेषात् न च विशिष्टज्ञानत्वादित्यत्र हेतौ अपर्यायविशेषणं येन विना व्याप्तिर्ग्रहीतुं न शक्यते तस्यैव सार्थ
कत्वात्। व्यभिचारवारकस्यापि तत्वे तदेवमूलं इहापि ज्ञानत्वविशेषणं ज्ञान जन्यत्वयोर्विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्य
ते। ज्ञानत्वस्याभावात् सामान्यतो व्यभिचारावगमात्। अत एव चक्षुस्तैजसत्वादिसाधने रूपादिषु मध्ये रूपस्यैव व्यंजकत्वादित्या
दावसिद्धिवारकमपि विशेषणं सार्थकं। तेन विना रूपस्यैव व्यंजकत्वादित्यस्यासिद्धेर्व्याप्त्यग्रहात्। विशेषणं विनापि यत्र व्याप्तिग्रह
स्तत्र व्यर्थविशेषणत्वं यथा नीलधूमः शरीराजन्यत्वादीयस्य यत्र यः संबंधः स एव तत्र तस्य वैशिष्ट्यं तेन तस्यासंबंधेभ्यो व्यावृत्तो
बाध्यते यथा दंडी पुरुष इति ज्ञाने दंडसंबंधः पुरुषे व्यावृत इति तेनायमदंडव्यावृत्तो बोध्यते तथा गौरिति विकल्पे यत्ताद्विशेष
णावच्छिन्नज्ञानत्वं विशिष्टज्ञानत्वं एतदेवानुव्यावृत्तबोधजनकतावच्छेदकं न तु दंडपुरुषसंबंधोऽन्यथापि दंडसंबंधः पुरुषे न

गतइतिततोप्यदंडव्यावृत्तपुरुषबोधः स्यादितिचेत् भवत्येवदंडसंबंधएवपुरुषेदंडज्ञानंविनानज्ञानयतइतिभ्रमः यत्रवि
शिष्टज्ञानसामग्री नास्तितत्रनिर्विकल्पकंज्ञानकरणजन्येसवृत्तिविशेषणज्ञानजन्यत्वात् प्रत्यक्षमेवतदितिचेत् नएवमभा
वेननिर्विकल्पकंतद्बुद्धौ प्रतियोग्यधिकरणज्ञानयोःकारणत्वेनतदुभयविशिष्टज्ञानसामग्रीनियमात् पद्मभावेननि
र्विकल्पकंतद्घटाभाववद्भूतलमितिज्ञानंनस्यात् विशेषणज्ञानंविनातदभावात् भावेवानिर्विकल्पकासिद्धिः विशिष्ट
ज्ञानत्वस्यतत्रैवव्यभिचारादितिचेत् प्रथमंभूतलेघटोनास्तीतिबुद्धिः तत्रचभूतलेविशेषणमभावोविशेष्यः विशेष्यज्ञानं
नचनकारणं पश्चाद्भूतलविशेष्यकमभावविशेषणकंघटाभाववदितिज्ञानं नन्विंद्रियसंबंधविशेषणतया भावो गृह्य
तइत्युक्तमतः कथंसविशेष्य इतिचेन्न भूतलविशेषणतयास्यभावप्रत्यासत्त्यागृह्यमइतितदर्थः नन्वभावस्यविशेषणतयाभा
नमिति अत एवद्वयोरूपाभाववतीतेश्चाक्षुषत्वमुक्तमाचार्यैः अयोग्यविशेष्येंद्रियासामर्थ्यात्ज्ञानत्वेनिर्विकल्पकंविषय
विशिष्टत्वांशेसविकल्पकमपिअनुव्यवसायस्यव्यवसायजन्यत्वेननियमतः पूर्वविषयरूपविशेषणभानात् तत्रैवज्ञानेतद्
वज्ज्ञानंनिःप्रकारकंसप्रकारकंचेतिनविरुद्धं अंशभेदमादायाविरोधात् अतएवनिर्विकल्पकसविकल्पकत्वेनजातीवाधु
षत्वादिनासंकरापत्तेश्चगौरिति सविकल्पकमपिगोत्वांशे निर्विकल्पकमेवतत्प्रकारभानात् भानेवाऽनवस्थानिर्विकल्प
कासिद्धिश्चाप्रकारश्चद्विविधः विशेषणोपलक्षणभेदात् ननुव्यावर्तकत्वाविशेषेणतयोःकथंभेदः व्यावर्तकत्वेसतिसद्विशे
षणमसदुपलक्षणं यथादंडीपुरुषःकुरुणक्षेत्रमितिचेन्न काकवद्देवदत्तगृहजटाभिस्तापसइत्यादावुपरिभ्राम्यतःकाकस्य

जटापाःसत्वेप्यविशेषणत्वादुपलक्षणत्वाच्च एतेनव्यावृत्तिबोधसमयेव्यावर्तकंसद्विशेषणमसदुपलक्षणं तेनकाकादी
नांव्यावृत्तिबोधकालेसत्त्वकाकादीनांविशेषणत्वमेवव्यावृत्तिबोधसमयेऽसतामुपलक्षणत्वं अतएवकाकेनजटाभिःकु
ण्डेनत्वादाविद्यमानजक्षणेनतूतीयेतिनिरस्तं व्यावृत्तिबोधसमयेसतोपिपरिभ्रमतःकाकस्यविशेषणत्वादुपलक्षणत्वाच्च
नापिविशेष्यवृत्तित्वेसतिप्रत्याय्यव्यावृत्तिसमानाधिकरणत्वेसतिवाव्यावर्तकंविशेषणं यत्ज्ञापत्वयद्विशेष्यतावच्छेदकेन
व्यावृत्त्याव्याप्यत्वमानाधिकरण्यंतेनप्रतीयनेतत्तद्विशेषणं विशेष्यत्वंचप्रत्याय्यव्यावृत्त्यधिकरणत्वमिति जटाभिस्तापसइ
त्यादौनराजटाद्यावृत्तिसंगात् नहितापसेचजटानुवर्ततेनापिविशेष्यसमानविभक्तिकत्वं तत्काकवद्देवदत्तगृहमित्यादौ
पलक्षणेपिगतत्वात् अनभिधानदशायामविशेषणत्वापत्तेश्च अपव्यावर्तकत्वेसतिविशिष्टधीविषयत्वंविशेषणत्वंविशि
ष्टबुद्धिश्चनविशेषणत्वगोचराकिंतुविशेषणगोचरा अन्यथाविशेषणोपलक्षणसंदेहानुपपत्तेः अतोनचाक्षुषत्वादिविरो
धः उपलक्षणेतुपलक्षितंसंस्थानादिविशिष्टधीविषयोनकाकवत्वं तदभावेपितद्गृहप्रतीतेस्तादृप्यात् अन्यथाभमतापसेः
नचनाशोपस्थापितस्यकथंशाब्दज्ञानेवहिर्भावइतिवाच्यं तथैवव्युत्पत्तेः नहिगंगायांघोषइतिगंगापदेनाप्यतीरावच्छेदकत
याभासतेकिंतुतीरत्वेनतीरविशेषणत्वमन्यथाऽजहत्स्वार्थास्यात् नचैवमुपलक्षणपदस्यलाक्षणिकत्वमन्याकासंस्याना
देरनुपस्थापकत्वादितिवाच्यं उपलक्षणबुद्ध्युपस्थितेकारणतरमन्यसंस्थानोपस्थितत्वात्तदन्यतात्पर्यादितिभिन्नपदान्युपस्थिते
रसिद्धेः नहिपुपात्तलक्षणपदातिरिक्तमुपलक्षोपस्थापकमस्तीत्युपलक्षणपदंस्वार्थमुपस्थाप्योपलक्ष्यमुपस्थापयतीतिलक्षणे

चिंता॰मू॰ वस्मात् अन्यथा लक्षणोच्छेदे घटो नास्तीत्यत्रोपलक्षणस्य प्रतियोगिनोऽभाववधीविषयत्वाच्च नियतोपलक्षणाभावाच्च नापि व्या
६६ वर्तकत्वे सति क्रियान्वयि विशेषणमन्यदुपलक्षणं क्रियाहीने सुभगोयं दंडी महाबाहुरित्यादौ दंडादेः विशेषणत्वापातात् परंप
रयोपलक्षणेपि क्रियान्वयित्वाच्च अपात नया वृत्तिर्वैशिष्ट्येन यान्न विशिष्टज्ञाने तद्यावृत्तिविषयोन विशेषणमुपलक्षणं वा तत्पाच
विशिष्ट धीकारणज्ञानविषयत्वे सति प्रत्याप्यव्यावृत्ति समानाधिकरणं विशेषणमिति तन्न नीलमुत्पलमित्यादावनीलात्तुच्छेदेन तद्यावृत्तम्नु
च्छेदवत् नीलं नानामीत्यनुव्यवसायविरोधात् अपोहापानाभ्युपगमात्र व्यावर्तकं साक्षात्संबंधिजातिपरंपरासंबंधि गृहे परिभ्रमतका रा
कादितत्रे व्यावर्तनीयमधिति प्रतीयदिसा भावेन तद्विशेषणमतो विपरीतमन्यत् दंडी पुमानिति विशेषणमत्र दंडः पुंसो न जाति
रनुदंडमसौ च न तस्येति संबंधव्याप्तिरिक्तसंबंधपुरःकाभावे सति संबंधएव साक्षात्संबंधएव साक्षात्संबंधः स च संयोगसमवाय
स्वरूपसंबंधसाधारणः ज्ञाने विषयस्याधिकरणे अभावस्य संबंधि निक्षेम वास्तीति तेषामपि विशेषणत्वमिति शिवादित्वा
मस्मात् अगोरनिसो रूपवान्त्र रविरूपवतिरसइत्यादौ जाते रूपस्य च साक्षात्संबंधेप्युपलक्षणत्वात् लोहितः स्फटिक इत्यादौप रामः
रंपरासंबंधेपि लोहितस्य विशेषणत्वात् अपान्वयप्रतियोगुपस्थापकतयान्वितमुपलक्षणं साक्षात् अन्वितं विशेषणं काका ६६
दैःसंस्थानाद्युपस्थापकतयोपयोगात् अतपाले दंडादि विशेषणत्वमिति चेन्न उपलक्षणपदस्य लाक्षणिकत्वापत्तेः प्रतियोगि
नोभानेधर्मांतरानुपनयाच्च अपूर्वव्यावृत्ति बुद्धिसमये विशेष्यसंबंधं व्यावर्तकं विशेषणं तदानी विशेष्यासंबंधं व्यावर्तकमुपल
क्षणं न च जटायरापत्राक्षित दातत्रोपलक्षणं अतएव तत्रैव तद्वत्संबंधसमये विशेषणमसंबंधसमये उपलक्षणमिति तन्न रू

पवतिघटे रसइत्यादौ रूपस्य विशेषणत्वप्रसंगात् दंडी आसीदित्यादावतीते दंडविशिष्टव्यवहाराभावप्रसंगाच्च एतेन पदविशेष्या
वच्छेदकधर्मेण व्यावृत्त्या वयत्समानाधिकरणत्वेन प्रतीयते तद्वत्तद्विशेषणमिति प्रत्युक्तं॥ ॥अत्रोच्यते॥ ॥दंडीपुरुष इति ज्ञा
नानंतरं दंडवत्यदंडव्यावृत्तिरवगम्यत इति प्रत्याप्यव्यावृत्त्यधिकरणता पुरुषस्य दंडेनावच्छिद्यते न पुरुषत्वेनातिव्याप्तेः उप
लक्षणेगृहता पक्षादिनि प्रत्याप्यव्यावृत्त्यधिकरणता न काक जटादिभिरवच्छिद्यते तेन तद्भाववत्यपि व्यावृत्तिप्रतीतिः किंतु संस्था
न विशेषवत्त्वादिना एवं च प्रत्याप्यव्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणं तद्भिन्नत् व्यावर्तकमुपलक्षणं व्यावृ
त्त्युच्छेदेवानंतरमेव विशेषणत्वमुक्तं इदानीं रावापाः सदसमानाधिकरणं व्यवच्छेदकं विशेषणं विशेषणं व्यधिकरणमुप
लक्षणमिति तस्यार्थः स्वाधिकरणमात्रवृत्तिव्यावृत्तिबोधकत्वं स्वावच्छिन्नाधिकरणताकव्यावृत्तिबोधकत्वं वा स्वाधिकरणान
धिकरणव्यावृत्तिबोधकत्वे सति व्यावृत्तिबोधकत्वं वेति उपलक्षणं स्वानधिकरणेपि व्यावृत्तिं बोधयति अथवा विवक्षितान्वय
प्रतियोगितावच्छेदकं व्यवच्छेदकं विशेषणं दंडिनमानयेत्यादौ दंडस्यापातदनवच्छेदकव्यवच्छेदकमुपलक्षणं काकेन देवदत्तस्य
गृहा इत्यादौ काकोन गृहस्य देवदत्तान्वयि प्रतियोगितावच्छेदकः तद्विरहदशायामपि तत्र देवदत्तान्वयात् किंतु गृहे विशेषण
वोपलक्षणपरिचितः अतएवान्वयप्रतियोगितेपि नोपलक्षणे व्यर्थं पदार्थयदन्वितत याज्ञानं एव विशेष्ये तात्पर्यविषयीभूतेत
रान्वयधीस्तदवच्छेदक विशेषणमनेवंभूतं तदुपलक्षणमिति उपलक्षणनवच्छिन्नेप्युपलक्षेतात्पर्यविषयीभूतेतरान्वयवो
धात् अयमेव हि कार्यान्वयि विशेषणमनन्वय्युपलक्षणमित्यस्यार्थः न तु तात्पर्यविषयीभूतविशेष्यान्वयबोधविषयत्वं विशिष्टत्ता

नविषयत्वं·वाग्निर्योग्यभावबुद्धिविषय इति मतेतदभावात् यद्वा विशेष्यान्वयिनायस्यावश्यमन्वयः तद्व्यवच्छेदकं विशेषणं तद
न्यदुपलक्षणं·तत्रोपलक्षणस्य विशेष्यमात्रान्वयात् यावर्त्तकं विशेष्यान्वयिनान्वीयते तद्विशेषणं·यत्रान्वयित दुपलक्षण
मिति वा यद्वा तात्पर्यविषयान्वयप्रतियोगी उद्देश्यान्वयप्रतियोगी वा धर्मो विशेषणं·तदन्यदुपलक्षणमित्यलं विस्तरेणास्तविक
ल्पकं च विशिष्टज्ञानं यथा गौरयमिति तच्च·सामान्यादीनां परमार्थसत्त्वेनार्थजत्वादिंद्रियजत्वाच्च·प्रत्यक्षं कश्चित्संस्कारसहकारिव
शान्तत्ताविशिष्टस्येदंताविशिष्टाभेदो हेरत्वेंद्रियप्रकोविकल्पः नन्वेककार्येसहकारित्वमन्यत्र प्रत्यभिज्ञानुनैकं ज्ञानं तदंशे परोक्ष
त्वस्येदमंशे वापरोक्षत्वस्यानुभवेन विरुद्धधर्मसंसर्गात्·न चेदंयपार्थ्यं अनेकदेशाकालसंबंधस्यैकत्र बाधात् एककालादिसंसर्गे
तदभावव्यवच्छेदवत्तदविनाभूतकालांतरादिसंबंधव्यवच्छेदात्तदयथार्थत्वे च बहुविज्ञवे दृतिचेन्न पारोक्ष्यापारोक्ष्ययोरिंद्रियसन्नि
र्धेः इंद्रियजन्यत्वेनापरोक्षत्वनियमात् तत्रांशस्य स्मृत्युपनीतत्वात्·इंद्रियसंबंधविशेषणतत्प्रत्यासत्तेः न चैककालसंबंधः का
लांतरसंबंधाभावाविनाभूत एकस्मिन्कालादिकसंबंधस्य ज्ञानेऽनेकविषयत्वस्य वाश्यावश्यापत्तेः साक्षात्कारेऽपीत्यनुव्यवसा
येबाधकाभावाच्च·ननु केयं तत्तान तावदतीतसमयसंबंधः अनागतगोचरस्मृतिप्रत्यभिज्ञयोस्तत्तोल्लेखात्·प्रत्यक्षानुभूयमा
नघटादावतीतसमयावच्छेदानुमानेपि·तत्ताधीव्यपदेशयोरभावात् अतीतसमयसंबंधावगमेपि सोयं नवेति संशयात्·तद
भावावगमेपि सोयमिति प्रतीतेः अतीतसमयविशिष्टः स इति सदप्रयोगकालेतदभावाच्च·एतेन ज्ञातधर्मांतरवैशिष्ट्यं तत्त्वे
तिनिरस्तं·न च तदहवृत्तिगुणादिकमेव तत्ता तदवगमेपि तदनवगमात्·तदनवगमेपि तदवगमाच्च·नाप्यतीतज्ञानवैशिष्ट्यं परेण

ज्ञात इति ज्ञानेपि स इति प्रयोगाभावात् नाप्येतज्जन्मातीतस्वज्ञानवैशिष्ट्यं·तदवगमेपि तत्तासंशयविपर्ययदर्शनात्·अतीत
ज्ञानविशिष्टः स इति सदप्रयोगाच्च·अतीतानुभवविषयत्वस्यानुभवाविषयत्वेन स्मृत्यात दुल्लेखानुपपत्तेश्च यस्य तीतानुभ
वविषयत्वं·न ज्ञातत्वानुभवविषयोपि यदा ज्ञानांतरेण गृह्यते तेन दास घट इति स्मरणं नो चेत्तु प्रमुष्टतत्ताकघट इति तत्त्वं अती
तानुभवविषयत्वस्यानुमितौ भानेपि स इति धीव्यपदेशयोरभावात् अतीतानुभवविषयत्वनिश्चयेपि तत्तासंशयविपर्ययद
र्शनात्·सहप्रयोगानुपपत्तेश्च ज्ञानांतरेण तीतानुभवविषयत्वग्रहे तत्तोल्लेखापत्तेश्च अथातीतधर्मवैशिष्ट्यं·तत्ता सच धर्मः
कश्चित्समयः कश्चित्ज्ञानादिर्न चातीतधर्मविशिष्टः स इति सदप्रयोगानुपपत्तिः धर्मविशेषमादाय तदुपपत्तेः तदप्रतीतावपि
इति प्रतीतेरसिद्धेः न चातीतधर्मविशिष्टप्रतीतावपि सन्न वेति संशयात् सन्नायमिति विपर्ययाच्चैनेवमिति वाच्यं·निश्चितध
र्मेतरधर्मविशेषविषयत्वेन तयोरुपपत्तेरिति चेन्न·मैवं यदि वस्तुगत्यायोऽतीतो धर्मस्तद्वैशिष्ट्यं तत्ता तदानुभवेपि तद्विषयत्वात्तत्तो
ल्लेखापत्तिः नाप्यतीतत्वेन भासते यो धर्मः तद्वैशिष्ट्यं भासमानधर्मस्यातीतत्वेनानुभवाविषयत्वात्·प्रत्युत वर्त्तमानत्वेनानुभ
वात् स्मृतौ तु तदुल्लेखानुपपत्तेश्च न चानुभवानंतरं ज्ञानांतरेणातीतधर्मवैशिष्ट्यभानानंतरं स्मृतौ तत्तोल्लेखो नान्यथेति वाच्यं·अती
तधर्मस्यानुमितौ तत्तोल्लेखापत्तेः इदं तापिन तन्मात्र गुणादिकं ह्यनुमानादिना तदवगमेप्ययमिति व्यपदेशाभावात्प्रत्यक्षेणतद
वगमे·अयमिति व्यपदेश इति चेन्न·वाच्यस्य प्रमाणगोचरतया व्यपदेशस्य नियंतुमशक्यत्वात् गुणादावपि तन्निर्वचनेः ननु गमात्
न चैतत्प्रत्यक्षपतं इदमेतदोः पर्यायत्वात् नापि प्रत्यक्षज्ञानगोचरत्वं अबाधितत्वापत्तेः अतीते तदनुमानेपि इदमिति बुद्धिव्यप

चिंता० स्मृ० ६८ देशाभावात्स्मृत्यापि तदुल्लेखापत्तेश्च। अत्र केचिदाहुः। तत्तेदंते स्मृत्यनुभवयोरासीन्यौ। अखंडे एवोपाधी क्रमधर्मातिरेकिणौ। एवं
चेदंतासंस्कारेणेदंतैव तत्तयास्मर्यते न च तत्तार्थः क्वचित् अप्यनारोपाभावे कथमारोप इति वाच्यं प्रत्यभिज्ञायाः तत्रारोपपा-
र्यता दिदंतानुल्लेखस्यानुभवत्वभवस्मरणे धर्मान्तरमेव तत्तयाभासते। अत एवायं घट इति न स्मरणं। अतः सर्वा स्मृतिरयथार्था
अयथानुभवाश्च हरिहराद्यनुचिंतनं च कविकाव्यमूलज्ञानवन्मनोरथज्ञानवृक्षसाकांक्ष पूर्वापरज्ञानवदनुभवरूपमेवेति तन्न स्मृतेः
पूर्वानुभवोपस्थितिं विना तत्तत्तारोपासंभवात् किंचेत्तत्रांशज्ञानननुभूतगोचरत्वेन स्मृतेः संस्कारसीमालंघनेन इदंतात तत्तयास्मर्य-
तदृत्पत्तिमानाभावात् घट एव तत्तयास्मर्यत इत्यस्तु लाघवात्। उच्यते। अनुभवे काचो धर्मान्तरं वा वर्तमानत्वेन यो विषयः अत एव
स्मरणस्य अनुभवस्मरणयोरेकविषयत्वेऽपि स्मरणे तत्तत्त्वप्रयोगः संस्कारजन्यज्ञानस्यैव तत्त्वप्रयोगहेतुत्वात्। अत एव प्रत्य-
भिज्ञानात्तत्त्वप्रयोगः प्रत्यक्षानुभवे तत्रैवेदंत्वप्रयोगः न तु विषयकृतोऽनुभवस्मरणयोर्विशेषः। अत एवायं घट इत्यनुभवा-
दयं घट इति न स्मरणं स घट इति स्मरणात् स घट इति नानुभवः प्रत्यक्षायं घट इत्यत्र यद्धर्मवैशिष्ट्यं भासते तस्यातीतत्वं तत्र तद्वै-
शिष्ट्यमननुभूतमपि स्मृतिविषयः इदंताविशिष्टगोचरसंस्कारात्तत्तारोपः कथं स्मृतिरिति चेन्न स घट इति स्मृतिं प्रत्यनुभवरूप- रामः १
स्य हेतुतानिर्वाहकतया संस्कारस्य तत्त्वेनैव कल्पनात्। अयं घट इति स्मृतेः स घट इत्यनुभवस्य च दर्शनात् समानविषयत्वेऽपि स्मृ- ६८
तेरयं घट इति न स्मृतिः स घट इति नानुभवश्चेन्नैव स्मृतिरननुभूततत्तांशेऽनुभवः स्यात्। संस्कारमात्रासाधारणकारणत्वेन स्मृतित्वा-
त्। स इह प्रयोगो धर्मविशेषमादाय प्रतिविधेयः। अत एव संस्कारहेत्वनुभवप्रमात्वपारतंत्र्येण यथार्थत्वेऽपि स्मृतिरप्रमेति सर्वतं-

त्रसिद्धांतः। यद्वानेयं यथार्था तथाहि स्मृतिः स्वविषयवर्तमानत्वविषया तीतानागतगोचरत्वे सति प्रतीतित्वात् प्रत्यभिज्ञावत् प्रती-
तित्वाद्वा घटोऽस्तीतिवत् प्रतीतेः समयविशेषविषयत्वनियमात् ज्ञानसामग्रीमहिम्ना वाननुभूतेऽपि समयांशे स्मृतिर्न तत्र सं-
३ घ स्कारव्यापारोऽन्यथासिद्धत्वात्। अत एव पाकरक्तो घट इदानीं श्याम इति धीर्यथार्थत्वव्यवहारो लौकिकानां श्यामत्वस्य वर्त-
मानत्वेनावगमात्। एतेन श्यामधीस्तत्र यथार्थैव घटे कदाचित् सत्त्वात्। इदानीं श्याम इति प्रतीतेराकार एव नेत्यपास्तं अत एवा-
तीतानागतवह्निगोचरत्वे विद्यमानधूमेन पर्वते वह्निरित्यनुमिते वर्तमानवह्निविषयतादिदानीं वह्निनिश्चयेन वह्न्यर्थिप्रवृत्तिः
अन्यथेदानीं तत्संदेहप्रवृत्तिर्न स्यात् यदा धूमस्तदा वह्निरिति व्याप्त्यावगृहीतज्ञानद्वययानि कथं प्रवृत्तेरन्यथानुपपत्तेः। यथा स
घट इति स्मृतौ तत्ताविशिष्टस्य वर्तमानत्वं भासते संस्कारस्य वर्तमानज्ञानसामग्रीसहितस्यैव हेतुत्वात् सोऽयमिदानीमित्या-
दौ प्रत्यभिज्ञायां तथा कल्पनात् गेहे स घट इति स्मरणात् कथं प्रवृत्तेश्च अन्यथा तत्ताविशिष्टस्येदानीं संदेहे स्यान्न स्यात्। न च
प्रवर्तमानांशेऽननुभूतादिरूपत्ववर्तमानत्वेनानागतवर्तमानस्य पूर्वमननुभवात् एवं च स्मृतेस्तत्तांशे भूतस्य वर्तमानताविष-
यः तत्र विशेषणस्य कदाचिद्विशेष्यस्य वा वर्तमानत्वाभावात् स्मृतिरयथार्थैव न च पूर्वं तथासीदयं इति तद्यथार्थत्वं पाकरक्तेऽप्य-
नोयमिति ज्ञानस्य यथार्थत्वप्रसंगात् प्रत्युत यद्विशेषे स्मरणे अविद्यमानधर्मावच्छेदेन भासते तदा ह्ययथार्था। किंच स्मृतेर्य-
थार्थमपि कृतं इति॥ ॥इति श्रीमहामहोपाध्यायमिश्रश्रीगंगेश्वरविरचिते आन्वीक्षिकीतत्त्वचिंतामणौ प्रथमः परिच्छेदः समाप्तः॥ ॥

श्री

जि.ना.मू.
६९

रामः
६९

खर्च.

...काम खर्च गरेको.	नग वजन, गज व थान.	दर.	रुपैयाँ.
५	६	७	८

रोजकीर्द लागवडी सामानाबद्दल

जमा.	
कोणाकडून माल घेतला.	नग, वजन, गज व ता
१	२